# व्यासश्रीः
# VYĀSAŚRĪḤ

**Impact Factor 7.747**
**(A Peer Reviewed Research Journal of Indology)**
**July-December 2024**
**Date of Publication: 31.12.2024**

**: Chief Editor:**
Dr. Buddheswar Sarangi

**: Associate Editors:**

Prof. Prasanta Kumar Mahala
Dr. Jagamohan Acharya
Dr. Gyanaranjan Panda
Dr. Swetapadma Satapathy
Dr. Dibakar Dash
Dr. Santosh Majhi
Dr. Priyavrat Mishra
Dr. J. Bali Chakravarthi
Dr. Runima Sharma

*Publisher*

**Padmashree Ramaranjan Mukherjee Chair of**
Maharshi Vyasadev National Research Institute
A Unit of Vyasayanam, Regd. No. 1635-IV-477/04
Vedavyas, Rourkela-4, Odisha
Contact No.: 7003415810, 7044016153
Email: vyasasri12@gmail.com
Website: www.vyasasri.com

**Scholar Members for Scrutiny:**

Prof. Sarita Sharma

Dr. Saroj Kumar Padhi

Dr. Somanath Dash

Dr. Bharat Bhushan Rath

Dr. Preeti Pujara

Dr. Sunil Joshi

Dr. Harapriya Behera

Dr. Prakash Gogikar

Dr. Pradeep Kumar Bag

**Board of Advisors:**

Prof. Abhiraj Rejendra Mishra

Prof. Radhaballava Tripathy

Prof. Harekrishna Satapathy

Prof. Shrinivasa Varakhedi

Prof. Prafulla Kumar Mishra

Prof. Somesh Kumar Mishra

Prof. Chandrakant Shukla

Prof. Arun Ranjan Mishra

Prof. Sukanta Kumar Senapati

Dr. Acharya Devabrata

**Hon'ble Referees:**

**Prof. Kishor Chandra Padhi,**

Ex-Professor, S. J. S. V. Puri

**Prof. Tapan Shankar Bhattacharya,**

Professor in Sanskrit, Jadavpur University, Kolkata

**Prof. Satyanarayana Acharya,**

Professor in Sahitya, National Sanskrit University, Tirupati

**Prof. Dharmananda Rout,**

Professor in Sahitya, LBS National Sanskrit University, New Delhi

**Co-Ordinators:**

Prof. Sarita Sharma (Academic)

Dr. Umakanta Panda (Finance)

Sri Chandradhwoja Majhi (Finance)

Smt. Laxmipriya Pahadi (Publicity)

Dr. Koushik Malakar (Printing)

Dr. Asha Singh Rawat (Printing)

Biswanath Mahata (Printing)

# प्रास्ताविकम्

**कालः पचति भूतानि कालः संहरते प्रजाः।**
**कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः।।**

भारतीयमुनीनां सूक्ष्मेक्षिकया दृष्टस्यास्य तत्त्वस्य वैशिष्ट्यं न केनापि अवमानयितुं शक्यम्। वयं सर्वे कालस्य गतिं पश्यामः, तथापि स्वकर्मसु मतिं न निधाय अन्यत्र विषये कालं यापयामः। यत्तु एकस्य समृद्धराष्ट्रस्य महत्यै क्षतये व्रजति। कालस्य बलवतां व्याख्यायता भगवता कृष्णेनाऽपि गीतायामभाणि "अहमेवाक्षयः कालः"(गीता-10/33) अतएव कालस्य गतिः सर्वदा अग्रे सरति न कदापि तं रोद्धुं कोऽपि समर्थः। अतः लोके यस्य यत्र नियोगः तस्य समृद्ध्ये तेन तत्र मतिर्देया।

व्यासश्रीपरिवारस्य ज्ञानगङ्गाप्रवाहः सर्वत्र विश्वे अद्य स्वतन्त्रस्थानं वहति। न कोऽपि सफलः संस्कृतज्ञोऽस्ति यस्तु व्यासश्रीपरिवारस्य ज्ञानदीपकार्यक्रमं न जानाति। प्रायशः सहस्रसंख्यकानां शास्त्रीयव्याख्यानानां प्रचारः **YouTube** द्वारा क्रियते। मध्ये मध्ये राष्ट्रियचर्च्चासत्रं, कविसमवायः, समाजसेवा, विद्वत्समाननं, पत्रिकाप्रकाशनं च समयानुगुणं समायोज्यन्ते। विदुषां मुखारविन्दे इयं प्रशंसावाणी सर्वदा आम्रेड्यते यत् एका एव संस्कृतगवेषणाधर्मिपत्रिका "व्यासश्रीः" समयानुसारं प्रकाश्यते भारतवर्षे। बहवो युवानः गवेषकाः जीवनयात्रायां अनया पत्रिकया उपकृताः भवन्ति। एतादृशः सन्देशः अस्माकं महान् प्रोत्साहनस्य विषयः।

अद्य भगवत्याः शारदाम्बिकायाः कृपाकटाक्षसमृद्धा व्यासश्रीः स्वकीयां सप्तविंशतितमां संख्यां विदुषां पुरतः उपस्थापयति। यत्र संस्कृतशास्त्राणि आधारीकृत्य सप्तविंशतिः निबन्धाः संशोभन्ते। विद्वत्सम्पादकानां परीक्षणानन्तरं इमे चिताः निबन्धाः एव प्रकाशनाय योग्यतार्महन्ति। कालस्य गतिर्मध्ये व्यासश्रीसारस्वतसेवाधारायाः उत्तालतरङ्गाः संस्कृतगवेषणाक्षेत्रे प्रकृष्टं भूमिकां ग्रहीस्यन्तीति निश्चप्रचं वचः।

प्रकाशनावसरेऽस्मिन् निबन्धप्रस्तोतृभ्यः सम्पादकपरिषदः ज्ञानवृद्धेभ्यः विद्वभ्यः कृतज्ञतामालां समर्पयामि। अन्तिमे विश्वलीलाकृतां श्री जगन्नाथदेवानां चरणाब्जे भ्रमरायमाणो नमस्करोमि। अन्तिममङ्गलमिदमस्तु-

**लोककल्याणकाराणां न मृत्यभीतिरत्र भो।**
**कीर्त्तिस्तेषां जयेत् कालं मधुप्रस्नविणी सदा।।**

इति

दिनाङ्कः ३१.१२.२०२४

विद्वच्चरणसेवकाः

**डॉ. बुद्धेश्वरषडङ्गी**

मुख्यसम्पादकः तथा

व्यासश्रीपरिवारस्य सदस्याः


Scientific Journal Impact Factor

SJIFactor

# CERTIFICATE OF INDEXING (SJIF 2024)

This certificate is awarded to

**VYASASHRIH**

**(ISSN: 2320-2025)**

The Journal has been positively evaluated in the SJIF Journals Master List evaluation process

SJIF 2024 = 7.747

**SJIF (A division of InnoSpace)**

SJIFactor Project Manager
International Advisory Services
INNOSPACE INTERNATIONAL

SJIFactor Project

# GUIDELINE

1. Paper should be prepared with in10 pages**.**

2. Your paper should be recommended by an eminent scholar (Professor/Associate Professor/PhD Guide) of concern field. Send the pdf and soft copy of your paper with recommendation of the scholar to **vyasasri12@gmail.com** Send a message to the contact no.7003415810 that you have sent the paper.

3. Your paper will be sent to our export committee for approval.

***Guide line for the preparation of an article for VYASASHREE, ISSN 2320-2025***

…………………………………………………………………………….

**A. PRINTING AREA OF THE PAPER**

Length- **17cm**

Wide-**10.5 cm**

Letter size- **13 for Hindi/Devanagari** (Unicode fon0t)

**11 English (Arial Normal)**

**B. PAPER FORMAT**

1. Title of the Paper (all capital). **Font size-16**

2. Authors' name-**Font size 13**

3. Abstract- Font Size 12

4. Key words (italic). **Font size 12**

5. Introduction**. Font size 12**

6. Main Topic**. Font size 12**

7. Conclusion. **Font size 12**

8. Foot Note. **Font size 09**

9. List of Reference Book s. (Author, Name of the Publisher, Publication year) **Font size 09**

10. Page limit. **6 to 10**

All interested scholars are requested to prepare their research paper as per guide line to avoid the printing hazard.

**The paper not followed the above guide line may be rejected at final stage**.

N. B. The submitted papers are reviewed by the Board of Referees and Editorial Board. Only the selected papers are published in the journal. So, it takes three to six months to publish a paper.

**Dr. Buddheswar Sarangi**

***Chief Editor, Vyasashree***

# सूचीपत्रम्


**Editorial Board** (I)

**प्रास्ताविकम्** (IV)

**Certificate of impact factor** (VI)

**Guideline** (VII)

| सृष्टिः | स्रष्टा | पृष्ठम् |
|---|---|---|
| 1. अष्टाध्यायीतन्त्रस्य आन्वीक्षिकी | डॉ.सुवलचन्द्रसाहुः | 1 |
| 2. संस्कृतसाहित्ये राज्यस्य उत्पत्तिः च विकाशः | डॉ.चिन्मयचट्टोपाध्यायः | 15 |
| 3. नारायणपण्डितस्य हितोपदेशे ज्ञानपरम्परायाः विकाशः -एकं परिशीलनम् | डॉ.पङ्कजकुमारमाहाना | 22 |
| 4. उपनिषदस्तु यमनियमस्वरूपपर्यालोचनम् | दयारामगौतमः | 26 |
| 5. द्वैततत्त्वाधारितावतारतत्त्वम् अद्वैतप्रसङ्गश्चः पुराणतत्त्वविश्लेषणम् | डॉ.देवाशिसकर्मकारः | 37 |
| 6. अथर्ववेदसंहितानुसारेण आयुर्वेदस्वरूपम् | डॉ.सुदेवः | 44 |
| 7. पुङ्गलसिद्धान्तः | डॉ.शान्तनुकुमारचक्रवर्त्ती | 55 |
| 8. किरातार्जुनीयमहाकाव्ये प्रथमसर्गान्तर्गतं साहित्यिकं वैशिष्ट्यम् | सुशान्त-धरुआ | 60 |
| 9. दूतकाव्यपरम्परा : साहित्यशास्त्रीय एवं ऐतिहासिक दृष्टि | डॉ.शैलेशकुमारमिश्रः | 67 |
| 10. पञ्चमहाकाव्यव्यख्यानेषु मल्लिनाथस्य अलङ्कारयोजनाचातुरि | डॉ.एम.किषनः | 74 |
| 11. नाट्यतत्त्वदृष्ट्या अभिज्ञानशाकुन्तलस्य काव्यिकं सैन्दर्यम् | डॉ.श्वेतपद्माशतपथी | 83 |

12. मुग्धबोधव्याकरणस्य कारकपादे विभक्तिसूत्रविमर्शः
अतनुआढ्यः & निलीमासरकारः 87
13. प्रातिपदिकार्थतत्त्वविमर्शः Mrs. Nilima Sarkar 94
14. निर्वचनसिद्धान्त एवं तद्धितपदों की निर्वचनशैली Sukant Arya 99
15. पण्डित श्री भागवतप्रसाद दास शर्मणा विरचितस्य वैदेहीशविलासमहाकाव्यस्य पूर्वविलासे महाकाव्यलक्षणसमन्वयः आशुतोष-दोरा 106
16. ग्रामशतककाव्येऽलङ्कारविचारः डॉ.प्रदीपकुमारबागः 125
17. लद्दाख की जनजातीय बौद्ध संस्कृति और यूनेस्को
प्रो. अवधेशकुमारचौबे 133
18. Yogic Counselling Module for Holistic Personal Development Rajesh Rao K 152
19. Function Of Judicial System With Reference To Sanskrit Shastras Dr. Bharat Bhusan Rath 160
20. The Concept of ‘Aditi’ in the Atharvaveda And the Avesta: A Comparative Study
Dr. Manoj Kumar Mishra 165
21. Music And Dance In Kālidāsa Dr. Jayanisha K 171
22. बहुभक्तिवादीनि ब्राह्मणानि भवन्ति डॉ. निरञ्जनमिश्रः 179

- **Writer’s World** 189

 ISSN: 2320-2025

# अष्टाध्यायीतन्त्रस्य आन्वीक्षिकी

**डॉ. सुवल चन्द्र साहुः**
अध्यापकः, व्याकरणविभागः
सरकारी-डिग्री-संस्कृतमहाविद्यालयः

**निबन्धोपज्ञा-** प्रतीयमानप्रपञ्चस्य प्राचीनतमास्वखिलासु प्रयुज्यमानासु भाषासु मूलभाषापदवीमारूढा संस्कृतभाषा निगमागमदर्शनपुराणव्याकरणकाव्यकलापैरात्मानं भूषयन्ती सर्वा अपि अतिशेते। भाषावैशिष्ट्यविवक्षया ऋग्वेदः ब्रवी
ति- [1]चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा वद्धो वृषभो रोरवीति महो देवो माँ आविवेश।।

अस्य ऋग्तन्त्रस्य व्याख्यानावसरे भाष्यकारेण चत्वारि पदजातानि नामाख्यातोपसर्गनिपाता इति व्याख्यातानि[2]। निरुक्ते च - नामाख्यातोपसर्गनिपाताश्चेति वैयाकरणाः[3]। काव्यादर्श दण्डिना प्रोक्तम्-

**इदमन्धतमः कृत्स्नं जायते भुवनत्रयम् .... न दीप्यते[4]।।**

एवं च सर्वं ज्ञानं शब्दानुवद्धमिति दर्शयितुं हरिणाऽपि- "अनुविद्धज्ञानं सर्वं शब्देन भासते"[5]। संस्कृतभाषायाः स्वरूपज्ञानाय भाषाविषयकतत्वावबोधाय अधिजिंगासमानानां कृतेऽकृतकं शास्त्रं व्याकरणमेव प्रधानं साधनमिति भाषाविद्भिः विनिश्चितम्। सृष्टिकालत आरभ्य प्रचलन्ती छान्दसलौकिकभेदाभ्यां द्वैविध्यमादधती सुरभारती व्याकरणनिबन्धना सती प्रतनुते। अतः पाणिनीयशिक्षायामुटङ्कितम्-

**छन्दः पादौ तु वेदस्य हस्तो कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्वीकृतम्[6]।।**

तत्र सत्सु वहुषु व्याकरणेषु महेश्वरप्रसादादधिगतं लौकिकवैदिकोभयशब्दानां नियामकमष्टस्वध्यायेषु प्रविभक्त- मष्टाध्यायीव्याकरणमुच्चैस्तमां राराजते।

**कूटशब्दाः** - अष्टाध्यायी, वार्त्तिकम्, महाभाष्यम्, सूत्रशैली।

**प्रस्तावना-** पदवाक्यप्रमाणज्ञ वेदाङ्गधुरीण विद्वदग्रधौरेयस्तत्र प्रमाणभूत आचार्य: पाणिनिः महता प्रयत्नेन कुशाग्रबुद्धिनिबद्धं साधुशब्दज्ञापकं शब्दानुबिद्धं शब्दनिष्ठसाधुत्वप्रकारकज्ञानजनकं वेदाङ्ग भूतमष्टाध्यायीव्याकरणं प्रणिनाय। दृग्गोचरीभूतं समग्रं जगत् पराख्यस्य शब्दब्रह्मणः विवर्त्तभूतमिति भर्तृहरिणा समाम्नातम्-

**शब्दस्य परिणामोऽयमित्याम्नाय विदो विदुः।**
**छन्दोभ्य एव प्रथममेतत् विश्वं व्यवर्त्तत।।[9]**

महर्षिपाणिनिः [10]महतीं सूक्ष्मेक्षिकां प्रतिभामासाद्य निखिलशब्दपारावारमुन्मथ्याष्टाध्याय्यां सप्तनवत्यधिकनवशतोत्तरत्रिसहस्राणि[11] (३९९७) सन्निवेश्य मानवजातिं प्रति महत्दानं साधितवान् । तत्र संस्कृतशब्दानां शुद्धिसाधुत्वनियमव्यवस्थापकं पाणिनिप्रणीतं शब्दानुशासनं कात्यायनविरचितवार्त्तिकेन तथा पतञ्जलिविरचितमहाभाष्येण महनीयं सुप्रशस्यं च प्रतिभाति। तथाहि वाक्यपदीये "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः"[12]। भाष्यकृता पाणिनीयं व्याकरणं सर्ववेदपारिषदरूपेण वर्णितम्[13]। पाणिनिसूत्रे उक्तानुक्तदुरुक्तानां समीक्षापुरस्सरं कात्यायनेन वार्त्तिकानि विरचितानि। महाभाष्यकारः पतञ्जलिस्तु सूत्राणि वार्त्तिकानि भावगम्भीरशैल्या स्वसिद्धान्तसहितं महाभाष्ये समुपपादितवान्। तस्मात् पाणिनि-कात्यायन-पतञ्जलिरिति मुनित्रयं व्याकरणपरम्परायां सर्वाग्रगण्यत्वात् सर्वैः समाद्रीयते।

२. **अष्टाध्यायीस्वरूपम्** : पाणिनीयव्याकरणस्य पंचसंख्यकानि नामानि व्याकरणशास्त्रेतिहास-ग्रन्थादिषु दरीदृश्यन्ते, तद्यथा- [14]अष्टकम्, अष्टाध्यायी, [15]शब्दानुशासनम् [16]वृत्तिसूत्रम् तथा [17]अष्टिका इति। तत्र कालपरिभाषारहितमकालकं व्याकरणं नाम पाणिनिना एव विरचितं व्याकरणं प्राथम्यं विभर्तीति प्रकटयितुं "पाणिन्युपज्ञमकालकं व्याकरणम्" इति पाठः [18]काशिकायां [19]दण्डनाथवृत्तौ [20]न्यासव्याख्याने तथा अष्टाध्याय्यां स्वयं पाणिनिना[21] अपि प्रदर्शितम् ।

पाणिनीयशब्दानुशासनधारायामष्टाध्यायीस्वरूपं सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठस्तथा लिङ्गानुशासनमिति रीत्या पंचधा विभज्यते। तेषु सूत्रपाठः, शब्दानुशासनं वा प्रमुखं भवति। युधिष्ठिरमीमांसकेन[22] प्रोक्तं यत्-समग्रसंस्कृतवाङ्मये आचार्यपाणिनेः शब्दानुशासनमेकमेव आर्षतन्त्रमिति Paul Kiparsky महोदयास्तु "On the Architecture of panini's grammar" इति निबन्धे अष्टाध्याय्याः चत्वारोऽवयवा विद्यन्ते इति प्रकटयन्ति। The Grammar has four distinct components:

(a) Aṣṭādhyāyī : a system of about 4000 grammatical rules.
(b) Śivasūtras: the inventory of phonological segments, partitioned by markers (anubandhas) to allow classes of segments (Pratyaharas) to be designated by a set of special conventions.
(c) Dhātupātha: a list of about 2000 verbal roots, with subclassification and diacritic markers encoding their morphological and syantactic properties.
(d)Ganapātha: a list of 261 lists of lexical items which are idiosyncratically subject to certain rules. Some of the lists are open-ended, and (like the Dhatupātha) they have to some extent been modified by later grammarians.

अष्टाध्यायी, सूत्रपाठः, शिवसूत्राणि, धातुपाठः, गणपाठः । महाभाष्यकारेण[23] धातुपाठस्तु पाणिनेः प्रवचनं मन्यते, यथा-एवं तर्हि सिद्धे सति यदादिग्रहणं करोति, तद्ज्ञापयति आचार्यः अस्ति च पाठः वाह्यश्च सूत्रात्।

**१. सूत्रपाठः -**

अष्टानामध्यायानां समाहार इति विग्रहे अष्टाध्यायशब्दात् "तद्धितार्थोत्तरपदसमाहारे च"[24] इति द्विगुसमासे "द्विगोः"[25] डीपि अनुवन्धापहारे अष्टाध्यायी। पुनः अष्टौ अध्यायाः परिमाणमस्य इति अष्टन् शब्दात् तद्धितेन कन्प्रत्यये अष्टकमित्यपि समाम्नातम्।

अष्टाध्यायीव्याकरणे समुपन्यस्तविषयाणां संक्षिप्तविवरणं निम्नरीत्या प्रतिपादितम्, यथा –

| **अध्यायः** | **विषयाः** |
|---|---|
| प्रथमः | संज्ञा, परिभाषा, लादेशाः, आत्मनेपदम्, परस्मैपदम् । |
| द्वितीयः | समासः, कारकबिभक्तिः, लुक् । |
| तृतीयः | प्रत्ययाः, सनान्तादि धातुसंज्ञाः, विकरणम्, कृत्, तिङ्। |
| चतुर्थः | स्वादयः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाः । |
| पञ्चमः | तद्धितप्रत्ययाः, समासान्तविधिः । |
| षष्ठः | द्विरुक्तिः, सम्प्रसारणम्, प्रकृतिभावः, स्वरसूत्राणि, अलुक् समासः, आदेशः, आगमः, अङ्गाधिकारः, आर्धधातुकसार्वधातुकविधयः । |
| सप्तमः | अङ्गाधिकारः, वृद्धिः, इट्, आदेशाः, ह्रस्वविधयः, अभ्यासविधयः । |
| अष्टमः | द्विरुक्तिः, असिद्धः, निष्ठादेशः, रुत्वम्, णत्वम्, द्वित्वम् । |

शब्दानुशासनं हि व्याकरणस्य मौलिकं तथा निर्विशेषं लक्ष्यम्, एतद् परमार्थस्वरूपं शब्दव्रह्मरूपं यतः सर्वपदार्थेषु वैयाकरणानामेषा हि ब्रह्मवुद्धिरखण्डार्थवाग्विषये निहिता विद्यते । पदपदार्थवाक्यार्थमर्यादया शास्त्रार्थ ध्यानवन्तः शाब्दिकाः साधुशब्दप्रयोगैः लव्धान्तःकरणशुद्धाः सन्तः परं सौख्यं विदन्ति ।

शब्दानां चतुष्टयी प्रवृत्तिः 'ऋलृक्'[26] सूत्रे भाष्ये भाष्यकृता प्रत्यपादि। यथा- जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यद्दच्छाशब्दाः। (ऋलुक् प्रत्याहाराह्निकम्) तत्र युधिष्ठिरमीमांसकमते यद्दच्छाशब्दः संस्कृतभाषायाः अङ्गं नास्ति। अयं यद्दच्छाशब्दः संस्कृतभाषायामुत्तरकाले प्रविष्टः संजातः। अयं तु संस्कृतस्य मूलशब्दः न भवति। अतः केषांचित् वैयाकरणानां दृष्ट्या प्राचीनपरम्परानुसारं यद्दच्छाशब्दम् अविगणज्य जाति-गुण-क्रियारूपेण शब्दत्रयमेव स्वीकुर्वन्ति। पाणिनीयशब्दानुशासनानुसारं वस्तुतः शब्दस्य त्रयो भेदाः लक्ष्यन्ते, यथा-नाम, आख्यातम्, अव्ययम् । यास्कः तथा प्राचीनवैयाकरणानां मते तु शब्दस्य भेदः चतुर्धा

इति विचार्यते, यथा नाम, आख्यातम्, उपसर्गः, निपातः इति । तच्च महाभाष्ये स्पष्टीकृतम् चत्वारि पदजातानि- नामाख्यातोपसर्गनिपाताश्च।। (निरुक्तः) चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च[27]।।

**२. धातुपाठः -**

वेदस्य षडङ्गेषु व्याकरणमन्तर्गतत्वात् पाणिनिव्याकरणस्यैव वेदाङ्गत्वं शाब्दिकैः विनिश्चितम्। दधाति - शब्दस्वरूपं यः स धातुः, सकलशब्दमूलभूतश्च धातुः। प्रातिपदिकमेव नामाख्याताव्ययानां मौलिकं रूपम्। तत्र पदं पदं प्रति प्रतिपदम्, प्रतिपदे भवं प्रातिपदिकम्। इयं प्रातिपदिकसंज्ञा महतीसंज्ञा/महासंज्ञा च उच्यते। 'सर्वा महतीसंज्ञा अन्वर्थाः' इति वचनात् प्रातिपदिकसंज्ञा अन्वर्थसंज्ञा च भवति। युधिष्ठिरमीमांसकमते एकाक्षरादारभ्य यावत्यः महतीसंज्ञाः सन्ति, तत् सर्वमन्वर्थसंज्ञाः भवन्ति। किन्तु एका एव नदीसंज्ञा विद्यते। या महतीसंज्ञा भूत्वापि अन्वर्थसंज्ञा न भवति। यतः पूर्वाचार्यैः स्त्रीलिङ्गदीर्घ ईकारान्तशब्दानां यः समूहः पठितः, तत्र नदीशब्दस्य पाठ आदौ विहितः।

पाणिनीयतन्त्रे धातुपाठस्य विधिः द्विधा प्रवर्त्तितः, यथा लघुपाठः, वृद्धपाठश्च। अर्थनिर्देशसहितविहितपाठः वृद्धपाठः, अर्थं विना विहितधातुपाठः लघुपाठः इति। युधिष्ठिरमीमांसकदृष्ट्या लघुपाठस्तु वार्त्तिकपाठस्याश्रयभूतः विद्यते । तत्र परिमाणग्रहणं च[28] इत्यत्र धातुपाठस्य अर्थरहितलघुपाठः स्वीकृतः। पुनश्च एकाचोपदेशेऽनुदात्तात्[29] इत्यत्र उपदेशे य एकाच् धातुरनुदात्तश्च तस्मादिडागमो न भवति। अत्र इडागमप्रतिषेधाय विहितः अच् धातोः निर्देशः अर्थयुक्तवृद्धपाठत्वात् सूत्रमाश्रयते। अष्टाध्यायां वृद्धपाठस्य त्रिविधत्वमस्ति, यथा- प्राच्यम्, उदीच्यम्, दाक्षिणात्यं च ।

पाणिनीयव्याकरणे प्रवर्त्तितः धातुपाठः सायणाचार्य-भट्टोजिदीक्षिताभ्यां सुपरिष्कृतः। यत्तु पाणिनिः प्रवर्त्तितः मन्यते। धातुपाठस्य परम्परा पाणिनेः पूर्वमपि आसीत्। पाणिनिसहितं परवर्त्तिनि कालेऽपि दृश्यते। पाणिनिप्रणीतधातुपाठे १९४३ धातूनां परिगणनं विद्यते। धातूनां विभागः परस्मैपदम्, आत्मनेपदम्, उभयपदमिति रीत्या त्रिधा विहितः। तथा च सकर्मकाकर्मकत्वेन विभागद्वयं धातुषु परिलक्ष्यते। दिनबन्धुनामधेय विद्वान् धातुपाठस्य लक्ष्यं कर्त्तरि, कर्मणि, भावे प्रयुज्यमानतिङन्तक्रिया इति प्रकारान्तरेण वाचयन्ति। तद्यथा[30]- Tińanta words denote action and can be subdivided into three classes under syntactic considerations. These divisions are kartari, karmani, and bhāve. Verbs that denote active sense belong to the forst group, while those conveying passive sense belong to the second category. Intransitive verbs denote bhāva state in impersonal passive.

अष्टाध्यायीतृतीयपादे लकारविषयाः प्रकीर्त्तिताः। लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ, लिङ् (आशार्लिङ, विधिलिङ्), लुङ, लृङ् (सार्वधातुकलेट्, आर्धधातुकलेट्) एते सार्वधातुकार्धधातुकभेदे द्विविधा।

सार्वधातुकलकाराः- लट्, लोट्, लङ, विधिलिङ्, सार्वधातुकलेट् इति पञ्चविधः।

आर्धधातुकलकाराः- लिट्, लट्, लिट्, आशीर्लिङ, लुङ्, लृङ्, आर्धधातुकलेट् इति सप्तविधः। लकारार्थः - लः कर्मणि च भावे चाकर्मकेभ्यः[31] लकाराः सकर्मकेभ्यः धातुभ्यः कर्त्तरि, कर्मणि अर्थे तथा अकर्मकेभ्यः धातुभ्यः कर्त्तरि भावे चार्थे भवन्ति।

कत्रर्थे लकारः - देवदत्तः वेदं पठति। कर्मार्थ लकारः मया वेदः पठ्यते। भावार्थे लकारः - तेन शय्यते।

इत्संज्ञा सूत्राणि - [32]उपदेशेऽजनुनासिक इत्, [33]हलन्त्यम्, [34]न बिभक्तौ तुस्माः, [35]आदिर्ञिटुडवः, [36]षः प्रत्ययस्य, [37]चुटु, [38]लशक्वतद्धिते ।

**३. गणपाठः-**

पाणिनीय तन्त्रे गणपाठस्य स्थानं तृतीयं भवति। तत्र गण-संख्याने धातोः गण्यते गणयति इति कर्मणि अप्, कर्त्तरि अच् प्रत्यये वा गणपदं निष्पद्यते। यस्यार्थः गणना गणनं च । प्रक्रमेण पठितशब्दाः गणशब्देन परिचीयन्ते। पाणिनेः पूर्वमपि केचन आचार्याः गणपाठं सम्पादितवन्तः। तेषु भागुरिः (४००० वि.पूर्व), शान्तनु (३००० वि. पूर्व), काशकृत्स्नः (३००० वि.पूर्व), आपिशलिः (२९०० वि.पू) इति एते प्रमुखा आसन्। पाणिनेः गणपाठः शब्दानुशासने महदुपकारकः विद्यते। गणानां भेदद्वयं प्रामाण्यमावहति। तत्र प्रथमभेदः नियमितगणः, यत्र शब्दाः प्रक्रमेण विद्यन्ते। तत्र यावन्तः शब्दाः सन्ति तैरेव गणकार्य विधीयते। यथा “सर्वादीनि सर्वनामानि ”[39] “प्रादयः”[40], “अजाद्यतष्टाप्”[41]। अत्र अजादिगण इत्यादयः। द्वितीयभेदः आकृतिगणः। यत्र क्रमवद्धसंख्यानामपेक्षा न विद्यते। यथा “चादयोऽसत्वे”[42] “साक्षात्प्रभृतीनि च”[43] इति।

**४. उणादिपाठः-**

पाणिनिप्रणीतव्याकरणग्रन्थेषु उणादिसूत्राणामन्तर्भावत्त्वात् अत्र तत् विषयं किञ्चिदालोच्यते। उणादिसूत्राणां पार्थक्यस्य कारणं भवति यौगिकत्व रूढत्वविषयकमतभेदाः। परन्तु मतद्वयस्य समन्वयार्थम् उणादिपाठः प्रवर्त्तितः। उणादिप्रत्ययान्ताः संज्ञाशब्दाः भवन्ति। यतः “उणादयः वहुलम्”[44] इति सूत्रे भाष्ये - नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्। ....

वैयाकरणानां च शाकटायन आह धातुजं नामेति ।

भाष्यकारमते सर्वे वैयाकरणाः नामशब्दान् धातुजान् मन्यन्ते। पाणिनिदृष्ट्या रूढशब्दानां यौगिकत्वं नाम धातुजत्वः पक्षः समर्थितः। वैयाकरणानां दृष्ट्या प्रक्रियादशायां शब्दानां त्रैविध्यं स्वीकृतं यथा धातुजशब्दाः, अधातुजशब्दाः, नामजशब्दाः। तत्र धातुजशब्दोऽपि द्विविधः, यथा लिखति, पठति, धावति प्रभृति क्रियाशब्दाः। लेखकः पाठकः, धावकः प्रभृति नामशब्दाः। पुनः घट- पट-वृक्षादि नामशब्दाः । उपसर्गः, निपातः तथा अव्ययप्रभृतयः अधातुजशब्दाः।

**५. लिङ्गानुशासनम्-**

शब्दानुशासनस्य अङ्गत्वेन लिङ्गानुशासनं विनिश्चितम्। पाणिनेः प्रागपि लिङ्गानुशासनप्रवक्तार आसन्। तेषु व्याडिः प्रख्यात आसीत्। वामनाचार्यः स्वलिङ्गानुशासनकृतौ लिखितवान् - पूर्वाचार्यैः व्याडिप्रमुखैः लिङ्गानुशासनं सूत्रैरुक्तम्। ग्रन्थविस्तरेण च पाणिनिः शब्दानुशासनसहितं लिङ्गानुशासनस्य प्रवक्ता अपि आसीत्। लिङ्गानुशासनस्य प्रवर्त्तनम् आचार्यशान्तनुद्वारा विक्रमाव्द ३१०० पूर्व विहितम् । व्याडिना विक्रमाव्द २८५० पूर्वम्, पाणिनिना विक्रमाव्द २८०० पूर्व व्यवस्थापितं मन्यते ।

लिङ्गानुशासनस्य वृत्तिकाररूपेण रामचन्द्रः, भट्टोजिदीक्षितः, नारायणभट्टः, रामानन्दप्रभृतय आसन्। तेषु भट्टोजिदीक्षितः पाणिनीयलिङ्गानुशासनोपरि वृत्तिद्वयं लिखितवान्। एकावृत्तिः शब्दकौस्तुभान्तर्गता, द्वितीया तु सिद्धान्तकौमुद्या अन्तिमपर्याये इति। लिङ्गानुशासनं हि स्त्रीलिंग-पुंलिंग-नपुंसकलिंगविषयसहितं स्त्री- पुंसाधिकारस्तथा पुं-नपुंसकाधिकारसमुपेतं विद्यते। तत्र वररूचिनामकवैयाकरणेनापि लिंगानुशासनं प्रोक्तमासीत्। तथैव अमरसिंहेन अमरकोषस्य पञ्चमसर्गे लिंगानुशासनं संकलितम्। अतः लौकिकसंस्कृतभाषायाः पदानां लिंगानि अनुशासयितुं वहुभिराचायैः लिंगानुशासनं सम्पादितं व्याख्यातं च। अष्टाध्यायीसूत्राणां वर्गीकरणाय अनिर्ज्ञातार्थस्य यणादिकार्यस्य तद्घटितसाधुत्वस्य संज्ञापरिभाषाविधिनियमातिदेशाधिकारादि षड्भेदः पाणिनिना प्रकल्पितः। एतद् विहाय परिभाषा, विभाषा, निपातनप्रभृतिभेदान्तराणि अपि व्याकरणे समुपन्यस्तानि सन्ति।

१. संज्ञा-Technical rules
२. परिभाषा-Interpretive rules
३. विधिः- Operation rules
४. नियमः- Restriction rules
५. अतिदेशः- Extension rules
६. अधिकारः - Heading rules
७. प्रतिषेधः - Negative rule
८. विभाषा-Optical rules
९. निपातनम्-Adhoc rules

तत्र रामनाथशर्ममहोदयाः कथयन्ति[45] The Operational aspect of the Paniniyan derivative system focuses mainly on bases (Prakriti), affixes (pratyaya) and subsequent operations(Kārya).Bases from the primary input in the grammar. They are of two kinds, 'dhātu' 'verb root' and 'prātipadika' 'nominal stem' 'roots' and nominal stems are also two types, basic as well as derived.

**2. शब्दार्थप्रतिपत्तिः-**

शब्दार्थयोः सम्वन्धः नित्यः अनादिभूतश्चेति वैयाकरणानां सिद्धान्तः। शब्दस्य अर्थस्य च न कोऽपि कर्ता, नापि अभिनवः वक्ता इति सिद्धान्तमनुस्मृत्य मनीषिणः प्रतिपादनतत्परा इति शास्त्रानुसारं विधातुं शक्यते। तत्रादौ वाक्यपदीये[46]-

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।**

ऋग्वेदे [47]- यावद् ब्रह्म विष्ठितं तावती वाक्।
अथर्ववेदे च [48] - यामाहुर्वाच कवयो विराजम्।

सम्वन्धस्य न कर्ताऽस्ति शब्दानां लोकवेदयोः, शब्दवेदयो, शब्दैरेव हि शब्दानां सम्वन्धः स्यात् कृतः कथम्। यदस्तु शब्दस्य किमपि पारिभाषिकं निर्बचनं सूत्रात्मकभावेन आचायैः बहुधा प्रकटितम्।

**स्फोटात्मकः शब्दः-** अर्थवदधातुरप्रत्ययः प्रातिपदिकम् -अत्र सूत्रे प्रातिपदिकसंज्ञा विहिता अर्थविषयक-बोधजनकशब्दमुदिश्य इति स्फोटात्मकशब्दं विना शब्देऽर्थविषयकबोधजनकत्वरूपाशक्तेरभावात् सूत्रं व्यर्थं स्यात्।

**ध्वन्यात्मकः शब्दः** -शास्त्रप्रक्रियानिर्वाहाय ध्वन्यात्मकः शब्दः स्वीकृतः। अन्यथा इको यणचि इत्यादिसूत्रद्वारा ध्वनिविकृतिः न स्यात्। स्फोटात्मकः शब्दः सर्वथा नित्यः। यस्य षट्-विकाराभावत्वं शास्त्रैगम्यम्।

**पतञ्जलिदृष्ट्या शब्दः-** भगवता भाष्यकृता शब्दस्य स्वरूपविचारप्रसङ्गे शब्दस्य द्विविधं स्वरूपं प्रदर्शतम्। स्फोटात्मकम्, ध्वन्यात्मकञ्च। स्फोटात्मकशब्दस्य लक्षणं भवति- येनोच्चारितेन सास्नालांगुलककुदखुरविषणिनां संप्रत्ययो भवति स शब्दः। यद्यपि अत्र भाष्ये स्फोटस्योल्लेखो नास्ति तथापि उत्तरसूत्रभाष्यमेवात्र मानम्। ध्वन्यात्मकशब्दस्य लक्षणं तु प्रतीतपदार्थको लोके ध्वनिः शब्द इति। तद्यथा - शब्दं मा कुरु। मा शब्दं कार्षीति। अइउण् इति सूत्रभाष्ये श्रोतोपलब्धा शब्दस्याकाशदेशब्दत्वं प्रतिपादितं पतञ्जलिना। एवञ्च अशुतिरोधीयमाननेकवर्णवद्धटकल-शादिशब्दसम्भवदर्शनाय तस्य वुद्धिनिग्राह्यत्वमुक्म्। अनेन शब्दस्य स्फोटरुपत्वं धनितम्। यदि अवं स्यात् तर्हि सर्वदा शब्दोपलम्भः स्यात्। अतः प्रयोगेणाभिज्वलितः शब्दः इत्युप्युक्तम्। प्रयुज्यत इति प्रयोगः ध्वनिः (वर्णः)। तेनाभिव्यक्तो भवति। एवञ्च तत्परस्तत्कालस्येति सूत्रे भाष्ये स्फोटः शब्दः ध्वनिः शब्दगुण इति प्रतिपादितम्। ततश्च इयं कारिकाऽपि तत्रैव वर्त्तते।

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु लक्ष्यते।**
**अल्पो महोश्च केषांचिदुभयं तत्स्वभावतः।।** इति

**भर्तृहरिमतेन शब्दः-** वाक्यपदीयकृता भर्तृहरिणा द्विविधः शब्दः स्वीकृतः। उपादानः अनुपादानश्च। शब्दपदाभिधेयाः रामगोविन्दादयो घटपटादयश्च शब्दाः वर्त्तन्ते। एवञ्च शब्दपदाभिधेयाः नदीनिर्झराणां मणिनूपुराणां वीणामृदंगानां शब्दाः सन्ति। एतेषु नद्यादीनां शब्देषु व्याकरणप्रवृत्तिर्न स्यात् अत एते शब्दाः

व्याकरणप्रक्रियायां नोपादीयन्ते। अतस्तेषामनुपादानत्वं सिध्यति। तद् भिन्नानां व्याकरणप्रक्रियायामुपादेयमानानाञ्चोपादानत्वम्। अत्र उपादीयते येनार्थः तत् उपादानम् इतिव्युत्पत्ति कर्तुं न शक्यते। यतो हि व्यवहारे अर्थोपादानं द्विधा क्रियते संकेतैः, शब्दैश्च। संकेताः द्विविधाः। क्रियारूपाः उल्लिखिताश्च। हस्तसञ्चालनेन आगमनप्रत्यागमनाद्यर्थ वुध्यते, लिप्यादिना सर्वोऽप्यर्थः प्रकटीक्रियते।

व्याकरणशास्त्रे शब्दाः व्युत्पन्नाः शब्दाः अव्युत्पन्नाः इति पक्षद्वयं दृश्यते। तत्राव्युत्पत्तिपक्षे एव उपादानशब्दस्येय व्युत्पत्तिः। व्युत्पत्तिपक्षे तु स्वरुपेऽध्यारोपणसम्वभवः। अस्मिन् पक्षे उपादीयते योऽर्थप्रतिपत्तये स उपादानः। उपादाने वपि द्वौ भवतः । निमित्तशब्दः, प्रत्यायकशब्दः। तत्र द्वयोर्मध्य एकः स्फोटरुप शब्दो यः श्रुतिरूपाणां वैखरीशब्दानां निमित्तम्। अपरश्च वैखरीरूपः शब्दो योऽर्थवोधनाय प्रयुज्यते। अनयोः व्यंग्यव्यञ्जकभावसम्वन्धो विद्यते। अतः भर्तृहरिणाऽपि धन्वात्मक इति द्विविधः शब्दः स्वीकृतः । तत्र स्फोटो नित्यत्वेन कालिकयोगादभिन्नकालः। चिरक्षिप्रादिना कालभेदेन न भिद्यते। तथापि स्वाभिव्यजनकध्वनिकालमनुपतति। ध्वनिसंसृष्टमेव स्फोटस्वरुपमनुपलभ्यते। अतो ध्वन्युपलब्धिकालः स्फोटोपलब्धिकाल इव गृह्यते।

ध्वनिरपि द्विविधः। प्राकृतो वैकृतश्च। तत्र प्राकृतो स्वाभाविकः वैकृतस्तु कारणान्तरैः प्रकृत्यव्यवस्थायाः विकृतिं प्राप्तम्। स्फोटरुपस्य शब्दस्योपलब्धौ यो ध्वनिहेतुः स प्राकृतो ध्वनिः। अर्थात् येन ध्वनिना प्राथम्येन स्फोटोपलब्धिर्भवति स प्राकृतो ध्वनिः। येन चोपलब्धोऽपि स प्रचितरकालं यावदुपलभ्यते स वैकृतो ध्वनिः। स्फोटाभिव्यक्तेरन्तरं श्रुयमाणा विकृता ध्वनयो द्रुतादिवृत्तीनां भेदं केवलं जनयति, न स्फोटभेदं स्फोटात्मा शब्द एक एव भवति। परन्तु ध्वनिभेदादनके इव प्रतिभान्ति।

स्फोटाभिव्यक्तौ ध्वनिग्हणविषये मतत्रयं भर्तृहरिणा प्रदर्शितम्। तत्र स्फोटाभिव्यक्तौ ध्वनिः स्फोटादविभक्तः संसृष्ट एव गृह्यते। यथा जपाकुसुमलौहित्याविभागेन स्फुटकादीनां ग्रहणं भवति, तथैव स्फोटरुपाविभागेन ध्वनेर्गहणमिष्यते। स्फोटात् पृथक् प्रतीतिः ध्वनेः न भवतीत्येकं मतम्। स्फोटाभिव्यक्तौ ध्वनिरसंवेद्यः। यथा इन्द्रियाणि विषयोपलब्धिकाले इन्द्रियत्वेन स्वरुपेण न गृह्यन्ते, अपि तु विषयाकारे एव लीनानि भूत्वा विषयस्वरुपेण बोध्यन्ते, तथैव ध्वनिरपि स्फोटाकारे विलीन एव गृह्यते। ध्वनेः पृथक् संवित् न भवतीति द्वितीयं मतम्। स्फोटाभिव्यक्तौ ध्वनिः स्वतन्त्र एव प्रकल्पितः। दूरात् श्रुयमाणे ध्वनौ स्फोटाभावेऽपि कोलाहलरूपेण निनादेन ध्वनिः गृह्यते। तेन ध्वनिः स्वतन्त्र इति सिद्धयतीति तृतीयं मतम्। भर्तृहरिमते तु स्फोटरुपाविभागेन ध्वनेग्रहणं भवति। परन्तु कारिकायाम् इष्यते इति पदोपादानेन सूच्यते।

**कैयटसिद्धान्ते शब्दः -** तस्य सतेऽपि शब्दो द्विविधः। ध्वनिः व्यञ्जकत्वेन स्फोटो व्यङ्ग्य त्वेन च तपरः तत्कालस्येति सूत्रस्य व्याख्यावसरे प्रदीपे लिखितमस्ति। स्फोटो नादाभिव्यङ्ग्यो वाचकः इति शब्दस्वरूपव्याख्याप्रसङ्गे प्रदीपे वर्णतम्।

**नागेशदिशा शब्दः-** ध्वन्यात्मकं, स्फोटात्मकञ्ज द्विविध शब्दस्वरुपं नागेशेन स्वीकृतम्। तस्य मते लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रीत्रेन्द्रिय ग्राह्यत्वाद् वर्णरूपध्वनिसमूहः शब्दः। तस्यार्थबोधकतादिविचारतरमणीयस्यैव लोके प्रसिद्धा। तादृशस्यैव शास्त्रेणान्वाख्यानमिति तात्पर्यम्। ध्वनिपदेनात्र वैखर्य्याः ग्रहणं भवति। स्फोटपेनाभिव्यक्तादिको मध्यमावस्थ आन्तरः शब्द उच्यते इति उद्योते प्रातिपदितम्। तपर तत्कालस्येति सूत्रभाष्ये स्फोटः शब्दः, ध्वनिस्तु शब्दगुणः इति लिखितमस्ति। तस्य व्याख्यावसरे नागेशेन आशंकितं यत् ध्वनिरपि शब्दविशेष एव स कथं शब्दगुण इति। तदुपरि उच्यते व्यञ्जकत्वेन ध्वनिः शब्दस्य गुणः। अत्र भाष्ये ध्वनिशब्देन वैकृतध्वनिः वर्णाश्च गृह्यन्ते।

पदसाधुत्वसंपादानार्थं पाणिनीयं व्याकरणं सूत्रात्मकव्याकरणेषु अनुपमम् उपन्यस्तम्। ऐन्द्रव्याकरणादारभ्य इयं परम्परा शब्दजगति प्रथिता विद्यते। विभिन्नेषु उपादानेषु अद्यत्वे तत् पाणिनीयं सर्वोपकारकमिति शास्त्रकाराः निगदन्ति। “पाणिनीयं काणादकं व सर्वोशास्त्रोपकारकम्”।

**3. अष्टाध्यायीसंघटने सूत्रशैलीवैचित्र्यम्-** भारतसंस्कृतवाङ्मये ब्रह्मसूत्र-न्यायसूत्र-योगसूत्र-मीमांसासूत्र-प्रभृतिशास्त्राणि सूत्रात्मकशैल्या समुपवृंहितानि विद्यन्ते। विदुषी अम्वा कुलकमी-महोदया स्वमतं पोषयन्ती व्रवीति- The period in the Indian history when Panini compiled as Aṣṭādhyāyī is characterized by a sūtra style composition. Several texts such as Brahmasūtra, Pigala's Chandaśastra, Gautama's Nyāyasūtra, Patañjali's Yogasūtra, Kānāda's Vaisesikasūtra and Jaimini's Mimasāsūtra were composed in sūtra style [49].

अष्टाध्यायीसन्नद्धसूत्रशब्दस्य निर्वचनं सुश्रुतसंहितायां दृश्यते, यथा- [50]सूचनात् सूत्रणाच्चैव...... सूत्रस्थानं प्रचक्षते। पुनश्च कातन्त्रवृत्तौ[51] उल्लिखितम्- सूचयति सूत्रे सूत्रयति वा सूत्रम्। वाक्यानामन्वाख्यानं पदानामन्वाख्यानं वेति उपलक्ष्य अष्टाध्याय्याः संघटनं संभृतमिति तर्कयितुं न शक्यते। यतो हि संपूर्णायारष्टाध्याय्याः पाठादनन्तरं पदसाधुत्वविषये सम्यक्तया अवबोधनं जायत इति वैचित्र्यात्। इदं पदं साधुरिति न कुत्रचित् उपदिष्टम्। केवलमाचार्याणामलक्ष्यं इत्येव भाष्यकारः प्रस्तौति। साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः इति वचनात् लोके प्रयोगार्हभूतस्य शब्दस्य साधुत्वा न्वाख्यानमित्यत्र लक्ष्यम्। स च प्रयोगकालेन यादृशः भवति लोकसम्मतः तादृशः संघटनप्रकारः हि आचार्येण विधीयते। यस्मिन् क्रमे पाणिनीयसूत्रमादाय भाष्यकारः व्याख्यानदशायां नूतनमपि प्रस्तौति। तद् 52 यथा-लटः शतृशानचौ अप्रथमा समानाधिकरणे अप्रथमान्तसमानाधिकरणे ईमौ प्रत्ययौ। उदाहरणं-देवदत्त अन्नं पचमान इति पतञ्जलिः - अप्रथमा समानाधिकरणे नित्यौ शतृशानचौ यथा स्याताम्। प्रथमा समानाधिकरणे पचन् पचतीति धान्यविक्रीः धान्य- वि-क्री-धान्यं विक्रीणाति इति इति विग्रहे ‘कर्मणीनिः वि-क्रयः’[53] इति सूत्रेण इनिप्रत्यये धान्य-विक्रीः। पतञ्जलिना वार्त्तिककृता अयं नेष्टः। यतो हि वार्त्तिककृता कर्मणि कुत्सितौ सूत्रे अपि शब्दोऽयं न प्रयुक्तः। अतः पाणिनिकाले एवंविधः प्रयोगः ततः अधिकं कुत्सिते कर्मणि उपपदेऽयं

प्रयोगः सोमविक्रीः इति। धान्य-विक्रीः इति प्रयोगः नेष्टः। पतञ्जलिना उक्तम् इह मा भूत्। धान्यविक्राय इति। कर्मण्यण् इति अण्प्रत्यय इष्टः। धान्यविक्रीः प्रयोगार्थं तत्र णिप्रयोगः न तु णिनि इति तात्पर्यम्। अवधीयते पाणिनिना अयं प्रयोगः इष्टः। कात्यायनेन पतञ्जलिना चायं प्रयोगः नेष्टः। एवमनेके प्रयोगाः सन्ति यत्र पाणिनिना स्वीकृताः कात्यायनेन न स्वीकृताः पतञ्जलिना च नानुमोदिताः। प्रथितमर्थमादाय प्रयोगं चानुसृत्य सूत्रादीनि आचायैः निर्मीयन्ते।

भाष्यकृता[54]- यत् लोके अर्थमुपादाय शब्दान् प्रयुंजते तेषां निवृत्तौ यत्नं कुर्वन्ति तद्यथा-घटेन कार्यं करिष्यन्-कुम्भकारकुलं गत्वा कुरू घटं कार्यमनेन करिष्यामीति। हरिदीक्षितेन[55] उक्तम्-न हि अविद्यमानायाः शक्तेः एकशेषशास्त्रसहस्त्रेणाऽपि प्रतिपादयितुं शास्त्रेऽशक्यत्वात् तथाहि-

[56]यथा लक्षणम् अप्रयुक्ते- भाष्यकारः

[57]नैव लक्षणमप्रयुक्ते प्रवर्त्तते प्रयुक्तानामेव लक्षणेनान्वाख्यानात् – कैयटः

[58]अप्रयुक्ते लक्षणाभावस्यैव योग्यता न तु लक्षणस्य इति-नागेशः

[59]सदन्वाख्यानात् शास्त्रस्य-वार्त्तिककारः

[60]शब्दैरर्थाभिधाने स्वाभाविकम्। न पारिभाषिकमशक्यत्वात् लोकतः एवार्थगतः काशिकाकारः।

[61]स्वभावत एतेषां शब्दानां एतेषु अर्थेषु अभिनिविष्टानां निमित्तत्वेन अन्वाख्यानं क्रियते भाष्यकारः।

[62]वृद्धव्यवहारादेव शब्दार्थसम्वन्धव्युत्पत्तिमनिच्छताऽपि युक्तिवशात् इष्टव्य इत्यर्थः- कैयटः

**परनित्यान्तरंगापवादादिभावेन सूत्राणां संकलनम्-**

प्रक्रियायामिदमपि प्रतीयते यत् एकस्य लक्ष्यस्य साधनार्थं सूत्रप्रवृत्तेः कारणस्य समत्वात् अनेकेषां सूत्राणां प्रवर्त्तनमभिलष्यते येन प्रयोगस्य विभिन्नतामादाय अभीष्टस्य रूपस्यापत्तिः नायाति। पर्यन्यवत्-लक्षणस्य प्रवृत्तिः इति सूत्रप्रवृत्तौ लक्षीक्रियते। तद्वारणाय यत्नः अपेक्षते इति धिया अनेकविधिषु उपायेषु परनित्यायुकल्पनमादाय सूत्राणामुपस्थापनं खलु वैचित्र्यम्। यत्र परनित्यान्तरंगापवादानामुत्तरोत्तरबलीयः इति धिया सूत्रप्रवृत्तौ वलवत्वं साधितं दृश्यते। अष्टाध्यायीप्रतिपादनसूत्रक्रममादाय एषा व्यवस्थिता इति।

**अनुवृत्तेराश्रयणम्-**

प्रयोजनं विनाऽपि एकस्य पदस्य असकृत् उच्चारणं न कृतमिति कीर्त्तः अस्याः वैशिष्ट्यम्। तस्य पदस्य सूत्रेषु उपस्थितिः येन यथा साध्येते स अनुवृत्तिभावेन व्यवह्रियते। तदुक्तं दीक्षितेन सूत्रेषु अदृष्टं पदं मूत्रान्तरात् अनुवर्त्तनीयं सर्वत्र। इयमनुवृत्तिः चतुर्धा- १. एकदेशानुवृत्तिः २. धारावाहिकन्यायानुवृत्तिः ३. संपूर्णः सूत्रानुवृत्तिः ४. मण्डुकप्लुत्यानुवृत्तिरिति ।

क्वचित् संपूर्णस्य सूत्रस्य सूत्रैकदेशस्य च एतत् अनुवृत्या सोध्यते। क्वचित् एकदेशोऽपि अनुवर्त्तते। इति परिभाषानुसारं सूत्रैकदेशस्य अनुवृत्तिः, पुनः प्रसङ्ग यावत् प्रचलति। जलधाराप्रवाहवत् बहुषु सूत्रेषु यत्र पदस्य पदानां वा एपस्थितिः प्रतिपाद्यते। सा धारावाहिकनदयायानुवृत्तिः एवं च तत्र एकयोगनिर्दिष्टानां सहैवप्रवृत्तिः सहैवनिवृत्तिः। इति भावेन संपूर्णस्य सूत्रस्य सूत्रान्तरेषु उपस्थितिर्जायते। सा संपूर्णः सूत्रानुवृत्तिः।

**अधिकारसंयोजनम्-**

तुल्यजातीयानां कार्याणां एकत्रोपन्यासे सूत्रकृतां सूत्रसंघटने वैशिष्ट्यम्। एतत् कृते विषयस्य निमित्तस्य विधानस्य च अपेक्षा वर्त्तते। इदं तु प्रागेव विषयीकृतम्। षड्विधेषु सप्तविधेषु सर्वाणि सूत्राणि विध्युपकारकाणि इति। अतत्र कुत्रचित् विषयस्य विधानस्य निमित्तस्योपन्यास आवश्यकः इति प्रतिपत्तौ लाघवमुपायमुपन्यस्य एकत्र तस्य पाठोपकल्पनपुरस्सरं सूत्रान्तरेषु तदुपस्थितिः प्रतिपाद्यते। एवंभूतः व्यवहारः अष्टाध्याय्यामधिकारत्वेन निगद्यते। प्रायश एतानि अधिकारसूत्राणि समधिगतानि सन्ति। अधिकारपरिभाषयोः सर्वथा भेद इति प्रतिपाद्यते महाभाष्ये पतञ्जलिना। तदुक्तत्या[63] अधिकारः प्रतियोगं तस्य निर्देशार्था इति योगे योगे उपतिष्ठतो परिभाषा पुनरेकदेशस्थामपि सर्वशास्त्रमभिज्वलयति प्रदीपवत्। शब्दकौस्तुभे[64] इदमपि परिष्कृतं यत्-अधिकारः एकत्रोपपत्तस्य, अन्यत्र व्यापारोऽधिकारः।

**असिद्धत्वोपकल्पनम्-**

कार्यविधानानन्तरं प्रक्रियायां पुनश्च कस्यचित् विधेः प्रवर्त्तनार्थं निमित्तस्य विषयस्य वा अवस्थापनमस्तीति प्रतीतौ सूत्रस्य नूतनविधिविधानदिशा प्रवर्त्तनं भवति चेत् अनिष्टरूपापत्तिः स्यात् इति विचारं मनसि निधाय सूत्रस्य प्रवर्त्तनं यथा न स्यात् तदर्थं विशिष्टोपायः उपपादितः। स खलु असिद्धत्वोपकल्पवम् नाम्ना विषयी क्रियते। पाणिनीयतन्त्रे [65]'पूर्वत्रासिद्धम्' [66]'असिद्धवदत्राभावात्' 'षत्वोतुकरोसिद्ध'[67] इति भावेन सूत्रत्रयमुपदिष्टम्। सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा। त्रिपाद्यप्पि पूर्व प्रति परशास्त्रमसिद्धमिति प्रथमस्य तात्पर्यम्। आभीयाधिकारे समानाश्रये तस्मिन् कर्त्तव्ये तदसिद्धं स्यादिति द्वितीयार्थः। षत्वे तुकि च कर्त्तव्ये एकदेशशास्त्रमसिद्धं स्यात् इत्यर्थ तृतीयस्य षष्ठाध्यायादारभ्य अष्टमाध्यायं यावत् असिद्धकल्पनं संपादितमिति तदीयं वैचित्र्यम्। अथर्वप्रातिशाख्ये तैत्तिरीयप्रातिशाख्येऽपि सूत्राणि उपलभ्यन्ते येषामनुकरणं पाणिनिना विहितम्, तथाहि-

| **अथर्वप्रातिशाख्यसूत्राणि** | **पाणिनिसूत्राणि** |
|---|---|
| समर्थः पदविधिः[68] | समर्थः पदविधिः[69] |
| इकारउकारौ च सप्तम्यर्थे[70] | इद्वतौ च सप्तम्यर्थे [71] |

| | |
|---|---|
| वर्णात् इत्यन्तात् पूर्वमुपधा[72] | अलोऽन्त्यात् पूर्वमुपधा[73] |
| **तैत्तिरीयप्रातिशाख्यसूत्राणि** | **पाणिनिसूत्राणि** |
| आद्यन्तवच्च[74] | अन्ता दिवच्च[75] |
| एकवर्णः पदम् [76] | सुप् तिङन्तं पदम्[77] |
| स अपृक्तसंज्ञः[78] | अपृक्त एकाल्प्रत्ययः[79] |

**बहुवचननिर्देश-** सूत्रेषु बहुत्र बहुवचननिर्देशोऽपि प्रतीयते। यत्र सूत्रार्थप्रतिपादनाय विभिन्नार्थः द्योतते। तद्यथा गुरुत्वज्ञापनार्थ बहुवचनं पर्यायग्रहणार्थ-अनुक्तार्थज्ञापनार्थ-अर्थग्रहणार्थ गणनिर्देशार्थम् इति।

**निपातनसूत्रसंघटनम् -** भाष्यकृता उक्तम् यदिहं लक्ष्येनानुपपन्नं तत् सर्वं निपातनात् सिद्धम्। अपि च- अन्यथा प्राप्तस्य अन्यथा उच्चारणं निपातनम्। कैयटेन प्रदीपे उक्तम् विधिनिपातनयोरयं भेदः यत्र अवयवाः निर्दिश्यन्ते समुदायः अनुमीयते सो विधिः। यत्र तु समुदायः श्रूयते अवयवश्चानुमीयते तद् निपातनम्। प्रत्ययागमादेशादिभावेन वहुविषयकं निपातनम्।

**उपसंहारः –**

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गः प्राहुर्व्याकरणं बुधाः[80]।।**

सत्सु अपि वहुषु व्याकरणेषु पाणिनिवाकरणस्य एव वेदाङ्गत्वमिति नागेशेनोपपादितं शब्देन्दुशेखरे पराशरोपपुराणे च एतत् प्रकटितम्।

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**
**सर्वोपकारकं ग्राह्यं कुत्स्नं त्याज्यं न किञ्चन[81]।।**

पाणिनेरष्टाधायीमाश्रित्य कात्यानवार्तिकं चोपजीव्य महर्षिपतंजलिः वैदुष्यपूर्ण महाभाष्यं विरच्य सुचिरं ख्यातिं लेभे। पाणिनीयव्याकरणे सूत्रवार्त्तिकभाष्याणां प्रामाणिकत्वं सर्वैः सार्वजनीनसिद्धान्तरूपेण गृहीतम्। वोधजनकत्वरूपयोग्यतामाश्रित्य पदपदार्थयोस्तादात्म्यं सूत्रभाष्यादिसम्मतमेव, तथाहि- पदपदार्थयोस्तादात्म्यस्वीकारे महाभाष्यकृता "सरूपाणामेकशेष एकविभक्तौ"[82] सूत्रे भाष्ये व्याख्यातम्- एकविभक्तिरिति किमर्थम् ? तत्र वार्त्तिकं - "प्रत्यर्थं शब्दनिवेशात् नैकेनानेकस्याभिधानम्" अस्यार्थस्तु प्रत्यर्थ शब्दा अभिनिविशन्ते, किमिदं प्रत्यर्थमिति ? अर्थमर्थं प्रत्यर्थकम् । प्रत्यर्थं शब्दनिवेशात् एतस्मात् कारणात् नैकेनशब्देन अनेकस्यार्थस्य अभिधानं प्राप्नोति। पुनः भाष्यवार्त्तिकं यथा- "तत्रानेकार्थाभिधानेन एकशब्दत्वम्"। "एकः पूर्वपरयो"[83] सूत्रे च भाष्यकारः वार्त्तिकमुपस्थापयति "एकवचनं

पृथगादेशप्रतिषेधार्थम्” अर्थात्- एकवचनं क्रियते। एक आदेशः यथा स्यात्। पृथगादेशो मा भूदिति। “अनुदात्तं पदमेकवर्जम्”[84] अत्र पदे येषामुदात्तप्रसङ्गेऽनुदात्तं भवति। तत्र एकं पदं वर्जयित्वा नाम एकमचं वर्जयित्वा भवतीति, “हलोऽनन्तराः संयोगे”[85] सूत्रे भाष्ये- ग्रामशब्दोऽयं वह्वर्थः।

पाणिनीयसूत्राणि दृग्पथे समीक्ष्य विस्तरभिया अष्टाध्याय्या आन्वीक्षिकी इति विषयं समाश्रित्य मदीयं प्रेक्षणं समाम्नातम्। तत्र पदसाधुत्वलक्षणनिबन्धनप्रमाणभूतशास्त्रस्वरूपं पाणिनीयव्याकरणं सुधीवराणां सर्वोपकारमिति सुविदितम्। चतुर्दशसूत्रसमुदायमुपजीव्य मण्डितानां पाणिनेरल्पाक्षराणां सूत्राणां समीक्षा कात्यायनकृतवार्त्तिकं तथा पातञ्जलमहाभाष्यमन्तरा नैव पूर्णायते। वार्त्तिकभाष्योपनिबद्धः सूत्रजालं भट्टोजीदीक्षित-नागेश- जयादित्यवामन-कौण्डभट्टप्रभृतिभिः शाब्दिकैः स्वस्वव्याख्यानपटलैः भूषितम्। येन सर्वार्थसाधिका तत्वतः प्रतिपन्ना पाणिन्युपनिबद्धाष्टाध्यायी सुचिरं विद्वद्भिः वन्दनीया भूयात्।

## पादटीकाः

1.ऋ.४/५८/३ 2. म.भा.पस्प 3. नि.१३-२ 4. काव्यादर्श-१/४ 5. वा.प-१/२४ .पा.शि.श्लो-४१,४२ 7. The grammar that we have now is Panini grammar. It has eight chapters, so it is called Aṣṭādhyāyī It was directly graced by God Shiv. The True History and the Religion of India-Swami Prakasananda Sarma. 8. प्रमाणभूता आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयन्ति स्म। म.भा-१-१-१ 9.वा.प-१२० 10. महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य 'उदक् च विपाशः ४-२-७४' 11. काशिका-प्रथमो भागः 12. वा.प-१/१४२ 13. सर्ववेदपारिषदं हीदं शास्त्रम् इति पूर्वापरप्रथम..... २-१-५८ इति सूत्रे भाष्ये। 14. संस्कृत व्याकरणशास्त्र का इतिहास-१ म भाग-युधिष्ठिरमीमांसकः 15. म.भा-पस्पश् 16. म.भा-२-१-१ 17. अष्टिका- पाणिनीयाष्टाध्यायी- बालमनोरमा-भाग-१ 18. काशिका-२-४-२१ 19. दण्डनाथ-वृत्ति-३-३-१२६ 20. अकालकमिति कालपरिभाषारहितमित्यर्थः न्यास-४-३-१५५ 21. कालोपसर्जनने च तुल्यम्-१-२-५७- 22. संस्कृत व्याकरणशास्त्र का इतिहास-युधिष्ठिरमीमांसकः 23. म.भा.१-३-१ 24.पा.सू-२-१-५१ 25.पा.सू-४-१-२१ 27.पा.सू-२ 27. महाभाष्य-अ. १-पा.१-आ.१ 28. महाभाष्यम्-१-३-१ 29.पा.सू-७-२-१० 30. Paninian Studies - Prof. S. D. Joshi Felicitation Volume 31.पा. सू-३-४-६९ 32.पा. सू-१-३-२ 33.पा.सू-१-३-३ 34.पा.सू-१-३-४ 35.पा. सू-१-३-५ 36.पा. सू-१-३-६ 37.पा. सू-१-३-७ 38.पा.सू-१-३-८ 39. पा.सू- १- १-२७ 40.पा.सू-१-४-५८ 41.पा. सू४-१-४ 42. पा. सू-१-४-५७ 43.पा. सू-१-४-७४ 44.पा. सू- ३- ३-१ 45..The Aṣṭādhyāyī of Pāṇini- By Rama Nath Sharma 46. वा.प्र.ब्र-१ 47.ऋ-१०/११४/८ 48. अथर्व-७-२ 49. Brevity in Panini's Astadhyayi- By-Amba Kulkami ४ 50. सुश्रुत सूत्रस्थान 51. कातन्त्रवृत्तिटीका-दुर्गसिंह-परिशिष्ट-पृ-४०९ 52. शब्दकौस्तुभः -२-१-१ 53.पा.सू-३-२-९३ 54.. म. भा-४/४, पृ-२८ 55.श.र-१-२-६५ 56.म.भा-पश्पशा 57. प्रदीप-१-१-२३ 58. उद्योत-१-१-२३ 59. वार्त्तिक-१-१-६१ 60 काशिकावृत्तिः-१-२-५६ 61.म.भा.२-१-१ 62 प्रदीपः-२-१-१ 63. परिभाषेन्दुशेखरः नं १८ 64. परिभाषेन्दुशेखरः नं १७ 65. पा.सू- ८-२-१ 66. पा.सू- ६-४-२२ 67. पा.सू- ६-१-८ 68. अथर्व.प्रा.सू. १/३ 69. पा.सू-२/१/१ 70. अथर्व.प्रा.सू. १-७१ 71.पा. सू- १-१-१९ 72. अथर्व.प्रा.सू.१/९२ 73.पा.सू- १/१/६५ 74. अथर्व.प्रा.सू.१/५६ 75.पा.सू-६-१-८५ 76. अथर्व.प्रा.सू. १/५४ 77.पा.सू-१-४-१४ 78.. अथर्व.प्रा.सू. १/५५ 79.पा.सू-१-२-४१ 80.वा.प.ब्र-११ 81.म.भा-२-१-१, १-३-११, १-४-४९, ४-१-८३ 82. पा. सू-१-२-६४ 83. पा. सू-६-१-८४ 84. पा.सू-६-१-१५८ 85. पा. सू-१-१-७.

## सन्दर्भ-ग्रन्थाः


१. अथर्ववेद संहिता-प्रकाशक- योग निर्माण योजना, गायत्री तपभूमि, मथुरा, ३प्र।

२. अष्टाध्यायी - पाणिनिः, चौखम्वा सुरभारती प्रकाशन, २००८।

३. कातन्त्रव्याकरणम्- चौखम्वा कृष्णदास अकादमी, वारणसी, २०१६।

४. काशिकावृत्तिः वामन जयादित्य कृत, तारा बुक् एजेन्सी, वारणासी६. पराशरोपपुराणम्- संपूर्णानन्दसंस्कृतविश्वविद्यालय, वारणासी।

५. गणरत्नमहोदधि-युधिष्ठिरमीमांसक मोतिलाल वनारसिदास-दिल्ली, १९६४।

६. दण्डी विरचितः काव्यादर्श: Bhandarkar Oriental Research Institute, 1938।

७. परमलघुमञ्जूषा-आचार्य लोकमणि दाहालकृत-शक्तिप्रकरणम्-चौखम्वा सुरभारती प्रकाशन, वारणासी।

८. परिभाषेन्दुशेखरः - चौखम्वा सुरभारती प्रकाशन।

९. पाणिनीयशिक्षा- चौखम्वा ओरियन्टालिया, दिल्ली।

१०. वाक्यपदीयम् (ब्रह्मकाण्डम्) भर्तृहरि-सत्यनारायणशास्त्री, कृष्णदास अकादमी, वाराणासी, १९८३।

११. व्याकरणमहाभाष्यम्-चौखम्वा संस्कृतप्रतिष्ठान, दिल्ली, १९९२।

१२. यास्कप्रणीत-निरुक्तम्-चौखम्वा संस्कृत सीरीज अफिस्, वारणासी।

१३. शब्दकौस्तुभः - चौखम्वा संस्कृत सीरीज अफिस्, वारणासी।

१४. सुश्रुतसंहिता - चौखम्वा ओरिएण्टालिआ।

१५. संस्कृत व्याकरणशास्त्र का इतिहास-रामलाल कपूर ट्रष्ट, बहालगढ, सोनीपत-हरयाणा।

16. Amba Kulkami -University of Hyderabad, Brevity in Panini's Aṣṭādhyāyī- https/www.reserchgate.net.

17.Anand Mishra-Modeling the Paniniyan System of Sanskrit Grammar- Heidelberg University, Publishing Website-https://heiup.uni.heidelberg.de.

18. H.H.Wilson -RigvedaSamhita -Translated from Original Sanskrit, Published by- H.R.
Bhagavat Bangalore.

19. Rama Nath Sharma- The Aṣṭādhyāyī of Panini Munshiram Manoharlal Publishers, pvt.ltd.New Delhi, Ed-2002.

20. S. D. Joshi - Pāniniān Studies -Felicitation Volume- Center for South and Southeast Asian Studies University of Michigan.1991.

21.S.D.Joshi and J.A.F Roobergen- Vyakarana Mahabhasya Paspasahnika - Published- The Poona University Press 1986.

22. S. Pawate - The Structure of Aṣṭādhyāyī - University Bombey, 1934.

23. Swami Prakasananda Saraswati -The True History and the Religion of India- Motilal Banarasidass Publisher 2001.

# संस्कृतसाहित्ये राज्यस्य उत्पत्तिः च विकासः

**डॉ. चिन्मय चट्टोपाध्याय**
ए.एम. कॉलेज झालदा
पुरुलिया, प.ब.

**भूमिकाः -**

रामायणमहाभारतात् आरभ्य अनेकेषु राजनैतिकग्रन्थेषु राजनीतितत्त्वानां विस्तरेण उल्लेखः अस्ति इति वयं पश्यामः। इदं प्रतीयते यत् प्राचीनकाले राजनैतिकसिद्धान्तानां निर्माणं विद्वान्-चिन्तकानां कृते महत्त्वपूर्णः विषयः अभवत्। सम्भवतः राजनीतिसम्बद्धः कोऽपि तत्त्वः नास्ति यस्य विषये प्राचीनग्रन्थेषु विस्तरेण, व्यापकतया, सूक्ष्मतया च चर्चा न कृता, एवं सर्वे ग्रन्थाः स्वयमेव विशेषाः सन्ति। राजनीतिशास्त्रस्य ग्रन्थेषु याः अधिकांशः चर्चाः वयं प्राप्नुमः, ते अद्यत्वे अपि पूर्णतया प्रासंगिकाः सन्ति। यदि अद्यतनराजनेतारः चर्चाकृततथ्यस्य आलोके व्यवहारं कुर्वन्ति, तर्हि ते सम्बन्धितराज्यं, समाजं वा आदर्शराज्यं कर्तुं शक्नुवन्ति। कस्यापि राज्यस्य सुचारुकार्यकरणाय केचन तत्त्वानि सर्वथा आवश्यकानि, येषां अभावे राज्यस्य सुसंगठितं कार्यं कदापि न सम्भवति, एतेषु मध्ये सप्तप्रकृतिमण्डलं मुख्यतत्त्वानि सन्ति। सप्तप्रकृतिमण्डलस्य अन्तर्गतं राजा, अमात्यः, राज्य, दुर्गं, निधिं, बलं, मित्राणि च आगच्छन्ति। तस्य मध्ये राज्यस्य उत्पत्तिः, विकासः च विस्तारेण वर्णनं प्राप्यते।

सप्तप्रकृतिमण्डलस्य अन्तर्गतं राष्ट्रं तृतीयस्थाने अस्ति। आचार्यकामन्दकस्य मते राज्यस्य सम्पूर्णसंरचना राष्ट्रदेवात् उद्भवति। अतः राजा सर्वप्रयत्नेन राष्ट्रस्य समृद्धिं कर्तुं प्रयतेत्। सप्त अपि प्रकृतयः राष्ट्रमात्रं प्रति उत्तरदायी भवन्ति। महाभारतस्य शान्तिपर्वणि पितामहः युधिष्ठिरं प्रति वदति यत् यथा गर्भिणीस्त्रीः स्वकामं त्यक्त्वा गर्भस्थ बालस्य कल्याणं चिन्तयति एव तथैव राजा अपि स्वकीयेषु मग्नः न भवेत्, किन्तु राष्ट्रस्य कल्याणं सर्वदा चिन्तयेत्। रामायणस्य, महाभारतस्य, मनुस्मृतेः च अध्ययनात् स्पष्टं भवति यत् राजा स्वराष्ट्रस्य रक्षणार्थं निरन्तरं प्रयत्नः करणीयः।

**“सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते”**। 1

मनुस्मृतेः मते राष्ट्ररक्षणाय राजा प्रत्येकं ग्रामे एकं ग्रामाधिकारिणं, प्रत्येकं दश, विंशति,शत, च सहस्त्रग्रामेषु एकं अधिकारीं नियुक्तं कुर्यात्। सभापर्वस्य (महाभारतस्य) पञ्चमे अध्याये राष्ट्ररक्षणार्थं प्रशस्तः, संग्राहकः, संविधातः, लेखकः, साक्षी च जनरक्षणार्थं प्रत्येकस्मिन् ग्रामे पञ्चरूपेण नियुक्ताः भवेयुः। इति नारदः युधिष्ठिरं प्रति वदति।

रामायणे महाभारते च राष्ट्रस्य रक्षणार्थं १८ तीर्थस्य वर्णनं कृतम् अस्ति, ये निम्नलिखितरूपेण सन्ति – मन्त्रीः पुरोहितः, युवराजः, सेनापतिः, दौवारिकः, अन्तपुराध्यक्षः, कारागाराध्यक्षः, कोषाध्यक्षः, कार्यनियोजकः, प्रद्वीवाकः, प्राड्विवाकः, वित्तदार्तारः, शासनस्य द्दष्ट्या राज्यस्य सीमानां रक्षकः, किलारक्षकः, राष्ट्रपालः , दण्डपालः, च धर्माध्यक्षः। कौटिल्यः सम्पूर्णं राष्ट्रं द्विधा विभक्तवान् अस्तिः- पुरः जनपदः च। यदि पुरस्य अर्थः नगरः, दुर्गः, राजधानी वा, तर्हि शेष जनपदस्य अर्थः समस्त राष्ट्रस्य कृते अस्ति। पुरस्य मुख्याधिकारी नागरिकः इति उच्यते, जनपदस्य प्रशासनस्य दायित्वं च समाहर्ता उपरि निर्भरं भवति।

रामायणस्य महाभारतस्य च इव कौटिल्येन राष्ट्ररक्षणार्थं १८ विभागप्रमुखानाम् वर्णनं कृतम् अस्ति, ये निम्नलिखितम्- 1.मन्त्री, 2. पुरोहित, 3. सेनापति, 4. युवराज, 5. दौवारिक, 6. अतवंशिक, 7. प्रशास्तृ, 8. समाहर्ता, 9. सन्निधाता, 10. प्रदेष्टा, 11. नायक, 12. पौर, 13 व्यावहारिक, 14. कार्मातिक, 15. सभ्य, 16.दण्डपाल, 17. अंतपाल, 18. दुर्गपाल।

आचार्यशुक्राचार्यस्य मते राष्ट्रशब्देन स्थावरम् अर्थात् वृक्षपर्वतादिसहितभूमिः जङ्गम अर्थात् गोमानुषादिजीवाः च अभिप्रेताः।

**"स्थावरं जङ्गं वापि राष्ट्र शब्देन गीयते[2]" ।**

राज्ञः वशगतं राष्ट्रं भूमिक्षेत्रं वा तस्य राज्यं कथ्यते।

**"यस्याधीनं भवेद् यावत् तद्राष्टं तस्य वै भवेत्"[3]।**

स्थावरजङ्गमं सम्पत्तौ राष्ट्रियसम्पत्तौ स्तः। राज्ये अनेकाणि बस्तयः सन्ति। ग्रामः, पल्लीः वा कुम्भः इति उच्यते। आचार्यस्य मते ग्रामः एक कोसवर्गस्य भवति, यस्य भूमिराजस्वं एक रजतमुद्रासहस्रं भवति। ग्रामस्यार्धं पल्लीः इत्यर्धं कुम्भं च भवति।

**"भवेत्क्रोशात्मको ग्रामो रूप्यकर्षसहस्रकः ।**
**ग्रामार्द्धक पल्लिसंज्ञ पल्यर्द्ध कुम्भसंज्ञकम्"** [4]।।

ग्रामाणां विकासाय अनेके अधिकारिणः नियुक्ताः भवेयुः। एते पदाधिकारिणः सन्ति- ग्रामाधिपतिः, दण्डाधिपतिः, भागहरं, लेखकः, शुल्कग्राहं तथा प्रतिहारं –

**"साहसाधिपतिञ्चैव ग्रामनेतारमेव च ।**

**भागहरं तृतीय तु लेखकञ्च चतुर्थकम् ।।**
**शुल्कग्राहं पञ्चमं च प्रतिहारं तथैव च।**
**षड्कमेतन्नियोक्तव्यं ग्रामे ग्रामे पुरे पुरे"** [5] ।।

एवं नगरानां स्थापना अपि तथैव महत्त्वपूर्णा अस्ति। अलङ्कारः,सौन्दर्यप्रबन्धनार्थं च एतेषु नगरेषु विशेषाधिकारिणः नियुक्तिः भवितुमर्हति। शुक्रः कथयति यत् विपण्यस्य आधुनिकरीत्या आयोजनं भवेयुः। तेषां मतेन एकस्मिन् एव स्थाने समानवस्तूनाम् विक्रयणस्य व्यवस्था भवितुमर्हति। आचार्येन विपण्यस्य सुचारुकार्यं कर्तुं नियुक्तानां अधिकारिणां योग्यतायाः कार्यक्षमतायाः च विस्तरेण वर्णनं कृतम् अस्ति ।

परिवहनस्य सुविधायै शुक्रः राष्ट्रव्यापिमार्गनिर्माणे महत् महत्त्वं दत्तवान् अस्ति। तस्य मते राजभवनस्य चतुर्दिशां राजमार्गस्य व्यवस्था भवेत्। अयं राजमार्गः सम्पूर्णं देशं एकस्मिन् सूत्रे संयोजयितुं कार्यं करोति। उत्तमः राजमार्गः त्रिंशत् हस्तविस्तारः, मध्यमराजमार्गः विंशतिहस्तविस्तारः, पञ्चदशहस्तविस्तारः च राजमार्गः नीचगुणः इति मन्यते। पूर्वोक्तत्रिविधमार्गाणां ग्रामेषु नगरेषु च व्यवस्था भवेत्। तत्सह ग्रामेषु नगरेषु च पदमार्गाः त्रिहस्तविस्तृताः, वीथीः पञ्चहस्तविस्ताराः, मार्गाः न्यूनातिन्यूनम् दशहस्तविस्ताराः च भवेयुः।

**"राजमार्गास्तु कर्त्तव्यश्चतुर्दिक्षु नृपगृहात्।**
**उत्तमो राजमार्गस्तु त्रिंशद्धस्तमितोभवेत्।।**
**मध्यमो विंशतिकरो दशपञ्चकरोऽधमः।**
**पण्यमागस्तिथा चैते पुरग्रामादिषु स्थिताः।।**
**करत्रयात्मिका पद्यावीधिः पञ्चकरात्मिका।**
**मार्गो दशकरः प्राक्तो ग्रामेषु नगरे च"** [6] ।।

यात्रिणां वासार्थं विविधस्थानेषु पान्थशालां व्यवस्थापनम् तत्र भवेत्। अयं सुरक्षितः भवेत्, जलाशययुक्तः च भवेत्। अस्मिन् समानाकाराः बहूनि गृहाणि भवेयुः, अयं पान्थशाला ग्रामः पूर्वाभिमुखः उत्तरदिशि वा भवेयुः।

**"पान्थशाला ततः कार्म्या सुगुप्ता सुजलाशया।**
**सजातीयगृहाणां हि समुदायेन पङ्क्तिः।।**
**निवेशनं पुरे ग्रामे प्रागुदङ्मुखमेव वा"**[7] ।।

तेषां पालनाय स्थायी व्यक्तिः भवेत् , सः अधिकारी पान्थशालाधिपः इति उच्यते। आचार्येन राष्ट्ररक्षणार्थं निम्नलिखितपदाधिकारिणः वर्णिताः-1.मन्त्रीः, 2. पुरोहितः, 3. सेनापतिः, 4. युवराजः, 5. दौवारिकः, 6. अतर्वंशिकः, 7. प्रशास्तृ, 8. समाहर्ताः, 9. सन्निधाताः, 10. प्रदेष्टाः, 11. नायकः, 12. पौरः, 13. व्यावहारिकः, 14. कार्मांतिकः, 15. सभ्यः, 16. दण्डपालः, 17. अंतपालः, 18. दुर्गपालः, 19. अक्षपटलाध्यक्षः, 20. कोशाध्यक्षः, 21. आकाराध्यक्षः, 22. लोहाध्यक्षः, 23. खन्यध्यक्षः, 24. लवणाध्यक्षः, 25.धान्याध्यक्षः, 26. पाकाध्यक्षः, 27. देवाध्यक्षः, 28. रत्नाध्यक्षः, 29. देवाध्यक्षः, 30. दानाध्यक्षः, 31. आयुधागाराध्यक्षः, 32. अश्वाध्यक्षः, 33. हस्त्यध्यक्षः, 34. रथाध्यक्षः, 35. गजाध्यक्षः। एतदतिरिक्तं ग्रामप्रमुखः, पार्षदः, सत्रप्रमुखः, परीक्षकः, करग्राहकः, ज्योतिषीः, द्वारपालः, तपोनिष्ठः, दानशीलः, पौराणिकः, वैधः, इत्यादयः अधिकारिणः वर्णनं कृतम् अस्ति।

कामन्दकीय नीतिसारस्य मते यदि भूमिः उत्तमगुणवत्ता अस्ति, तर्हि राष्ट्रस्य लाभः भवति। यथा-यथा मण्डलं वर्धते तथा - तथा राजा अपि वर्धते। यदा भूमिः सद्गुणयुक्ता भवति तदा राष्ट्रं वर्धते, यदा राष्ट्रं वर्धते तदा कोषः वर्धते, येन राजा शक्तिशालिनी भवति। शस्यात् पूर्णं, जलात् पूर्णं, सुवर्णस्य उत्पत्तिस्थानं, स्थलमार्गपूर्णं, खानिपूर्णं, नानावस्तूनाम् पूर्णं, ग्रामीणधनपूर्णं च, पुण्य- मण्डलं इति कथ्यते।

**"सस्याकरती पण्य खनि द्रव्य समन्विता ।**
**गोहिता भूरि सलिला पुण्यैर्जनपदैर्वृता"** [८]।।

राष्ट्रं सदा गजैः, जलभूमिमार्गैः, प्रतिकूलपरिस्थितौ अपि शस्यानि पूर्णानि भवेयुः, अर्थात् सिञ्चनादीनां सम्पूर्णव्यवस्था भवेत्, मण्डलस्य परितः वनानि भवेयुः, वनं च पूर्णं भवेत् व्याघ्रसिंहसर्पाणां प्रचण्डानां तदा एव सुरक्षितं तिष्ठति। न्यायेन शासनं कुर्वन् राज्ञः मण्डलं स्वयमेव वर्धते। एतत् विहाय आचार्येण राष्ट्रस्य सुचारुकार्यं कर्तुं रामायण-महाभारत-कौटिल्य-आदिभ्यः इव १८ तीर्थाः अथवा अधिकारिणः वर्णिताः सन्ति।

**"किरातार्जुनीयस्य"** अध्ययनेन वयं ज्ञास्यामः यत् राज्ञः यावत् पर्यन्तं शासनं करोति तावत् एव तस्य राज्यम् इति उच्यते। सुयोधनः समुद्रपर्यन्तस्य सम्पूर्णस्य पृथिव्याः एकमात्रः शासकः अस्ति, अतः समग्रं पृथिवी तस्य राज्यम् अस्ति। स्वराज्यस्य सर्वान् प्रतिद्वन्द्वी नृपान् सर्वथा वशीकृत्य अपि पाण्डवेभ्यः आगच्छन्तं प्रभावं प्रति आशङ्कितः तिष्ठति। राष्ट्रस्य अभयस्य चिन्ता नृपः सदा कुर्यात् अयमेव अर्थः अस्ति।

**"प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमण्डलंभुवः।**
**स चिन्तयत्येव भियस्त्वदेष्यतारहो दुरन्ता वलवद्विरोधिता"** [९]।।

दुर्योधनः पाण्डवैः सह युद्धं आवश्यकम् इति मन्यते। महाबलैः पाण्डवैः सह युद्धे विजयः असम्भवं इति चिन्तयित्वा, सः सर्वान् विपक्षराजान् स्वस्य अन्तः समावेशितवान्।

स्वराष्ट्रस्य कृते सः सर्वेषु राज्येषु अत्यन्तं कुशलं गुप्तचरं नियुक्तं करोति, तेषां माध्यमेन सः सर्वेषां राष्ट्रमण्डलानां वार्तायां पूर्णतया अवगतः भवति, भवेत् तत् शत्रुः मित्रं वा। सः अन्यराष्ट्रानां इष्टानि कर्माणि जानाति, अपि च तस्य इष्टकर्माणि अन्ये न जानन्ति, इति सम्पूर्णं व्यवस्थां करोति। एतेन सह सः स्वस्य निपुणगुप्तचरानाम् उपयोगेन देशे मन्त्रिणः, सेनायाः अन्तःवृत्तस्य, अधिकारिणः, सेवकाः, स्वस्य अनुयायिनां च भेदयति। एतदतिरिक्तं सामाऽदि उपायानां आश्रयेण स्वराष्ट्रस्य रक्षणं करोति। अत्र यदा स्वराष्ट्ररक्षणार्थं कृताः सर्वे प्रयत्नाः विफलाः भवन्ति तदा अर्जुनः अपि तपस्यरूपी साधनानाम् उपयोगेन दिव्यशस्त्रप्राप्त्यै च राष्ट्ररक्षणाय प्रयतते।

शिशुपालवधमहाकव्येऽपि पूर्वाचार्यावत् अष्टादश तीथानां वर्णनं कृतम् अस्ति। यदि एते अष्टादशतीर्थाः तस्य अनुकूलाः सन्ति, तर्हि गुप्तचरादिभिः सज्जः राजा चिरकालं यावत् स्वराज्यं स्थिरं स्थापयितुं शक्नोति। चतुर्दशसर्गात् वयं ज्ञास्यामः यत् युधिष्ठिरः स्वनीतिवैभवेन सर्वान् नृपान् पराजय्य भारतवर्षस्य सम्राट् अभवत् –

**"सा विभूतिरनुभाव सम्पदां भूयसी तव यदायतायति।**
**एतदूढगुरुभारभारतं वर्षमध् मम वर्तते वशे"** [10]।।

अस्मात् स्पष्टं भवति यत् यदि राजा स्वराज्यं स्थिरं कृत्वा समग्ररूपेण भारते शासनं कर्तुम् इच्छति, तर्हि विदेशानां अष्टादश तीर्थेषु, स्वदेशस्य पञ्चदश तीर्थेषु च सर्वदा गुप्तचरं स्थापयेत् ,च नीतिशिक्षानुसारं वर्तयेत्। पूर्वोक्तगुणयुक्तः राजा एव ससागरा पृथिव्याः शासकः भवितुम् अर्हति। काव्यस्य नायकस्य युधिष्ठिरस्य एते गुणाः आसन् इति कारणात् एव सम्राट् भवितुम् अर्हति स्म । तस्मिन् समये राजधानी अद्यत्वे इव सुसज्जितः आसीत्। नगरनिर्माणस्य, भवननिर्माणस्य च कला चरमोत्कर्षे आसीत्। नगरजीवनशैल्याः, ग्राम्यजीवनशैल्याः च पर्याप्तः अन्तरः आसीत्। अस्य स्पष्टं सूचकं काव्यात् अपि प्राप्नुमः। तस्मिन् काले राजधानी सभ्यतायाः , संस्कृतिविकासस्य च महत् केन्द्रम् आसीत्। राजानां रत्नप्रसादाः, भवनकलायां वा वास्तुकलायां वा उदाहरणं गणयितुं शक्यन्ते। **'शिशुपालवध'** महाकाव्यस्य नगरनिर्माणशैली मम दृष्ट्या सुव्यवस्थिता प्रतीयते।

नैषधकाव्यस्य अध्ययनात् वयं ज्ञास्यामः यत् राज्ञः यावत् पर्यन्तं शासनं, करोति तावत् एव राज्यं व्याप्तम् अस्ति। शासनं प्रत्यक्षं परोक्षं च भवितुम् अर्हति। यावत् राज्ञः प्रत्यक्षशासनं भवति तावत् तस्य

राज्यमेव। यत्र -यत्र परोक्षशासनं भवति तत्र अपि तस्य राज्याधीना भवति। करदातृराजस्य राज्यमपि शासकराजराज्ये गणनीयमिति भावः। महाराजनलः सप्तमहाद्वीपान्, अष्टौ जम्बुदीप-द्वीपान्, अन्य-द्वीपान् च जित्वा आसीत्। अतः ते सर्वे तस्य राज्याऽन्तर्गते समाहित भवन्तिः ।

**“जिगीषया नवद्वयद्वीपपृथग् जय श्रियां”** [11]।

राजा षड्विध इति (अनावृष्टि, अतिवृष्टि, मूषक, पतङ्ग, शुक, समीपस्थराजाः च) राज्यस्य रक्षणं कर्तव्यम्। यदि राज्ये कोऽपि आवश्यकतां वर्तत्ते , तर्हि राजा तस्मै पर्याप्तदानं दत्त्वा सान्त्वयेत्। तत्सह राज्यस्य जनानां पालनपोषणस्य, रक्षणस्य, आरामस्य च व्यवस्थां अपि कुर्यात्। राजा स्वराज्ये सर्वत्र जलस्य सुव्यवस्थां कुर्यात्, येन राज्यं दिव्यमाता, नदीमाता च उभौ वक्तुं शक्यते।

**“यत्राभिलाषस्तव तंत्र देशे नन्वस्तु धन्वन्यपि तूर्णमर्णः।**
**आपोवहन्तीह हि लोकयात्रां यथाभूतानि तथापराणि।।**
**नलेष्टापूर्त्रसम्पूर्ते दूरदुर्गानमुं प्रति ।**
**निषेधन् निषधान् गन्तु विघ्नः सञ्जघटे धनः”** [12]।।

राज्ये विविधविषयशिक्षणाय गुरुकुलस्य स्थापना इत्यादीनि उत्तमशिक्षाव्यवस्था भवेत्। राज्ये वेदाध्ययनस्य अपि व्यवस्था भवेत्।

**“वेदानुच्चरतां तत्र मुखादाकर्णयन् पदम्।**
**न प्रसारयितुं कालः कालिः पदमपारयत्”** [13]।।

राजधानी सर्वतो रक्षिता भवेत्। तस्मिन् काले राजधानी सभ्यतायाः संस्कृतिस्य च महत् केन्द्रम् आसीत् ।

**“चित्रतत्तदनुकार्यविभ्रमाधायिनेकविधरूपरूपकम्।**
**वीक्ष्य यं बहु धुवन् शिरो जरावातको विधिरकल्पिशिल्पिराट्”**[14]।।

नैषधकाव्ये वयं नगरस्य भवननिर्माणकलानां च उत्तमं उदाहरणं प्राप्नुमः। राजधानीयां असंख्यविस्तृतमार्गाः, उत्तमजलनिकासीव्यवस्थायां, भवननिर्माणे वैज्ञानिकपद्धतेः वास्तुशास्त्रस्य च प्रयोगः यथा कस्यापि प्रकारस्य बाधकः न भवेत्। इत्यादयः स्पष्टं कुर्वन्ति यत् तत्कालीनवास्तुकला प्रगतेः शिखरे आसीत्। तेषु कालेषु भवनं वातानुकूलितं, पर्याप्तप्रकाशयुक्तं च भवति। विपण्यस्य कृते पर्याप्तं स्थानं भवेत् येन जनाः आवश्यकवस्तूनि क्रेतुं शक्नुवन्ति।

बुद्धचरितमहाकाव्यस्य अनुसारं राज्ये सिञ्चनस्य सुव्यवस्था भवेत्। तेषां मते राज्यं सदैव चोराणां रक्षणं भवितव्यं, विदेशीयहस्तक्षेपविहीनं च भवेत्।

**"स्तेयादिभिश्चाप्यरिभिश्च नष्टं स्वस्थं स्वचक्रं परचक्रमुक्तम्।**

**क्षेमं सुभिक्षं च बभूव तस्य फुरानरण्यस्य यथैव राष्ट्रम"**[15]।।

अस्याऽतिरिक्तं रघुवंशं, कुमारसम्भवं, सौन्दरनन्दं, इत्यादयः महाकाव्येऽपि राज्यसम्बन्धे पूर्वोक्तः आचार्यस्य मतानुरुपं वर्णनं प्राप्तनोति। एवं प्रकारेण सप्तप्रकृतिमण्डलस्य अन्तर्गतं प्रायः सर्वैः शास्त्रज्ञः राष्ट्रस्य वर्णनं कृतम् अस्ति। यद्यपि अद्यत्वे तस्य कृते 'राज्य' इति शब्दः प्रयुक्तः, परन्तु प्राचीनलेखकाः यत् राष्ट्रम् इति सम्बोधितवन्तः, तत् राज्यत्वेन विचारयितुं शक्नुमः। यद्यपि "राजा" सप्तप्रकृतीनां मुख्यप्रकृतिः मन्यते, परन्तु राज्यं सर्वाधिकमहत्त्वपूर्णं, यतः तद्विना अन्यषद्प्रकृतयः कल्पयितुं न शक्यन्ते ।

## पादटीकाः

1. मनुस्मृतिः- 7/113
2. शुक्रनीतिः- 4/3/1
3. शुक्रनीतिः- 4/3/2
4. शुक्रनीतिः- 1/193
5. शुक्रनीतिः- 2/120,121
6. शुक्रनीतिः- 1/260,261,262
7. शुक्रनीतिः- 1/257,258
8. कामन्दकनीति- 4/7/49
9. किरातार्जुनीयमहाकाव्यं- 1/23
10. किरातार्जुनीयमहाकाव्यं- 14/5
11. नैषधकाव्यं- 1/5
12. नैषधकाव्यं- 14/80, 17/115
13. नैषधकाव्यं- 17/160
14. नैषधकाव्यं- 18/12
15. बुद्धचरित्रं- 2/5

## सन्दर्भग्रन्थाः

1. कौटिल्य अर्थशास्त्रं
2. बुद्धचरित्रं
3. संस्कृत साहित्यस्य इतिहासः
4. रामायणं
5. महाभारतं
6. रघुवंशमहाकाव्यं
7. कुमारसम्भवमहाकाव्यं
8. सौन्दरनन्दमहाकाव्यं
9. शिशुपालवधमहाकाव्यं
10. किरातार्जुनीयमहाकाव्यं
11. नैषधकाव्यं
12. कामन्दकनीति
13. मनुस्मृतिः
13. शुक्रनीतिः

# नारायणपण्डितस्य हितोपदेशे ज्ञानपरम्परायाः विकासः –एकं परिशीलनम्

**डॉ.पङ्कजकुमारमाहाना**
अतिथी अध्यापकः
स्नातकोत्तर संस्कृतविभागः
धरणीधरविश्वविद्यालयः
केन्दुझर, ओडिशा

**शोधसारः**

संस्कृतवाङमये सन्त्यनेकानि स्तोत्रकाव्यानि,ऐतिहासिककाव्यानि कथाकाव्यानि च। तेषु नैकेषु कथाकाव्येषु नारायणपण्डितेन विरचितः हितोपदेशः कथासाहित्ये सर्वोत्कृष्टं स्थानं भजतेतराम्। पटनानगरे सुदर्शननाम्नः राज्ञः मुर्खपुत्राणां कृते सकलज्ञानं प्रदातुमेव एतस्य हितोपदेश इति कथाकाव्यस्य रचना नारायणपण्डितेन कृता। तत्र विविधकथामाध्यमेन यत् ज्ञानं समाजस्य कृते समर्पितं तस्य परिपालनेन समुचितस्य एकस्य राष्ट्रस्य परिकल्पना क्वचित् सम्भवति।

**वीजशब्दाः-** विद्यायाः महत्वं ,पुत्रस्य महत्वं , मूर्खपुत्रस्य निन्दा,सज्जनानां प्रशंसा,दुर्जनानां निन्दा, च।

**हितोपदेशस्य सामान्यपरिचयः**

हेतोपदेशे राज्ञः मूर्खपुत्राणां कृते समुतितज्ञानवर्धनाय एव विविधकथाः निरूपिताः सन्ति। तत्र मित्रलाभः,सुहृत्भेदः,विग्रहः,सन्धिः एवञ्च विभागचतुष्टयेन कथाभागेन विविधोपदेशाः नैकानि ज्ञानानि च निरूपितानि। तदत्र किञ्चत् प्रस्तूयते।

**हितोपदेशे ज्ञानतत्त्वानि -**

यदि सूक्ष्मं परिशीलनं विधीयते तर्हि सकलज्ञानानां स्रोतः हितोपदेशग्रन्थः इति कथने नातिशयोक्तः भवति। तत्र विद्यायाः महत्वं ,पुत्रस्य महत्वं , मूर्खपुत्रस्य निन्दा,सज्जनानां प्रशंसा,दुर्जनानां निन्दा, धनेन किं प्रयोजनमित्यादीनि नैकानि ज्ञाततत्त्वानि निरूपितानि सन्ति। तदत्र समुदाह्रीयते।

**विद्याधनं सर्वधनात् प्रधानम् -**

यदि मनुष्यः विद्यायाः अध्ययनं न करोति,तर्हि सः पशुवत् जीवति, उक्तं यथा – **ज्ञानेन हीनः पशुभिः समानः** इति । अतः सकलमपि ज्ञानं विद्यया एव सम्भवति। सा च विद्या सर्वधनेभ्यः प्रमुखरूपेण भवति। तच्च विद्यारूपकं धनं चैर्यादिभिः अपहर्तुं नैव शक्यते। सा अनर्घत्वात् विनाशरहिता च भवति।

व्यये कृते सा विद्या नैव नश्यति , अपि तु वृद्धिं प्राप्नोतीति ज्ञानं बितोपदेशे सुविचारितम् । प्रसङ्गेऽस्मिन् उक्तं यथा –

**सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।**
**अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ।।**[1]

विद्या अस्माकं कृते सर्वमपि ददाति। विद्या विनयं ददाति,विनयेन श्रेष्ठपात्रत्वमायाति,पात्रत्वात् धनप्राप्तिः धनेन धर्मः ततः सुखमिति विद्यायाः महत्वनिरूपणरूपकं ज्ञानं हितोपदेशे निरूपितम् । उक्तं यथा–

**विद्या ददाति विनयं विनयाद्याति पात्रताम् ।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम् ।।**[2]

**सुपुत्रेण लाभः कुपुत्रेण विनाशश्च**

परिवारे यदि कश्चन पुत्रः विद्वान् धार्मिको वा न भवति तर्हि सः काणस्य केवलं चक्षुपीडा इव कष्टं जनयति। एकः गुणीवान् पुत्रः शतं मूर्खपुत्रेभ्यः श्रेष्ठः भवति। यथा गगने एकश्चन्द्रः तमसः दूरीकरणे सहायको भवति, न तु तारागणाः। उक्तं यथा –

**कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः ।**
**काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम् ।।**[3]
**वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।**
**एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि ।।**[4]

अनयोः श्लोकयोर्मध्ये समुचितपुत्रप्राप्तेः ज्ञानं प्राप्यते।

**हितोपदेशे पुरुषार्थचतुष्टयस्य ज्ञानम् -**

सर्वेषामपि मनुष्याणां पुरुषार्थः कामना भवति। स च पुरुषार्थः नाम धर्मार्थकाममोक्षः। हितोपदेशे एतस्य पुरुषार्थचतुश्टयस्य प्राप्तेः उपायाः निरूपिताः वर्तन्ते। यत् सकलमनुष्याणां कृते समुचितज्ञानमेव भवति। मनुष्येषु पशुषु च आहार-निद्रा-भय-मैथुनञ्च प्रायः समानमेव भवति। पर्नतु एकः विशिष्टः गुणः मनुष्याणां भवति स तु धर्मः। धर्मादेव पशुतः मनुष्यः श्रेष्ठो भवति। उक्तं यथा –

**आहारनिद्राभयमैथुनञ्च समानमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो, धर्मेण हीनाः पशुभिः समानाः।।**[5]

येषां मनुष्याणां समीपे धर्मार्थकाममोक्षेषु एकोऽपि न भवति। तस्य जन्म निरर्थकम् इति ज्ञानं हितोपदेशे कथामुखे सुविचारितं वर्तते। एतादृशं ज्ञानम् उपदेशश्च सर्वेषामपि मनुष्याणां कृते हितमेव साधयति। उक्तं यथा–

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्येव तस्य जन्म निरर्थकम् ।।**[6]

**हितोपदेशे व्यवहारज्ञानम्-**

मनुष्याणां सर्वेषामपि व्यवहारः समीचीनः भवेदिति ज्ञानं हितोपदेशे निरूपितम्। जगत्यस्मिन् न कोऽपि कस्यापि शत्रुः मित्रं वा भवति । यदि कश्चन सम्यक् न व्यवहरति तर्हि शत्रुमित्रभावो जायते। उक्तं यथा मित्रलाभे –

**न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।**
**व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ।।**[7]

**मातुः पितुश्च कर्तव्यविषयकं ज्ञानम् -**

परिवारे माता पिता च भगवतः अवतारद्वयमिति कथने नातिशयोक्तिः। तौ पितरौ स्वपुत्रान् पाठनीयम्। परन्तु ते यथा तथा न कुर्वन्ति तर्हि स पुत्र हंसमध्ये बक इव सभायां नैव शोभते। एतादृशं ज्ञानं हितोपदेशे कथाकाव्ये नारायणपण्डितस्य पाण्डित्यमेव सूचयति। उक्तं यथा –

**माता शत्रुः पिता वैरी येन बालो न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये बको यथा।।** [8]

एवञ्च यदि सूक्ष्मातिसूक्ष्मं परिशील्यते तर्हि हितोपदेशे प्रतिपदं प्रतिपादञ्च ज्ञानपरम्परायाः स्रोतांसि प्रवहन्ति। तदत्र किञ्चित् स्थालीपूलकन्यायेन समालोचितम्।

## पादटीका-

1. कथामुखे हितोपदेशे विद्याप्रशंसायां श्लोकः 4
2. कथामुखे हितोपदेशे विद्याप्रशंसायां श्लोकः 6
3. कथामुखे हितोपदेशे श्लोकः 12
4. कथामुखे हितोपदेशे विद्याप्रशंसायां श्लोकः 18
5. कथामुखे हितोपदेशे श्लोकः 25
6. कथामुखे हितोपदेशे श्लोकः 26
7. मित्रलाभे श्लोकः 72
8. मित्रलाभे श्लोकः 72

# उपनिषत्सु यमनियमस्वरूपपर्यालोचनम्

**दयारामगौतमः**
विद्यावार्धिच्छात्रः(दिल्लीविश्वविद्यालयः)

## प्रस्तावना

हिरण्यगर्भेण प्रोक्तेयं योगविद्यात्यन्तं प्राचीना वर्तते। भारतीयाध्यात्मसाधनायाः प्रमुखमङ्गं वर्तते। योगः भक्त्या ज्ञानेन च परिपूर्णा सा विद्या वर्तते या मोक्षप्राप्तौ सहायिका भवति। योगसाधनायाः क्रमबद्धं विवेचनं पतञ्जलिना कृतमस्ति। पतञ्जलिना योगसूत्राणां माध्यमेन विचाराणां प्रतिपादनं कृतमस्ति। योगदर्शने चत्वारः पादाः सन्ति । प्रथमे समाधिपादे योगस्य लक्षणस्य, तथा चित्तस्य तद्वृत्तीनां निरोधस्योपायाः, द्वितीये साधनपादे क्रियायोगः, पञ्चक्लेशाः तथा तस्य भेदाः, क्लेशानां दूरीकरणस्योपायाः, हेयम्, हेयहेतुः, हानम्, हानोपायाः तथा योगस्याष्टाङ्गादीनां विवेचनं कृतमस्ति। तृतीये विभूतिपादे धारणा, ध्यानम्, तथा समाधेः स्वरूपम् इत्येतेषां प्रतिपादनं कृत्वा योगस्यानुष्ठानेन उत्पद्यमानानां विभूतीनां विवेचनं तथा चतुर्थे कैवल्यपादे समाधिसिद्धिः, निर्माणचित्तम्, विज्ञानवादनिराकरणं तथा कैवल्यम् इत्यादीनां वर्णनं प्राप्यते।

योगशब्दः युज् धातोः घञि प्रत्यये निष्पन्नोऽस्ति।[1] योगशब्दे रचनासम्बद्धौ द्वौ धातू सम्भवतः- युजिर् योगे, युज् समाधौ। वाचस्पतिमिश्रस्य तत्त्ववैशारदी इति टीकायां योगशब्दस्य व्युत्पत्तिः एताभ्यां धातुभ्यामेव स्वीकृतास्ति।[2] एतद्व्युत्पत्त्यनुसारं योगशब्दस्य द्वावर्थौ प्रकटीभवतः- योजनं समाधिश्च।

योगसूत्रस्य प्रसिद्धभाष्यकारेण व्यासेनापि **योगः समाधिः**[3] योगः समाधिरूपेण स्वीकृतोऽस्ति।

पतञ्जलिकृतस्य योगसूत्रस्यानुसारं चित्तस्य वृत्तीनां निरोध एव योगोऽस्ति।[4] चित्तस्यार्थोऽस्ति अन्तःकरणम्। एतत्त्रिगुणात्मकं विद्यते। एतस्मिन् निरन्तरं वृत्तय उत्पन्नाः भवन्ति। चित्तं यदा अभ्यास-वैराग्याभ्यां वृत्तीनां त्यागं कृत्वा स्वस्वरूपे स्थितं भवति तदा सा अवस्था चित्तवृत्तीनां निरोधावस्था अर्थात् योग इति कथ्यते। चित्तस्य पञ्च अवस्थाः (भूमयः) स्वीकृताः सन्ति। क्षिप्तः, मूढः, विक्षिप्तः, एकाग्रः तथा विरुद्धः। क्षिप्तावस्थायां चित्तं रजोगुणस्याधिक्यात् चञ्चलं सत् सांसारिकविषयेषु भ्रमति। मूढावस्थायां तमोगुणस्याधिक्यात् चित्तं निद्रा इव अभिभूतं भवति। विक्षिप्तावस्थायां चित्तं क्षिप्तावस्थाया अपेक्षा शान्तं भवति किन्तु पूर्णतया शान्तं न भवति। एकाग्रावस्थायां चित्तं कुत्रचन ध्येये केन्द्रीभूतं भवति। निरूद्धावस्थायां चित्तस्य समस्तानां वृत्तीनां लयो भवति तथा एवम्प्रकारेण चिन्तनस्याप्यन्तो भवति।[5] प्रथमाः तिस्रः भूमयः योगस्य साधनैः दूरीक्रियन्ते। एकाग्रा निरूद्धा चावस्थे योगाभ्यासे सहायिके भवतः।

चित्तस्य प्रमुखतया पञ्च वृत्तयो भवन्ति। प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः।[6] प्रमाणवृत्तेः त्रयः प्रकाराः सन्ति- प्रत्यक्षम्, अनुमानम्, आगमश्च।[7] विपर्ययः इति तत् मिथ्याज्ञानं कथ्यते यत् पदार्थस्य यथार्थरूपे प्रतिष्ठितं न भवति।[8] विकल्प इति वृत्तौ वस्तुशून्यत्वेऽपि शब्दजन्यज्ञानस्य प्रभावेण व्यवहारः दृश्यते।[9] निद्रावृत्तौ विषयस्याभावस्यावलम्बनं भवति।[10] स्मृतिः इत्यनया तात्पर्यमतीतानुभवानां यथावत् मानसिकप्रतीतिः वर्तते।[11] एतासां वृत्तीनां निरोधः अभ्यासेन वैराग्येण च भवति।[12] चित्तस्य स्थिरतायै क्रियमाणः प्रयत्नः अभ्यासः कथ्यते।[13]

उपनिषद् साहित्यम् आध्यात्मिकविकासस्य मार्गप्रदर्शकं महत्वपूर्णं विद्यते। आध्यात्मिकचेतनायाः विकासे योगसाधनायाः सर्वाधिकं महत्वपूर्णं स्थानं वर्तते। अतः प्राचीनोपनिषत्सु योगस्य प्रमुखानामङ्गानां साधनाविधीनां च विवेचनमनेकत्र प्राप्यते। उपनिषत् योगस्य अष्टाङ्गैस्सह चित्तस्यावस्थादीनामपि विवेचनं करोति।

**विषयोपस्थापनम्**

कठोपनिषदि योगस्य परिभाषां कथयता कथितमस्ति यत् इन्द्रियाणां स्थिरधारणा एव योग इति कथ्यत इति।[14] श्वेताश्वतरोपनिषदि योगस्य लाभस्य विषये कथितमस्ति यत् पृथ्वी, जलम्, तेजः, आकाशः एतेषां महाभूतानां सम्यक्प्रकारेण उत्थाने सति एतत्सम्बद्धानां पञ्चानां योगविषयकगुणानां सिद्धौ सत्यां योगाग्निमयस्य शरीरस्य लब्धुः साधकस्य न च रोगो भवति, न वृद्धावस्था, नैव च असामयिकमृत्युः प्राप्ता भवति।[15]

शरीरे स्थूलताया अभावः, कस्यापि रोगस्याभावः, विषयेष्वनासक्तिः, शरीरे तेजसः सत्वम्, स्वरस्य माधुर्यम्, शुभगन्धस्य सत्ता, मलमूत्रयोर्नैयून्यम्, एताः सर्वा अपि योगस्य प्रारम्भिकसिद्धयः सन्ति।[16]

मुण्डकोपनिषदि परमेश्वरात् यमनियमादीनामुत्पत्तिरिति कथयता कथितमस्ति यत् विविधदेवताः, साध्यगणः, मनुष्याः, पशुपक्षिणः, प्राणापानवायवः, धान्यम्, यवः, तपः, श्रद्धा, सत्यम्, ब्रह्मचर्यम्, यज्ञादीनामनुष्ठानविधिः सर्वेऽपि तस्मादेवोत्पन्नाः।[17]

योगसाधनाया अष्ट अङ्गानि- यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः । एतेष्वधिकांशाङ्गानि कस्मिंश्चन रूपे उपनिषत्सु प्राप्यन्ते । पतञ्जलिना अहिंसा, सत्यम्, अस्तेयम्, अपरिग्रहः, ब्रह्मचर्यम् इत्येते यमाः सन्ति। मुण्डकोपनिषदि सत्यस्य महत्वं कथयता कथितमस्ति यत् सत्यमेव विजयि भवति, नासत्यम्। सत्येन एव देवयानं परिपूर्णमस्ति। येन निष्कामाः ऋषयः सत्यस्वरूपब्रह्मणः उत्कृष्टधाम प्रति गमनं कुर्वन्ति।[18]

छान्दोग्योपनिषदि ब्रह्मचर्यस्य पालनस्य फलस्वरूपं ब्रह्मलोकप्राप्तिः इति कथयता कथितमस्ति यत् तस्मिन् ब्रह्मलोके ये मनुष्याः ब्रह्मचर्येण “अर” “ण्य” इति उभौ समुद्रौ प्राप्नुवन्ति, ते एव अस्य ब्रह्मलोकस्य प्राप्तिं कुर्वन्ति । तेषां सम्पूर्णे लोके इच्छानुसारं गतिः भवति।[19]

योगसूत्रे शौचः, सन्तोषः, स्वाध्यायः, तपः, ईश्वरप्रणिधानम्, इत्येते नियमस्यान्तर्गताः भवन्ति। आन्तिरिकशौचस्य विषये छान्दोग्योपनिषदि कथितमस्ति यत् आहारस्य शुद्धत्वे अन्तःकरणं शुद्धं भवति। अन्तःकरणे शुद्धे स्मृतिः निश्चला भवति तथा स्मृतेः प्राप्तौ सम्पूर्णग्रन्थीनां निवृत्तिः भवति।[20]

तपः परिभाषयता बृहदारण्यकोपनिषदि कथितमस्ति यत् व्याधियुक्तस्यार्थात् रोगग्रस्तस्य पुरुषस्य तापः तथा मृतव्यक्तेः वने नयनम्, तथा अग्नौ प्रतिष्ठापनम्, निश्चितरूपेण परमं तपः कथितमस्ति। य एवं जानाति सः परमसत्यलोकं प्राप्नोति।[21]

कठोपनिषदि ईश्वरप्रणिधानस्य विषये कथयता कथितमस्ति यत् साधकः ईश्वरसत्तायां तस्य प्राप्तौ दृढनिश्चयी सन् निरन्तरं ईश्वरस्य चिन्तनं ध्यानं च विधाय तं प्राप्नुयात्। एवम्प्रकारकभावेन युक्तस्य साधकस्य परमात्मनः तात्विकस्वरूपस्य स्वयं साधकस्य हृदये प्रत्यक्षता भविष्यति।[22]

मुण्डकोपनिषदः अनुसारं शरीरस्यान्तः हृदयस्यान्तःस्थितः प्रकाशस्वरूपः परमपवित्रः परमात्मा सत्यभाषणम्, तपः, ब्रह्मचर्यम् इत्येतैः यथार्थज्ञानं कृत्वा एव प्राप्तो भवति। यः समस्तदोषैर्मुक्तः यत्नशीलः साधक एव दर्शने समर्थो भवति।[23]

श्वेताश्वतरोपनिषदि सत्यस्य तपसश्च विषये कथितमस्ति यत् तिलेषु तैलम्, दध्नि सर्पिः, स्रोतःसु जलम्, तथा अरण्यामग्निरिव परमात्मा स्वस्यान्तःकरणे गुप्तो भवति। यः साधकः परमात्मानं सत्येन संयमेन च पश्यन् भवति अर्थात् परमात्मनः चिन्तनं कुर्वन् भवति, परमात्मा तेनैव साधकेन दृष्टो भवति।[24]

**आसनम्**

योगाभ्यासाय प्रथमत उचितासनस्याभ्यासः कर्तव्यो भवति। श्वेताश्वतरोपनिषदि ध्यानायोपयुक्तस्यासनस्य ग्रहणस्य विषये कथयता कथितं यत् विदुषा पुरुषेण शिरः, ग्रीवा, वक्षःस्थलम्, इत्येतत्त्रीणि अग्रे स्थिराणि च कृत्वा समस्तेन्द्रियाणि मनसा हृदये सन्निविष्टानि कृत्वा ओंकाररूपनावा सम्पूर्णभयावहप्रवाहाणां पारं कर्तव्यम्।[25]

**प्राणायामः**

प्राणानामायाम एव प्राणायाम इति कथ्यते। श्वेताश्वतरोपनिषद अनुसारं विदुषा पुरुषेण आहारविहारादिसमस्तक्रियाः विधिपूर्वकं सम्पन्नाः कुर्वता प्राणायामं कृत्वा प्राणानां सूक्ष्मत्वे सति नासिकया बहिः निष्कासनं कर्तव्यम्। यथा दुष्टाश्वैस्सह युक्तं रथं सारथी लक्ष्यं प्रति नयति, तथैव इदं मनः सावधानेन सता वशे कर्तव्यम्।

बृहदारण्यकोपनिषदि प्राणायामस्य महत्वं कथयन् याज्ञवल्क्यः कथयति यत् प्राणेन प्राणनं कारयिता अर्थात् श्वासं ग्राहयिता, अपानेनापानं कारयिता, व्यानेन व्यानं कारयिता तथा उदानेनोदानं कारयिता आत्मा एव सर्वान्तरोऽस्ति।[26]

प्रश्नोपनिषदि कथितमस्ति यत् अस्मिन् शरीररूपिण्यां पुरि अर्थात् नगरे पञ्च प्राणरूपिणः अग्नयः जागृताः भवन्ति। अयमपानः गार्हपत्याग्निः वर्तते। व्यान एव अन्वाहार्यपचननामकोऽग्निरर्थात् दक्षिणाग्निः वर्तते। गार्हपत्याग्नेः गृहीतः आहवनीयाग्निरेव प्रणयनप्रक्रियायाः कर्ता अर्थात् उत्थाय नेतृत्वेन सः प्राण इति कथ्यते।[27]

बृहदारण्यकोपनिषदि पञ्चप्राणानां विषये कथयता कथितमस्ति यत् प्राणः, अपानः, व्यानः, उदानः, समानः एते शरीरे स्थिताः पञ्च वायवः सन्ति। अयमात्मा वाङ्मयः, मनोमयः, प्राणमय एवास्ति।

प्रश्नोपनिषदि प्राणवायोः विषये कथयता कथितमस्ति यत् सः प्राणः गुदायामुपस्थे चापानवायुं नियोजयति तथा स्वयं मुखनासिकयोः विचरन् नेत्रयोः श्रोत्रयोश्च प्रतिष्ठितो भवति। शरीरस्य मध्यभागे समानवायुरेव भवति। अयं समानवायुरेव अस्मिन् प्राणाग्नौ हुतमन्नं समस्तशरीरे समानतया वितरितं करोति। तस्मादेव प्राणरूपिनोऽग्नेः सप्त ज्वाला उत्पन्ना भवन्ति।[28]

कठोपनिषदि उक्तमस्ति यत् प्राणमूर्ध्वगामिनं कारयतः तथा अपानमर्वाग्गामिनं कारयतः हृदये स्थितस्य तस्य वामनस्यार्थात् सर्वश्रेष्ठस्य ब्रह्मणः समस्तदेवताः उपासनां कुर्वन्ति।[29]

मानवशरीरस्यान्त एव सः गुप्तमार्गोऽस्ति यस्य रहस्यं ज्ञात्वा योगसाधना सम्भवास्ति। हृदयस्य नाडीनां विषये छान्दोग्योपनिषदि कथितमस्ति यत् हृदये एकाधिकैकशतं नाड्यः सन्ति। तेष्वेका सुषुम्ना नाडी मस्तिष्कं प्रति गतास्ति। तया सुषुम्नया नाड्या उपरि गन्ता जीवः अमरत्वं प्राप्नोति। शेषाः अन्याः यत्र तत्र गत्र्यः नाड्यः केवलमुत्क्रमणस्यार्थात् बहिर्गमनस्य कारणभूताः भवन्ति। ताभ्यः अमरत्वस्य प्राप्तिः न भवति।[30]

एवम्प्रकारेण प्रश्नोपनिषदि कथितमस्ति यत् अयं जीवात्मा शरीरस्य हृदयप्रदेशे तिष्ठति। अस्मिन् हृदये मूलतः एकशतं नाड्यः सन्ति। तासु सर्वासु नाडीषु प्रत्येकस्य एकशतं शाखाः सन्ति तथा प्रत्येकं नाड्याः प्रत्येकं शाखायाः द्विसप्ततिसहस्रं प्रतिशाखाः सन्ति। एतासु शाखासु व्यानः वायुः विचरणं करोति।[31]

अन्यदपि कथितमस्ति यत् एतासु नाडीषु एका सुषुम्नापि वर्तते, तया उदानो वायुः उपरि प्रति विचरणं करोति। उदानः वायुरेव पुण्यकर्मभिः पुण्यलोकेषु तथा पापकर्मभिः पापयोनिषु नयति तथा पापपुण्यैः द्वाभ्यामपि कर्मभिः मनुष्यान् मानवशरीरे नयति।[32]

**प्रत्याहारः**

कठोपनिषदि प्रत्याहारस्य विषये कथयता कथितमस्ति यत् विवेकयुक्तया बुद्ध्या तथा नियन्त्रितमनसा सम्पन्नस्य मनुष्यस्य इन्द्रियाणि श्रेष्ठसारथेः नियन्त्रिताश्वा इव वशे भवन्ति।[33]

अन्यदपि कथितमस्ति यत् विवेकयुक्तबुद्धिरूपिणा सारथिना सम्पन्नः, मनरूपिणीः अश्वनियन्त्रकरज्जूः वशकर्ता मनुष्यः संसारसागरे पारे भूत्वा परब्रह्मणः पुरुषोत्तमस्य भगवतः तं सुप्रसिद्धं परमपदं प्राप्नोति।[34]

**ध्यानम्**

छान्दोग्योपनिषदि ध्यानस्य महत्वं कथयता कथितमस्ति यत् ध्यानं चित्तादुत्कृष्टं वर्तत इति। पृथ्वी, अन्तरिक्षम्, द्युलोकः, जलम्, पर्वतः, देवता, मनुष्याः वा ध्यानं कुर्वन्ति। अतः ध्यानस्य लाभांशस्य फलस्वरूपमेव मनुष्यः महत्तां प्राप्नोति। किन्तु क्षुद्राः कलहप्रियाः कर्णसूचकाः तथा अन्येषां समक्षं तेषामेव निन्दकाः तथा सामर्थ्यवन्तोऽपि ध्यानस्य लाभस्यांशस्य अर्जितारः सन्ति। अतः ध्यानस्य उपासना कर्तव्या।[35]

श्वेताश्वतरोपनिषद अनुसारं साधकेन स्वशरीरमधोऽरणिं तथा प्रणवमुपरिस्थामरणिं कारयित्वा ध्यानेन निरन्तरं मन्थनस्याभ्यासेन काष्ठे गुप्तोऽग्निरिव हृदये स्थितः परमात्मा द्रष्टव्यः।[36]

**समाधिः**

कठोपनिषदि समाधेरवस्थां परिभाषयता कथितमस्ति यत् यदा मनसा सहितानि पञ्च ज्ञानेन्द्रियाणि स्थिराणि भवन्ति तदा बुद्धिरपि चेष्टारहिता भविष्यति, तदा सा स्थितिः योगिभिः परमगतिरिति कथ्यते। उपर्युक्तानामष्टानामङ्गानां पालनेन जीवः मोक्षावस्थां प्राप्नोति।

कठोपनिषदि यमराजेन आत्मज्ञानं प्राप्य नचिकेतुः मोक्षस्य विषये कथयता कथितमस्ति यत् एवम्प्रकारेण यमराजेन प्रोक्तां तां विद्यां तथा सम्पूर्णस्यास्य योगस्य विधिं प्राप्य मृत्युना रहितः तथा सर्वथा शुद्धचेताः सन् नचिकेता ब्रह्मभावं प्राप्तः। अन्योऽपि कश्चन इमामध्यात्मविद्यामेवम्प्रकारेण जानाति सः एतादृशीं स्थितिं प्राप्नोति। अर्थात् मृत्व्यादिविकारैः रहितः सन् ब्रह्म प्राप्नोति।[37]

**क्रियायोगः**

मैत्रेयी इति उपनिषदि कथितमस्ति यत् चित्तमेव संसारोऽस्ति, अतः प्रयत्नपूर्वकं तस्य शोधनमत्यावश्यकं भवति। शान्तचित्ता व्यक्तिरेव आध्यात्मिकचेतनायाः विकासाय प्रयासरता भवितुं शक्नोति।[38]

महर्षिणा पतञ्जलिना अधिकारिणां भेदेन योगसाधनायाः प्रारम्भस्य विवेचनं कृतमस्ति। मध्यमकोट्या अधिकारिणः, यैः पूर्वजन्मनि योगसाधना प्रारब्धासीत्, तेषां कृते क्रियायोगः योगसाधनायाः प्रारम्भः कथितः। चित्तस्य स्थिरतायै याः क्रियाः क्रियन्ते सः क्रियायोग इति कथ्यते। क्रियायोगेन योगी ईश्वरस्य साक्षात्कारं प्रति उन्मुखो भवन् क्लेशेन रहितस्सन् समाधेरवस्थां प्राप्नोति। पातञ्जलयोगसूत्रानुसारं तपः, स्वाध्यायः, ईश्वरप्रणिधानम्, एते क्रियायोगाः कथिताः।[39]

**तपः**

स्वस्य योग्यताया अनुसारं स्वधर्मस्य पालने अनुभूयमानानां शारीरिकाणां मानसिकानां वा कष्टानां सहर्षतया सहनमेव योगिनः तपः वर्तते। तपः कायिकक्रियायोगोऽस्ति। व्यासभाष्यस्यानुसारं तपसा रहितस्य पुरुषस्य योगः सिद्धो भवितुं न शक्नोति। यतः अनादिकालतः बुद्धौ स्थिताः कर्म, क्लेशः, तथा चित्रविचित्राः वासनाः विषयजालेन आच्छादितायाः अशुद्ध्याः कारणेन तपसः अभावे नष्टाः न भवन्ति।[40]

अध्येयोपनिषत्सु नारदपरिव्राजकोपनिषदि सन्न्यासिभ्यः तपसा योगसिद्धेः प्राप्तेरुद्देश्यं कथयता कथितं यत् दुष्टजनानामाक्षेपः, अपमानम्, वञ्चना, दोषारोपणम्, इत्यादीनि शान्तमनसा सोढव्यानि। परेषां प्रताडने बद्धा स्थापने अथवा वृत्तौ बाधां प्रापयित्वा कष्टप्रदाने च विचलितो न भूत्वा शान्तेन एव भाव्यम्। अज्ञानिजनाः यदि शरीरेऽथवा परिवेशे मलमूत्रत्यागं कुर्युरथवा अन्यप्रकारकाणि कष्टानि दद्युः चेदपि तत्सर्वं सहनं कर्तव्यम्। परेभ्यः प्राप्त आदरः सम्माननं च योगसम्पत्तौ अत्यधिकां हानिं प्रापयतः। किन्तु अपमानितः योगी योगसिद्धिमवश्यं प्राप्नोति।[41]

परमहंसपरिव्राजकोपनिषदि परमहंसयोगिनः तप-उपार्जनस्य विषये कथयता कथितं यत् सः सन्न्यासी शैत्यम्, उष्णम्, सुखम्, दुःखः, मानम्, अपमानम्, इत्येतैः वर्जितो भवति। सः निन्दां क्रोधं च सहते। ब्रह्मोपनिषदि वर्णितमस्ति यत् अन्तःकरणे विद्यमान आत्मा सत्येन तपसा द्रष्टुं शक्यते।[43]

मैत्रेय्युपनिषदि तपसो विषये कथितमस्ति यत् तपसा सत्वमर्थात् ज्ञानं प्राप्यते। ज्ञानेन मनः वशे भवति। मनसि वशे जाते आत्मा प्राप्तो भवति। आत्मसाक्षात्कारेण अस्मात् नश्वराज्जगतः निवृत्तिरर्थात् मुक्तिः प्राप्यते।[44] एवम्प्रकारेणोपनिषदि तपसः स्वरूपं कथयता योगिनः कृते मुक्तेः मार्गः प्रशस्तो विद्यते।

**स्वाध्यायः**

व्यासेन मुनिना स्वभाष्ये ओंकारेत्यादीनां पवित्रनाम्नां जपस्तथा मोक्षप्रतिपादकशास्त्राणामध्ययनं स्वाध्याय इति कथितमस्ति।[45] स्वाध्यायः वाचिकक्रियायोगो वर्तते। अध्येयोपनिषत्सु शाट्यायनीयोपनिषदि तपसः स्वाध्यायस्य च विषये कथितमस्ति यत् एकाग्रचित्तेन सता भक्तिभावेन योगः, ईश्वरः, यज्ञः, गुरुः इत्येतेषां सेवा तथा मनसा कर्मणा वाण्या च अहिंसकेन सता यज्ञः सम्पादितव्यः।[46] समस्तोपनिषदामभ्यासः स्वाध्याययज्ञ इति कथितः। ओम् इत्यस्योच्चारणं कुर्वता ब्रह्मरूपिणि अग्नावात्मन आहुतिः प्रदीयते। अर्थात् आत्मा ब्रह्मणि लीनः क्रियते।[47]

सन्न्यासोपनिषदि कथितमस्ति यत् व्रतम्, यज्ञः, दानम्, तपः, होमः, स्वाध्यायः, सत्यम्, शौचः इत्येतैः हीना व्यक्तिः सन्न्यासदीक्षाया अधिकारिणी न भवति।[48] अर्थात् सन्न्यासग्रहणाय व्यक्ताविमे गुणाः अवश्यमेव भवितव्याः।

**ईश्वरप्रणिधानम्**

ईश्वरप्रणिधानं क्रियायोगस्यात्यधिकं महत्वपूर्णमङ्गमस्ति। व्यासभाष्यस्यानुसारं समस्तकर्माणि तथा क्रियाः परमगुरवे परमात्मने समर्पितव्याः तथा तेषां फलप्राप्तेः कामना न स्यात् अर्थात् कर्मकरणमेव ईश्वरप्रणिधानं कथ्यते।[49] अयं मानसक्रियायोगोऽस्ति।

अध्येयोपनिषदि नारदपरिव्राजकोपनिषदि ईश्वरप्रणिधानमर्थात् सन्न्यासिना ईश्वरं प्रति समर्पणभावनायाः उपदेशं ददता कथितमस्ति यत् सन्न्यासिना बहिः अन्तश्च सर्वत्रापि केवलमेकस्य नारायणस्य दर्शनं कुर्वता वायुरिव पापसम्पर्केण रहितेन सता मौनधारणं कुर्वता सर्वत्र विचरणं कर्तव्यम्।[50] इत्थङ्करणे एव लक्ष्यप्राप्तिः सम्भवास्ति।

निर्वाणोपनिषदि ईश्वरप्रणिधानस्य विषये कथयता कथितं यत् परमहंसः सन्न्यासी सन्न्यासस्यान्तिमायामवस्थायां ब्रह्मणः अखण्डाकारस्य स्थितौ प्राप्य अर्थात् ब्रह्मणा एकाकारो भूत्वा समस्तसंशयानां नाशं करोति।[51] एवम्प्रकारेण एव परब्रह्मोपनिषदि ईश्वरं प्रति समर्पणेन ईश्वरप्रणिधानं वर्णयता कथितं यत् यस्य सन्न्यासिनः चित्तं तस्मिन् ब्रह्मणि तत्परं भवत्यर्थात् समर्पितं भवति, सः परमात्मनि स्थितस्सन् आनन्दस्वरूपो भवति।[52]

**यमः -** कायिकः, मानसिकः, वाचिकश्च संयमः यम इति कथ्यते। अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहः इत्येते पञ्च यमाः भवन्ति।[53]

**अहिंसा-**

कांश्चिदपि जनान् प्रति कस्यचनापि कष्टस्याप्रापणम्, व्यासभाष्यस्यानुसारं सर्वथा सर्वदा समानपि प्राणिनः प्रति चित्तेऽप्यद्रोहः अहिंसा कथ्यते।[54] मुनिना पतञ्जलिना अहिंसायाः फलं कथयता कथितं यत् अहिंसायाः पूर्णतायां तस्य समीपवर्तिषु प्राणिषु वैरभावनायाः नाशो भवति।[55] नारदपरिव्राजकोपनिषदः अनुसारं सन्न्यासिना प्राणिनां हिंसातः सर्वथा दूरं तथा निःस्पृहेन भाव्यम्।[56] ये सन्न्यासिनः दम्भः, अहङ्कारः, हिंसा, कर्णजपः, इत्यादिभिर्दोषैः रहिताः भवन्ति तथात्मज्ञानस्योपयोगिगुणैर्युक्ताः भवन्ति, त एव मुक्तेरधिकारिणो भवन्ति।[57]

**सत्यम्-**

केनापि सह किम्प्रकारमप्यसत्यस्यावादनम्। व्यासभाष्यस्यानुसारं वाण्याः मनसश्च यथार्थता एव सत्यमिति कथ्यते।[58] पातञ्जलयोगसूत्रे सत्यस्याभ्यासस्य फलं कथयता कथितं यत् सत्यस्य प्रतिष्ठायामर्थात् दृढस्थितौ सत्यां योगिनः वाण्या या क्रिया भवति तत्र फलस्याश्रयो भवति।[59] अध्येये नारदपरिव्राजकोपनिषदि कथितं यत् सप्त - द्वे नेत्रे, द्वौ कर्णौ, द्वौ नासिकाछिद्रौ, एकं मुखम् इत्येतेषामनुभवेन जिह्वया नृतां वाणीं न वदेत् अर्थात् असत्यं नैव वक्तव्यम्।[60] अन्यदपि कथितं यत् सन्न्यासिना सत्यया वाण्या ज्ञानवैराग्याभ्यां युक्तेनेदं शरीरं प्रत्यासक्तिं त्यक्त्वावशिष्टे विशिष्टे देहे प्रतिष्ठितेन सता जीवितव्यम्।[61]

**अस्तेयम्-**

अचोरणमर्थात् व्यक्तेराज्ञां विना तस्याः वस्तुनामग्रहणम्। व्यासभाष्ये कथितं यत् शास्त्राज्ञायाः विरुद्धं धनादीनामन्येभ्यः स्वीकरणम्, यच्च शास्त्रे निषिद्धं वर्तते, तदस्तेयमिति कथ्यते।[62] मुनिः पतञ्जलिः स्तेयस्य

त्यागस्याभ्यासस्य फलं वर्णयन् कथयति यत् स्तेयस्य त्यागे स्थिराय मनुष्याय सर्वरत्नानां प्राप्तिः भवति।[63] अध्येयोपनिषद्यपि सन्न्यासिनास्तेयमर्थादचौरणम्, इत्यस्योपदेशः प्रदत्तः। यस्य वर्णनं पूर्वमेव कृतमस्ति।[64]

**ब्रह्मचर्यम्-**

इन्द्रियेषु संयम एव ब्रह्मचर्यमिति कथ्यते। व्यासभाष्यस्यानुसारमुपस्थेन्द्रियस्य संयमः ब्रह्मचर्यमिति कथ्यते।[65] योगसूत्रे ब्रह्मचर्यस्य फलं कथयता कथितं यत् ब्रह्मचर्यस्य सिद्धौ सत्यां बलस्य लाभो भवति।[66]

अध्येये कठरूद्रोपनिषदि कथितं यत् सन्न्यासिना प्रमादरहितेन ब्रह्मचर्यव्रतस्य धारणं कृत्वा जीवनं व्यत्येतव्यम्। स्त्रीदर्शनम्, स्पर्शः, क्रीडा, चर्चा, गुह्यविषयाणां वार्ता, कामसंकल्पः, सम्भोगाय प्रयत्नः, इत्येते अष्टप्रकारकाणि मैथुनानि विदुषा कथितानि सन्ति। उपर्युक्तानामष्टविधानां मैथुनानां त्यागरूपस्य ब्रह्मचर्यस्य पालनं मोक्षप्राप्तिरच्छुकेण साधकेन कर्तव्यम्।[67]

नारदपरिव्राजकोपनिषदि ब्रह्मणः जिज्ञासवे पुरुषाय निर्देशं ददता कथितं यत् ब्रह्मणः जिज्ञासुना व्यक्त्या आश्रमस्य नियमस्य पालने न कदापि प्रमादो नैव कर्तव्यः तथा ब्रह्मचर्यम्, अहिंसा इत्यादीनां यमानां पालनेऽपि सदैव सावधानतया भाव्यम्।[68]

**अपरिग्रहः-**

लोभवशादनावश्यकानां वस्तुनां सङ्ग्रहस्य निषेधोऽपरिग्रह इति कथ्यते। व्यासभाष्यस्यानुसारं विषयाणां प्राप्तिः, तेषां रक्षायाः चिन्ता, तेषां नाशस्य चित्ते क्षोभः, तैः सङ्गः, तेषां स्तेयम् इत्यादीनां विचाराणां कारणेन तेषां वस्तुनामस्वीकरणमेव अपरिग्रह इति कथ्यते।[69] पतञ्जलिः मुनिः अपरिग्रहस्याभ्यासस्य फलं कथयन् कथयति यत् अपरिग्रहस्य दृढस्थितौ सत्यां पूर्वजन्मनः प्रकारस्य बोधो जायते।[70]

नारदपरिव्राजकोपनिषदि कथितं यत् द्वे कौपीने, एकः कन्था, एकः दण्डः, इत्येतेभ्योऽधिकानां वस्तूनां सङ्ग्रहणे सन्न्यासिनोऽधिकारो नास्ति। यदि सोऽधिकानां वस्तूनां सङ्ग्रहं करोति तर्हि मृत्योः पश्चात् रौरवनरके गत्वा पुनः पशुपक्षीत्यादिषु योनिषु जन्म लप्स्यते।[71] परमहंसोपनिषदि कथितं यत् सन्न्यासिना स्वर्णादीनां सङ्ग्रहणे प्रवृत्तेन न भाव्यम्।[72] याज्ञवल्क्योपनिषदि कथितं यत् सन्न्यासिना भोजनं तावदेव याचितव्यं येनोदरपूर्तिः जायेत, यस्य सङ्ग्रहणस्य स्थितिर्नापद्येत।[73]

सन्न्यासोपनिषदि परिग्रहस्य स्वरूपं कथयता कथितं यत् कथितानां पात्राणां सङ्ग्रहणस्यापेक्षया एकस्यैव तुम्बीपात्रस्य ग्रहणं कर्तव्यम्। सन्न्यासिनो व्यवहाराय हेतवे यानि तुम्बी इत्यादीनि पात्राणि कथितानि

सन्ति तेषां हानिः पात्रलोपः कथितः। स्वस्य दण्डस्य लोपे सति अन्येषां दण्डस्य परिग्रहणं परिग्रहः कथ्यते। कालान्तरे भोगाय सङ्ग्रहं कृत्वा स्थापनमेव सञ्चय इति कथ्यते। शुश्रुषालाभः, पूजा, यशः इत्यादीनां कृते यत्नोऽपि परिग्रह इति कथ्यते। आत्मकल्याणाय करुणया युक्ता व्यक्तिः एव शिष्यत्वेन स्वीकर्तव्या। तदतिरिच्यान्यस्य शिष्यत्वेन स्वीकरणमपि सङ्ग्रह इति कथ्यते।[74]

परमहंसपरिव्राजकोपनिषद अनुसारं सन्न्यासी समस्तानामुपनिषदामर्थस्य समालोचनां कृत्वा ब्रह्मचर्यम्, अपरिग्रहः, अहिंसा, सत्यम्, इत्यादीनां यत्नतया रक्षणं कुर्वन् जितेन्द्रियः स्यात्।[75] तात्पर्यमस्ति यत् समग्रोऽप्युपनिषत्वाङ्मय उपर्युक्तानां गुणानामात्मसात्करणे बलं प्रददति। अतः सन्न्यासिनः कृत एतत् आवश्यकं भवति।

**उपसंहृतिः**

वेदशब्देन प्रायेण मूलत एत एव चत्वारो विषयाःसमुपचर्यन्ते। चतुर्षु भागेष्वपि भाग एको वर्तते उपनिषदाख्यः। उपनिषच्च अन्तिमो भागः निगद्यते। दर्शनशास्त्राणि अस्या एव विस्तीर्णतां यातानि। योगदर्शनस्थाः सर्वे विषया उपनिषदाधारिता वर्तन्ते। योगस्याष्टाङ्गैर्विवेकख्यातिरूपस्य ज्ञानस्य प्राप्तिं कृत्वा कैवल्यस्य प्राप्तिं करोति। वस्तुतः तमसः सतः प्रति अग्रे सरणस्य प्रक्रियायामावश्यकमस्ति- सद्विचाराः, सद्व्यवहारः, सदाचरणम्, सच्चरित्रम्, सात्विकजीवनम्, अष्टाङ्गयोगस्य साधना इत्येते अस्य लक्ष्यस्य प्राप्तौ सहायकाः सन्ति। आधिदैविका सृष्टिः मनुष्यस्यान्तरिकी सृष्टिः वर्तते। अस्यामेव तस्य सर्वा इच्छाः, वासनाः वा सञ्चिताः भवन्ति। एषा योगाग्निना दग्धबीजान्येव कर्तुं शक्यते। यम-नियम-आसन-प्राणायाम-प्रत्याहारा योगस्य बहिरङ्गसाधनानि कथितानि। उपनिषत्स्वमूषु योगाङ्गेषु परिगणितस्य यमस्य विशदतया विवेचनं निहितं वर्तते प्रस्तुतेनामुना ज्ञातुं शक्यते।

## पादटीका

1. शिवराम आप्टे कोष पृ. 839
2. पातञ्जलयोगसूत्रम् 1.1
3. योगदर्शनम् 1.1
4. योगसूत्रम् 1-2
5. योगसूत्रम् 1.1
6. योगसूत्रम्1.6
7. योगसूत्रम् 1.7
8. योगसूत्रम् 1.9
9. योगसूत्रम् 1.9
10. योगसूत्रम्1.10
11. योगसूत्रम् 1.11 1
2. योगसूत्रम्1.12
13. योगसूत्रम् 1.13
14. कठोपनिषद् 2.3.11
15.श्वेताश्वतरोपनिषद् 2.12
16. श्वेताश्वतरोपनिषद् 2.123
17. मुण्कडकोपनिषद् 2.1.7
18. मुण्कडकोपनिषद् 3.1.6
19. छान्दोग्योपनिषद् 8.5.4
20. छान्दोग्योपनिषद् 7.26.2
21.बृहदारण्यकोपनिषद्5.11.1
22. कठोपनिषद् 2.3.13
23. मुण्डकोपनिषद् 3-1-5
24. श्वेताश्वतरोपनिषद् 1.15
25. श्वेताश्वतरोपनिषद् 2.8
26. बृबदारण्यकोपनिषद् 3.4.1
27. प्रश्नोपनिषद् 3.5
28. प्रश्नोपनिषद् 3.5
29. कठोपनिषद् 2.3.16
30. कठोपनिषद् 2.3.16
31. प्रश्नोपनिषद् 3.6
32. प्रश्नोपनिषद् 3.7
33. कठोपनिषद् 1.3.6
34. कठोपनिषद् 1.3.9
35. छान्दोग्योपनिषद् 7.6.1
36. श्वेताश्वतरोपनिषत् 1.14
37. कठोपनिषद् 2.3.10
38. मैत्रेय्युपनिषद् 1.9-11
39. योगसूत्रम् 2.1
40. योगदर्शनम् 2.1
41. नारदपरिव्राजकोपनिषद् 5.55,56,57
42. परमहंसपरिव्राजकोपनिषद् 5
43. ब्रह्मोपनिषद् 19
44. मैत्रेय्युपनिषद् 1.6
45. योगदर्शनम्
46. शाट्यायनीयोपनिषद् 15
47. शाट्यायनीयोपनिषद् 16
48. सन्यासोपनिषत् 2.7
49. योगदर्शनम् 2.1
50. नारदपरिव्राजकोपनिषद् 5.63
51. निर्वाणोपनिषद् 60
52. परब्रह्मोपनिषद् 2
53. योगसूत्रम् 2.30
54. योगसूत्रम् 2.30
55. योगसूत्रम् 2.35
56. नारदपरिव्राजकोपनिषद् 3.34
57.नारदपरिव्राजक.उप 3.34
58. योगसूत्रम्, व्यासभाष्यम् 2.30
59. योगसूत्रम् 2.36
60.नारदपरिव्राजक.उप 3.43
61. नारदपरिव्राजकोपनिषद् 6.1
62. योगसूत्रम् 2.30
63. योगसूत्रम् 2.37
64. नारदपरिव्राजकोपनिषद् 4.10
65. योगसूत्रम् 2.30
66. योगसूत्रम् 2.38
67. कठरुद्रोपनिषद् 9,10,11
68. नारदपरिव्राजकोपनिषद् 6.30
69. योगसूत्रम् 2.30
70. योगसूत्रम् 2.39
71. नारदपरिव्राजकोपनिषद् 3.28
72. परहंसोपनिषद् 4
73. याज्ञवल्क्योपनिषद् 8
74. सन्यासोपनिषद् 2.100,101,102
75.परमहंसपरिव्राजकोपनिष5

# द्वैततत्त्वाधारितावतारतत्त्वम् अद्वैतप्रसङ्गश्च : पुराणतत्त्वविश्लेषणम्

**डॉ. देवाशिस कर्मकारः**
सहायकाचार्यः (संस्कृतम्)
ओडिशाकेन्द्रीयविश्वविद्यालयः
कोरापुट, ओडिशा

**सारांशः**

पुराणसाहित्ये साधारणतया सगुणब्रह्मणः स्वीकृतिः द्रष्टुं शक्यते। तत्र विविधसमयानुसारेण प्रयोजनानुसारेण चोपस्थितिरीश्वरस्यावताररूपाः पुराणेषु च प्रसिद्धाः। अत्र ईश्वरावतार ब्रह्मकल्पत्वेन परमेश्वरत्वेन स्तुवन्ति भक्ताः।

वस्तुतः पुराणेषु ब्रह्म परमेश्वररूपेण परमशक्तिरूपेण वा वर्णितम्। तत्र परमध्यानस्वरूपञ्चेदं ब्रह्म। तत्र विशिष्य पुराणसम्प्रदायभेदेषु विविधदेवतानां वर्णनमादीनि प्राप्यन्ते। तद्यथा – विष्णु-भागवतपुराणादिषु विष्णोः, शिव-वराह-स्कन्धपुराणादिषु शिवस्य, ब्रह्म-पद्मपुराणादिषु ब्रह्मदेवस्य च माहात्म्यं कीर्तितम्। एतादृशानां देवतानामुल्लेखोऽपि पुराणसाहित्ये परमशक्तिरूपेणैव कृतम्। अत्र पुराणभेदे विशेषतया विष्णुशिवब्रह्मादिदेवाः एव ब्रह्मरूपेण वर्णितमिति परिलक्ष्यते। यथा च विष्णुपुराणे विष्णुरेव ब्रह्म, शिवपुराणे शिवः एव ब्रह्मेति तत्र तत्र पुराणेषु वर्णितम्। तदुक्तम्-

**ब्रह्म प्रभुर्ब्रह्म स सर्वभूत ब्रह्म प्रजानां पतिरच्युतोऽसौ ।**
**ब्रह्माव्ययं नित्यमजं स विष्णुरपक्षयाद्यैखिलैरसङ्गि ।।**

(विष्णुपुराणम् १/१५/५७)

उपनिषत्परम्पराश्रितवेदान्तदर्शनस्य मूलभूतो विषयो ब्रह्मणः तत्त्वविश्लेषणम् । तत्रापि विशिष्य अद्वैतवेदान्तशास्त्रे ब्रह्मणा सह जीवस्याभेदकल्पनमालोचितम् ।

**कुञ्चिकाशब्दाः –** पुराणम्, उपनिषद् , अवतारः, सत्ता, ब्रह्म, ईश्वरः, भक्तिः।

**उपोद्घातः**

आचार्यशङ्करकृतसिद्धान्ते व्यवहारिक-प्रातिभासिक-पारमार्थिकश्चेति त्रिविधसत्ताः स्वीकृताः । तासु सत्तासु व्यवहारिक-प्रातिभासिकौ द्वौ वस्तुतः मिथ्याकल्पावेवानादित्वात्, प्रतीतित्वाच्च । पारमार्थिकसत्तायाः अस्तित्त्वं सद्रूपेण मन्यते । ब्रह्मणः पारमार्थिकं सत्यत्वं विद्यते, अतः त्रिकालाबाध्यरूपा पारमार्थिकी सत्ता ब्रह्मणः वर्तते। व्यवहारिकं वस्त्वित्युक्ते केवलं ब्रह्मज्ञानेन यद्बाधितं भवति तद्व्यवहारिकं वस्त्वित्युच्यते, व्यवहारिकस्य घटपटादिप्रपञ्चस्य पारमार्थिकेन ब्रह्मज्ञानेन बाधो भवति, अतः प्रपञ्चो व्यवहारिकः, मिथ्याभूत इत्यर्थः। प्रातिभासिकं नाम ब्रह्मज्ञानमात्रबाध्यत्वे सति व्यवहारज्ञानबाध्यमानत्वं प्रातिभासिकत्वम्,

स्वप्नदृष्टगजादयः जाग्रद्बोधेन बाधिताः भवन्ति। अतः ब्रह्मैव प्रधानविचार्यम्। तस्मात् **'अथातो ब्रह्मजिज्ञासा' (ब्रह्मसूत्रम् १/१/१)** इति प्रथमब्रह्मसूत्रेऽपि ब्रह्मणः जिज्ञास्यत्वं प्रथमतया प्रतिपादितम्।

अर्थात् ब्रह्म एव प्रभूः, अखिलप्रजानां च पतिस्वरूपम्। इदमच्युतमव्ययं नित्यमजमादिस्वरूपविशिष्टं ब्रह्म विष्णुरेव । अर्थात् विष्णुपुराणेऽस्मिन् विष्णुदेवः ब्रह्मरूपेण परिकल्पितः। The Advaitic Theism of The Bhāgavata Purāṇa – ग्रन्थे डेनियल महोदयेन लिखितम् – "Thus non-dual knowledge, which the Supreme Deity, whether as Puruṣa or Kṛṣṇa, is engaged with a universe evolving from him." (Daniel P. Sheridan. *The Advaitic Theism of the Bhāgavata Purāṇa,* pp. 24-25.)

तत्त्वचिन्तकाः यं प्रधानप्रकृतिरूपेण वर्णयन्ति, सैव महेश्वरः अव्यक्तरूपेण जगतः मूलकारणमिति । उक्तं तत्र –

**महेश्वरः परोऽव्यक्तश्चतुर्व्यूहः सनातनः।**
**अनन्तश्चाप्रमेयश्च नियन्ता विश्वतोमुखः।।**
**अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम्।**
**प्रधानं प्रकृतिश्चेति यदाहुस्तत्त्वचिन्तकाः।।** (कूर्मपुराणम् १/४/५,६)

एवंरूपेण विविधपुराणेषु परमात्मनः सगुणसम्पन्नेश्वराणां भिन्नरूपाण्यपि वर्णितानि। अतः आदौ तत्र संशयः उदेति किं प्रयोजनं अवतारस्य? किम् अद्वैततत्त्वपर्यालोचनावसरे अवतारप्रसङ्गस्य तत्त्वसामञ्जस्यम् अस्ति न वेति ?

एवम्बिधप्रश्नानां समुत्तरप्राप्तये शोधपत्रमिदं विहितम्।

**पद्धतिः**

शोधपत्रलेखनावसरे अद्वैतदर्शनेन सह पुराणसाहित्यस्य तुलनामूलकं पर्यालोचनं कृतम्। पुनश्च विषयवर्णनावसरे विश्लेषणात्मकपद्धतेः अनुसरणं कृतम्।

**पुराणप्रसिद्धावतारतत्त्वस्य अद्वैतरीत्या समीक्षा -**

अवतरणात् आविर्भावात् अवतारः इति शब्दः प्रयुक्तः। विविधकार्यहेतुतया ईश्वरस्य मर्त्यलोकं प्रत्यागमनमेवावतारशब्देन बोध्यते। एवञ्च ईश्वरस्य अवतारग्रहणस्य कारणरूपेण जगति बर्धमाना धर्मस्य ग्लानिरेव प्रधानरूपेण वर्णिता। पुराणेषु अवताररूपेण येषामुपस्थितिः दृश्यते ते एव परमेश्वररूपेण पुराणेषु पूज्यते। अर्थात् पुराणेषु परमेश्वररूपेण ईश्वरावतारः एव प्राप्यते। अतः पुराणेषु अद्वैतविचारप्रसङ्गः पुराणप्रसिद्धपरमेश्वरानां विचारस्यास्त्यावश्यकता। तस्मात् अवतारवादोऽत्र प्रस्तूयते।

पुराणेष्वाध्यात्मिकचिन्तनस्य मूलं भक्तिरूपमिति विवेचनीयम् । तत्र भक्तिर्नाम देवताभक्तयोरहैतुकी श्रद्धा , उभयोर्तादात्म्यसम्बन्धः । अर्थात् जीवरूपाः भक्ताः यथा अंशाः तथैव अंशीत्वेन देवतायाः ईश्वरस्य वा प्राधान्यं दृश्यते एव । पुराणेषु विविधशब्दैः ईश्वरास्तित्त्वं बहुशः स्वीकृतम्। अवतारेति शब्दः ईश्वरास्तित्वेन तत्र प्रामाणिकः । अव उपसर्गपूर्वकं √तॄ धातुना सह घञ् प्रत्ययस्य संयोगेन निष्पन्नो अयमवतारशब्दः । पाणिनिप्रदत्तसूत्रं यथा- अवे तॄस्त्रोर्घञ् (पा.सू. ३/३/१२०), यस्यार्थः कस्माच्चित् उच्चस्थानात् नीचस्थानं प्रति अवतरणम् अधो आगमनमिति । अनेन अर्थेनावतारशब्दः पुराणेषु प्रसिद्धः । उक्तञ्च विष्णुपुराणे –

**तस्य तच्चेतसो देवः स्तुतिमित्थं प्रकुर्वतः ।**
**आविर्बभूव भगवान् पीताम्बरधरो हरिः ।।**

(विष्णुपुराणम् १/२४/१४)

अर्थात् सरलतया अवतारः इति शब्दार्थः यथा स्वरूपं परित्यज्य कार्यवशतः कार्यसमाप्त्यर्थं नवीनरूपधारणमेव अवतारः।

पुराणेषु अवतारकल्पना प्रचलिता आसीत्। परम्परानुसारेण कदाचित् भगवान् स्वदिव्यमूर्त्तिं सर्वथा परित्यज्य अथवा भिन्नरूपेणाविर्भवति। तत्र देवाविर्भावस्य कारणमपि पुराणेषु स्पष्टं लिखितम् –

**यदा यदा त्वधर्मस्य वृद्धिर्भवति भो द्विजाः ।**
**धर्मश्च ह्रासमभ्येति तदा देवो जनार्दनः ।।**
**अवतारं करोत्यत्र द्विधाकृत्वाऽऽत्मनस्तनुम् ।**
**सर्वदैव जगत्यर्थे स सर्वात्मा जगन्मयः ।।**
**स्वल्पांशेनावतीर्योर्व्यां धर्मस्य कुरुते स्थितिम् ।।**

(ब्रह्माण्डपुराणम् ७२/२-३,९)

वस्तुतः समाजेऽधर्मस्य वृद्धिर्भवति चेत्तस्य दुरीकरणेन सह धर्मस्य प्रतिष्ठाय ईश्वरस्य अंशरूपेणावतारस्यावतरणं भवति ।

तत्र श्रीमद्भगवद्गीतायामपि उल्लिखितम्-

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।**
**परित्राणाय साधूनां विनाशाय च दुष्कृतां**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।** (श्रीमद्भगवद्गीता ४/७-८ )

श्लोकस्य भाष्यप्रसङ्गे भाष्यकारेण शङ्कराचार्येनोक्तम्-

**"अभ्युत्थानम् उद्भवः अधर्मस्य तदा आत्मानं सृजामि अहं मायया।**
**....धर्मसंस्थापार्थाय धर्मस्य सम्यक् स्थापनं तदर्थं सम्भवामि युगे युगे प्रतियुगम् ।"**

(गीताशाङ्करभाष्यम् ४/७-८)

तत्र पुराणप्रवेशग्रन्थे गिरीन्द्रशेखरवसु-महाशयेन प्रसङ्गोऽयमुल्लिखितम् – **"বিভিন্ন দেবতা যেমন মনুষ্যরূপে ধরাতলে অবতীর্ণ হন, সেইরূপ উত্তম মনুষ্যও প্রতিলোম ক্রিয়ায় দেবতায় পরিণত হন । বেদেও এরূপ ব্যাপারের ভূরি ভূরি উদাহরণ আছে।" ( गिरीन्द्रशेखर वसु, पुराणप्रवेश, पृ.११)**
अर्थात् वेदेषु प्राप्यते यत् विविधदेवाः मनुष्यरूपेण धरातलेऽ वताररूपेण आगताः। अर्थात् पुराणप्रसिद्धावताराः वेदेष्वपि प्रसिद्धाः आसन्। तत्रैव उक्तम् – **"মনুষ্য, দেবতা ও সূর্য এই ত্রিবিধরূপেই ইন্দ্রের কীর্তিকলাপ বর্ণিত হইয়াছে। কেবল জ্যোতিষিক রূপক মনে করিলে স্তবের সন্তোষজনক ব্যাখ্যা পাওয়া যাইবে না। কৃষ্ণ মনুষ্য, কৃষ্ণ নারায়ণ, কৃষ্ণ সূর্য ।" (गिरीन्द्रशेखर वसु, पुराणप्रवेश, पृ.१२)**

वस्तुतः छान्दोग्योपनिषदि **'देवकीपुत्रायोक्त्वोवाचापिपास' (छान्दोग्योपनिषद् ३/१७/६)** इत्यस्मिन् मन्त्रे कृष्णस्य देवकीपुत्ररूपेण वर्णनमस्ति । तेनाधारेणापि वेदप्रसिद्धकृष्णस्य पुराणप्रसिद्धत्वमिति स्वीक्रियते। पुनश्च बलदेव उपाध्यायेनापि प्रसङ्गत्वेनोक्तम् -" वासुदेव शब्द का उल्लेख न होने पर भी देवकी पुत्र विशेषण ही दोनों के ऐक्यसाधन के लिए पर्याप्त माना जाता है । इसलिए कृष्णावतार की सूचना वेद-प्रतिपाद्य ही है" । (बलदेव उपाध्याय, पुराणविमर्श, पृ. १९०) एवं प्राप्ते वेदप्रतिपाद्यविष्णुः एव पुराणप्रसिद्धः इति समाधयितुं शक्यते इति।

तत्र पुराणेषु विष्णोः चतुर्विंशति अवताराः उल्लिखिताः। तद्यथा– १. सनकादि ऋषिः, २. वराहः, ३. नारदः, ४. हंसः, ५. नर-नारायणः, ६. कपिलः, ७. दत्तात्रेयः, ८. यज्ञः, ९. ऋषभदेवः, १०. पृथुः, ११. मत्स्यः, १२. कूर्मः, १३. धन्वन्तरिः, १४. मोहिनीः, १५. हयग्रीवः, १६. नृसिंहः, १७. वामनः, १८. गजेन्द्रोद्धारावतारः, १९. परशुरामः, २०. वेदव्यासः, २१. रामः, २२. कृष्णः, २३. बुद्धः, २४. कल्किः इति। एतेषु प्रमुखाः दश अवताराः प्रसिद्धाः। पुराणविमर्श-ग्रन्थे प्रसङ्गतः लिखितं – **"प्रथम सूची के २२ नामों में हंस तथा हयग्रीव अवतारों को सम्मिलित कर देने पर संख्या २४ हो जाती है"। (बलदेव उपाध्याय, पुराणविमर्श, पृ. १७३-७४ )**

शास्त्रान्तरे प्रधान-पुरुषत्वेन यस्य वर्णनं दृश्यते सः परमाराध्यः। अस्य विशुद्धत्वाद्व्यापकत्वादलौकिकत्वाच्च सूरयः एव तं लब्धुं शक्नुवन्ति।

उक्तञ्च-

**प्रधान-पुरुषव्यक्तकालानां परमं हि यत् ।**

**पश्यन्ति सूरयः शुद्धं तद् विष्णोः परमं पदम् ।।**

(विष्णुपुराणम् १/२/१६)

एवञ्च पौराणिकिशास्त्रानुसारेण विष्णुर्नामकदेवताख्यः निर्गुणत्वेन कल्पितम् ।

दर्शनसाहित्ये बहवः मतप्रवक्तारः सन्ति येषां मतानुसारेण ईश्वरस्य अस्तित्वविषये विविधमतानि प्रचलितानि सन्ति, तेषामालोचना अधो प्रस्तूयते-

श्रीरामानुजस्य विशिष्टाद्वैतवादे शुद्धचैतन्यरूपं परब्रह्मैव ईश्वरपदेन पुरुषोत्तमपदेन चाभिधीयते। रामानुजाचार्येण मन्यते तद्ब्रह्मैव कल्याणकर्तारः ईश्वरः। श्रीभाष्ये उक्तम्- **"ब्रह्मशब्देन स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते। सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः। बृहत्त्वञ्च स्वरूपेण गुणैश्च यात्रानवधिकातिशयं, सोऽस्य मुख्यार्थः, स च सर्वेश्वर एव।"**
( श्रीभाष्यम् १/१/१)

अतः शुद्धचैतन्यस्वरूपं सच्चिदानन्दं एवेश्वरः इति। सर्वदर्शनसंग्रहे माधवाचार्येण भोक्तृ-भोग्य-नियामकत्वेन रामानुजाचार्यः चिदचिदीश्वरश्चेति भेदेन त्रयः पदार्थाः एव व्यवस्थिताः। तदुक्तम्-

**ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः।**

**ईश्वरश्चिदिति प्रोक्तो जीवो दृश्यमचित्पुनः।।**

(सर्वदर्शनसंग्रहः ४/३६)

निम्बार्कमते ईश्वरः परब्रह्म-नारायण-पुरुषोत्तम कृष्णादिनामभिरभिहितः। समस्ताविद्यास्मितादि-दोषशून्योऽशेषकल्यानगुणविशेषनिधानश्च ईश्वरः। उक्तञ्च दशश्लोक्याम्-

**स्वंभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् ।**

**व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्ययेम कृष्णं कमलेक्षणं हरिम् ।।**

(दशश्लोकी ४)

माध्वमतानुसारेण विष्णुरेव ईश्वरः। निरतिशय-निरवधिकानन्तगुणवान् स ईश्वरः। सः उत्पत्ति-स्थिति-प्रलयादीनां कर्ता। जीवाज्जडप्रकृतेश्च सः सर्वथा भिन्नो विलक्षणश्च।

न्याय-वैशेषिक-योगादिदर्शनेषु ईश्वरस्य जगतो निमित्तकारणमात्रत्वमेव स्वीकृतं न तूपादानकारणम्। प्रसङ्गतो युक्तिः प्रादर्शयत् – **'जन्माद्यस्य यतः'** इति सूत्रस्थिते यतः इति पदे हेत्वर्थे पञ्चमीविभक्तिर्विहिता। अपि च **'स ईक्षाञ्चक्रे' (प्रश्नोपनिषद् ६/३), 'स प्राणाम् असृजत' (प्रश्नोपनिषद् ६/४)**-इत्यादिषु श्रुतिषु

ब्रह्मणः यत् ईक्षणपूर्वकं कर्तृत्वमुक्तं तत्तु तस्य निमित्तकारणत्वमेव विनिर्दिशति। यतो हि ईक्षणशब्दः आलोचनापूर्वककर्तृत्वमेव बोधयति। आलोचनापूर्वकं यत्कर्तृत्वं तन्निमित्तकारणस्यैव भवति ।

तत्राद्वैतमतेऽज्ञानोपहितं चैतन्यमीश्वरपदेनाभिहितम्। शुद्धचैतन्यं तुरीयचैतन्यं ब्रह्म वा यदा समष्ट्यज्ञानरूपेणोपाधिनोपहितं भवति तदा सः ईश्वरपदेनोच्यते। वेदान्तसारे आचार्येण सदानन्दयोगीन्द्रेण तदेवोक्तं यत् – **"इयं समष्टिः उत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व सर्वनियन्तृत्वादिगुणकमव्यक्तमन्तयामी जगत्कारणमीश्वर इति च व्यपदिश्यते...।" (वेदान्तसारः ३७-३८)**

अतः ईश्वरः न तु ब्रह्मणोऽतिरिक्तः कोऽपि तत्त्वविशेषः। द्वयमप्येकस्यैव तत्त्वस्यावस्थाविशेषौ। ब्रह्म अज्ञानोपहितः सन् ईश्वरपदवाच्यः भवति। निर्विशेषं ब्रह्म उपहितं सन् ईश्वराभिधानेन सर्वज्ञः सर्वेश्वरः सर्वनियन्तृत्वादिगुणविशिष्टः जगत्कारणञ्च भवति। अतः ब्रह्म ईश्वरश्च स्वरूपतोऽभिन्नौ। अचिन्त्यरचनात्मकस्य जगतः सृष्टिस्थितिलयानां कारणत्वेन ईश्वरपदवाच्यो ब्रह्म एव उद्घोषितम्। ब्रह्मसूत्रान्तरगते **'जन्माद्यस्य यतः' (ब्रह्मसूत्रम्१/१/२)** इत्यस्मिन् सूत्रे भाष्यकारैः निगदितं यत्– **"अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकाल-निमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति, तद् ब्रह्मेति वाक्यशेषः।"** (ब्रह्मसूत्रशाङ्करभाष्यम् १/१/२)

अपि च ईश्वरस्य सगुणरूपे कर्तृत्वभोक्तृत्वादि गुणाः समाविष्टाः, परन्तु निर्गुणे ब्रह्मपदवाच्ये परमेश्वरे गुणानां समावेशः न सम्भवति। तदुक्तं भागवते -

**बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ।**
**गुणस्य मायामूलत्वात् न मे मोक्षो न बन्धनम् ।।**

(भागवतपुराणम् ११/११/१)

अर्थात् बद्ध-मुक्तश्चेत्यादयः शब्दाः गुणानां कारणीभूताः, न परमर्थेन परमेश्वरे व्याख्या भवितुमर्हति , गुणाः मायामूलकत्वात् न परमेश्वरस्य बन्धो भवति न वा मोक्षस्य प्रयोजनं तस्य विद्यते।

एवञ्च समष्ट्यज्ञानोपहितं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्तृत्वादि गुणविशिष्टं जगत्कारणम् ईश्वरः, स च सगुणविशिष्टः, परन्तु परमात्मा निर्गुणमेव इति अद्वैतवादीनामीश्वरास्तित्वजनितसिद्धान्तः।

## सन्दर्भग्रन्थाः


1. आप्टे, विनायक गणेश, सम्पादकः । *ब्रह्मवैवर्त्यपुराण* । आनन्दाश्रम मुद्रालय,१९३९।
2. *ईशादि-नौ-उपनिषद् शाङ्करभाष्यार्थसहित* । गौरखपुर : गीताप्रेस, वि.सं. २०६८(२०११ खी.) ।
3. उपाध्याय, कन्हैयालाल, अनुवादकः। *श्रीमद्भागवत* । मुरादावाद : तंत्रप्रभाकर, १९५८ ।

4. उपाध्याय, बलदेव । *पुराणविमर्श* । वाराणसी : चौखाम्बा विद्याभवन, १९६५ ।
5. उपाध्याय, बलदेव । *भारतीय दर्शन की रूपरेखा* । वाराणसी : चौखाम्बा ओरियन्टालिया, १९७९।
6. उपाध्याय, बलदेव । *संस्कृत साहित्य का इतिहास* । काशी : हिन्दु विश्वविद्यालय, १९५८ ।
7. गोयेन्दका, हरिकृष्ण, सम्पादकः। *कूर्मपुराण* । गोरखपुर : गीताप्रेस , वि.सं. २०७२ ( २०१२ ख्री. )।
8. गोयेन्दका, हरिकृष्ण, सम्पादकः। *छान्दोग्योपनिषद्* । गोरखपुर : गीताप्रेस ,वि.सं. २०६८ (२०१० ख्री. ) ।
9. गोयेन्दका, हरिकृष्ण, सम्पादकः। *श्रीमद्भगवद्गीता : शाङ्करभाष्यसहिता* । गोरखपुर : गीताप्रेस, वि.सं. २०६९ (२०१२ ख्री.) ।
10. गोयेन्दका, हरिकृष्ण, सम्पादकः। *वेदान्तदर्शनम् : ब्रह्मसूत्र हिन्दीव्याख्यासमन्विता*। गोरखपुर : गीताप्रेस्, २०२० ।
11. गुप्त, श्रीमुनिलाल, सम्पादकः। *श्रीविष्णुपुराण : हिन्दी अनुवादसहित* । गोरखपुर : गीताप्रेस, वि.सं. २०७२ (२०१५ ख्री.)।
12. गौतम, चमन लाल, सम्पादकः। *ब्रह्माण्ड पुराण* । वरेली : संस्कृति संस्थान , २०१३।
13. घोष, गोविन्दचरण। *भारतीय दर्शन* । कोलकाता : मित्रम्, २०१२ ।
14. चट्टोपाध्याय, रामपद। *ब्रह्मसूत्र ओ श्रीमद्भागवत* । तृतीय खण्ड । कलिकाता : फार्मा के.एल.एम.प्राइवेट लिमिटेड, १९८० ।
15. चट्टोपाध्याय, रामपद । *वेदान्तप्रवेश* । कलिकाता : भारती भवन, बं१३४३ (१९३६ ख्री.) ।
16. चट्टोपाध्याय, सतीशचन्द्र, च धीरेन्द्रनाथ दत्त । *भारतीय दर्शन* । पटना : पुस्तक भण्डार, २०१७।
17. चतुर्वेदी, गिरिधर शर्मा । *उपनिषद् परिशीलनम्* । जयपुर : राष्ट्रीय संस्कृत साहित्य केन्द्र , २०१२।
18. वसु, गिरीन्द्रशेखर। *पुराणप्रवेश* । कलिकाता : बङ्गीय-साहित्य परिषत्, १९५१ ।
19. सदानन्दयोगिन्द्र। *वेदान्तसार* । सम्पादकः, विपदभञ्जन पाल । कोलकाता : संस्कृत पुस्तक भाण्डार, बं १४१७ (२०११ ख्री.)
20. Balasubramanian, R., and D. P. Chattopadhyaya, editors. *History of Science Philosophy and Culture in Indian Civilization.* Vol. II. New Delhi : Pauls Press, 2010 .
21. Mani, Vettam. *Puranic Encyclopaedia a comprehensive dictionary with special reference to the epic and Puranic literature*. Delhi: Motilal Banarsidass, 1975.
22. Sheridan, Daniel P. *The Advaitic Theism of The Bhagavata Purana*. Delhi: MLBD, 1986.

# अथर्ववेदसंहितानुसारेण आयुर्वेदस्वरूपम्

**डॉ.सुदेवः**
सहायकाध्यापकः, संस्कृतविभागः,
पाँचमुड़ा महाविद्यालयः,
बाँकुड़ा,पश्चिमबङ्गः

प्रागैतिहासिककाले विविधज्ञान-विज्ञानक्षेत्रेषु भारतीयचिन्तकानां योगदानं सर्वोत्तमं वर्तते। वेदः समग्रज्ञानविज्ञानस्य मूलाधारोऽस्ति। विद-ज्ञाने, विद-सत्तायाम्,विदलृ-लाभे,विद-विचारणे एतेभ्यो 'हलश्च' इति सूत्रेण करणाधिकरणकारकयोर्घञ्प्रत्यये कृते वेदशब्दः साध्यते। यच्च विशेषज्ञानं तत् विज्ञानम् । यस्य माध्यमेन अस्माकं सर्वं ज्ञानमुत्पन्नं भवति तत् विज्ञानम्। महर्षिदयानन्दपादैर्भणितम्- **उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम्। पुरो यदस्य सम्पिणक्**।[1] मन्त्रोक्तेन वेदशब्देन विज्ञानमिति अवगम्यते **"वेदनम्-विज्ञानम्"** । आचार्यमनुनापि उक्तं- **'सर्वज्ञानमयो हि सः'**[2] अर्थात् वेदः सर्वज्ञान-विज्ञानस्य च भण्डारोऽस्ति। वैदिकवाङ्मये बहु वैज्ञानिकतथ्यानि उपलभ्यन्ते।

वेदः सर्वज्ञानस्य आदिस्रोतः वर्तते। आयुर्वेदः च अथर्ववेदस्य भागोऽस्ति। अतः वेदानां प्राचीनतायाः सह आयुर्वेदस्य प्राचीनता स्वतैव सिद्धति। सुश्रुतस्य मते आयुर्वेदः सृष्टेः प्राक् ब्रह्मणा रचितवन्तः-**"इह खलु आयुर्वेदो नाम यदुपांगमथर्ववेदस्यनुत्पाद्यैव प्रजाः श्लोकशतसहस्रमाध्यायसहस्रञ्च कृतवन् स्वयम्भूः"** ।[3]

**आयुर्वेदः पुण्यतमवेदः -**

आयुर्वेदः विद्वद्भिः आदरणीयः पुण्यतमवेदः इति स्वीकृतः। अन्ये चत्वारः वेदाः परलोकफलं हितकरं भवति किन्तु आयुर्वेदः इहलौकिक-पारलौकिकयोः जनानां कृतेऽपि हितकरोऽस्ति। अस्य स्वकीयविशेषणात् अन्येषां वेदानां इव महत्वं धारयति। अतएव महर्षिचरकेन आयुर्वेदः पुण्यतमवेदः इत्युच्यते—

**तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।**
**वक्ष्यते यन्मनुष्यणाम् लोकयोरुभयोर्हितम्।**।[4]

सुश्रुत-काश्यपादि आचार्यैः आयुर्वेदं अथर्ववेदस्य उपवेदत्वेन स्वीकृतम्, महर्षि काश्यपः तु आयुर्वेदं पञ्चमवेदं इति मन्यते। ब्रह्मवैवर्तपुराणे आयुर्वेदस्य पञ्चमवेद इति प्रमाणं प्राप्नुमः। "**पञ्चमंभास्कराय: ददौपून:**"[5]

सुश्रुतसंहितानुसारं पितामहः ब्रह्मा लोकहिताय सहस्राध्यायेषु विभक्ताः 'ब्रह्मसंहिता' इति आयुर्वेदशास्त्राणि प्रणितवन्तः। अथ ब्रह्माद् प्रजापतिः, प्रजापतितः अश्विनीकुमारद्वयः, अश्विनीकुमारद्वयात् इन्द्रः, इन्द्रात् धन्वन्तरिः शास्त्रमिदम् अवाप्तवान्। धन्वन्तरीतः श्रुत्वा सुश्रुतमुनिः आयुर्वेदस्य रचितवान्।[6]

**आयुर्वेदः जीवनविज्ञानम्** - चरकसंहितायामुक्तं यत् आयुर्वेदः तत् विज्ञानं येन पुरुषस्य जीवनम् अर्थात् वयः शारीरिक-मानसिक-उभयरोगेभ्यः मुक्तः। तस्य इन्द्रियाणि इन्द्रियाणि विषयाणि च स्वस्थाः सन्तः सर्वान् व्यवहारान् पर्याप्तरूपेण कर्तुं समर्थाः। एतदतिरिक्तं तस्य दुःखदजीवनस्य अवगमनमपि प्रददाति।[7] आयुर्वेदः तत् विज्ञानं यत् मनुष्यं सदाचारविषये उपदिशति, अन्यजीवैः सह सद्वृत्त्या गमनाय च समर्थं करोति। मानसिकप्रगतेः सह परोपकारकार्यं कृत्वा प्रज्ञापूर्णः भूत्वा तस्य जीवनं हितप्रदं करोति तथा च तत्सहितं हानिकारकजीवनस्य विषयेऽपि अवगतं करोति। आयुर्वेद इति शास्त्रं मन्यते येन वयसः मूल्यं ज्ञातुं शक्यते। इदं मूल्यं इन्द्रियाङ्गमनसबुद्धेः विकृतलक्षणानाम् अरिष्टलक्षणानामुद्भवात् च सिद्धिभ्यः प्राप्यते। एवं प्रकारेण यस्मिन् पुस्तके आयुः सम्बद्धाः सर्वे विषयाः तर्कसंगतरूपेण सुन्दरं वर्णिताः, तस्य आयुर्वेदः इत्युच्यते ।

आचार्य सुश्रुतः आयुर्वेदस्य लक्षनम् कृतम्-**"आयुरस्मिन् विद्यतेहनेन बाह्हयुर्विन्दतीत्ययुर्वेदः,"**[8] एतद् अपि **"तदायुर्वेद यतीत्यायुर्वेदः"**।[9] अपि च[10]- **आयुर्वेदस्य कः प्रयोजनमस्ति? "प्रयोजनं चास्य स्वस्थस्य स्वस्थ्यरक्षणमातुरस्य विकारप्रशमनं च",**[11] **"धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तमम्। रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च॥**[12] धर्मार्थकाममोक्षाः पुरुषार्थचतुष्टयं मानवजीवनस्य मूलमुत्तमम्। सति जीवने नीरोग, स्वस्थे दृष्टेपुष्टे च मानसिकविकाशे मानवस्य सर्वोऽप्यभिलाषः। यदि साधनरूपशरीरं बलसंयुक्तं भविष्यति तर्हि निर्विघ्नरूपेण कार्यस्य परिसमाप्तिरपि निर्विघ्ना भविष्यति। **'शरीरमाद्यं खलु धर्मसाधनम्' इत्युच्यते।** आरोग्यस्य विषये चरकसंहितायां कथितमस्ति यत्- "लाघवं कर्मसामर्थं स्थैर्यं दुःखसहिष्णुता। दोषक्ष योऽग्निवृद्धिश्च व्यायामादुपजायते।" इति, अतः स्वस्थशरीरे युक्ताहारविहारेण सह योगाभ्यासस्य व्यायामस्य चापि आवश्यकता भवति। उच्यते- भवति आयुर्वेदः।[13] आचार्य चरकः सुखं च दुःखं विषये अभिमतम् यत्,[14] एतद् अपि चरकः उच्यते-"हितैषिणः पुनर्भूतानां परस्वादुपपरतस्य सत्यवादिनः शमपरस्य परीक्ष्यकारिणोऽप्रमत्तस्य त्रिवर्ग परस्परेणानुपहतसेवमानस्य पुजार्हसम्पुजकस्य ज्ञानविज्ञानोपशमशीलस्य वृद्धोसेविनः सुनियतरागरोषेर्ष्यामदमानवेगस्य सततं विविधप्रदानपरस्य तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोकमिमं चामुं वावेक्षमाणस्य स्मृतिमतिमतो हितमायुरुच्यते। अहितर्मततो विपर्ययेण।[15] इन्द्रेन आचार्य भरद्वाजं प्रति उपदेश प्रदीयते स्म - "हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम्। त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः।"[16] अत्र आयुर्वेदस्य त्रयकारणेन शाश्वतः इति सुचयति- "सोऽयमायुर्वेदः शाश्वतो निर्दिश्यते, अनादित्वात् स्वभावसंसिद्धलक्षणत्वाद् भावस्वभावनित्यत्वाच्च।"[17] प्राचीन ऋषिना आयुर्वेदः 'शाश्वतः' इति मन्यन्ते। अतः चरक संहितायाम् कथितमस्ति यत्- "सोऽयमायुर्वेदः शाश्वतो निर्दिश्यते, अनादित्वात्, स्वभावसंसिद्धलक्षणत्वात्, भावस्वभाव नित्यत्वाच्च।"[18]

सुखिनोऽवलोकयितुमभिलषते। अष्टाङ्गयोगसाधनेन साधकः स्वचित्तवृत्तिनिरोधाद् ऐकान्तिकम् आत्मन्तिकम् आत्मान्तिकं च सुखं विन्दति, मोक्षं च अधिगच्छति।

**आयुः चतुर्विधः** - महर्षिचरकेन उक्तं यत् मनुष्याणां जीवनं यथा अस्मिन् जन्मनि कृते पूर्वोक्तकर्मपुरुषानुसारं फलं प्रददाति तथा न भवति। चरकस्य मते चत्वारः आयुः(वयसः) भेदाः प्रोक्ताः, तेषां लक्षणं यथा-

**क.हितायुः[19] लक्षणम्-** सर्वेषां परोपकारी, लोलुपः, शान्तः, विवेकी, नित्यं जागरूकः, धर्म-अर्थ-काम-सन्तुलनं निर्वाहनकर्ता, पूज्यपूजकः, मनोविकार-रहितः, सहिष्णुः, स्मृतिशीलः, बुद्धिमानः च जनः 'हितायुः' भवति।

**ख.अहितायुः लक्षणम्-** परहानिकारकः, तस्करः, उद्धतः, अधार्मिकः, निर्धनः, अज्ञानी, मानसिकविकारग्रस्तः, विषयासक्तः, कामे लीनः, असहिष्णुः, अविवेकी, स्मृतिभ्रष्टः, धृतिभ्रष्टः, बुद्धिभ्रष्टः, दुर्भावनापूर्णः, कुटिलः, आलसी व कर्तव्याकर्तव्यज्ञानहीनः जनः ‘अहितायुः’ अस्ति।

**ग.सुखायुः लक्षणम्**– शारीरिकं मानसिकं वा रोगं मुक्तम्, यौवनपूर्णः, शक्ति-वीर्य-यश-समृद्धः,उच्चमनोबलं, महत्धनं,उपयोगी संसाधनैः सह सम्पूर्णं जीवनं परिपूर्णतया सन्तुष्टः स्वतन्त्रः च जनः ‘सुखायुः’ भवति।
**घ.दुःखस्य लक्षणम्** - रोगी, वृद्धः, असमर्थः, दुर्बलः, अन्धः, बधिरः, आश्रितः,दरिद्रः, साधनहीनः जनः ‘दुःखायुः’ इति कथ्यते।

**रोगानाम् उत्पत्तिकारणानि** – रोगानाम् उत्पत्तिसम्बन्धे चरकसंहितायां निम्नलिखितसूत्रं प्रदत्तम्- **यदा ह्यस्मिन् शरीरे धातवो वैषम्यमापद्यन्ते तदा क्लेशं विनाशं वा प्राप्नोति । वैषम्यगमनं हि पुनर्धातूनां वृद्धि ह्रास गमनम्।** अर्थात् षड्धातवः पुरुषशरीरस्य धातुषु यदा विषमता भवति इति यावत्। यदि कश्चित् धातुः वर्धते, केचन न्यूनाः च भवन्ति तर्हि एतादृशविषमता कारणात् शरीरं व्याधिं प्राप्नोति नश्यति वा। एतेन शरीरे धातुविषमतायां रोगाः उत्पद्यन्ते इति सिद्धम्। रोगनिदानविषये अग्रे लिखितम्-
**तदेवतस्मात् भेषजं सम्यकवचर्यमाणं युगपन्यूनातिरिक्तानां धातूनां साम्यकरं भवति, अधिकमपि कर्षति न्यूनं आप्याति।।** अर्थात् धातुसन्तुलनं वर्धितानां धातुनां न्यूनीकरणेन, न्यूनीकृतधातूनां च सम्यक् विचारेण औषधानां प्रयोगेन आनयनं भवति, एतेन धातुसन्तुलनात् शरीरं स्वस्थं तिष्ठति इति सिद्धं भवति।
चरकसंहितायां एव विकारसम्बन्धे निम्नलिखितसूत्रं प्रदत्तम्- **“विकारो धातु वैशम्यं साम्यं प्रकृतिरुच्यते”** अर्थात् धातुविषमता विकारः तस्य साम्यं च आरोग्यमित्युच्यते। महर्षिचरकेन सूत्रेण उक्तम्-

**येषामेव हि भावनां संपत् संजनयेन्नरम् ।**
**तेषामेव विचद्व्याधीन् विविधान्समुदीरयेत्।।**

अर्थात् यस्मात् प्रकृतविस्तारगुणाः उत्पद्यन्ते तेषां व्यञ्जनानां वा सजातीयानां भूतानाम् स्वरूपम्। मनुष्यरोगाः दोषाद् उत्पद्यन्ते विकृतत्वादित्यर्थः।

उपर्युक्तसूत्राणां अर्थात् स्पष्टं भवति यत् धातूनां वा भूतानाम् असमानुपातेन एव विकाराः उत्पद्यन्ते तेषां समतायां मनुष्यस्य आरोग्यं सम्यक् तिष्ठति। यदि वयं सम्यक् खादामः तर्हि गच्छामः, व्यायामं कुर्मः, विश्रामं कुर्मः इत्यादि यदि अनुसरामः अस्माकं शरीरस्य प्राकृतिकनियमाः तदा वयं धातुसन्तुलनं स्थापयितुं समर्थाः तथा च स्वस्थजीवनं जीवितुं सफलाः भवितुमर्हति। एतादृशं आयुः अवश्यमेव दीर्घं भवितुमर्हति, विषयेऽस्मिन् भ्रमः न भवेत्।

**आयुर्वेदे आरोग्यस्य परिभाषा-** आयुर्वेदः जीवनस्य दर्शनमेकमस्ति यत् जीवनस्य समग्ररूपेण व्याख्यानं तथा च वास्तविकस्वास्थ्यं प्राप्तुं श्रेष्ठमेकं शास्त्रमस्ति । वास्तविकं स्वास्थ्यं आरोग्यं वा किम्? विषये अस्य आयुर्वेदः अतीव सम्यक् समीचीनानि च उत्तराणि प्रदत्तानि-

**समदोषः समाग्निश्च समधातुसलक्रियाः।**

**प्रसन्नात्मेन्द्रियमनाः स्वस्थमित्यभिधीयते ।।**[20]

अर्थात् यस्य त्रयोऽपि दोषाः सन्ति - वायु, पित्तः, मांसं,मेदः, अस्थि, मज्जा, शुक्रः च समानरूपेण सन्ति, यदि मल-मूत्रं स्निग्धाः सन्ति, यदि च मनः, इन्द्रियाणि, आत्मा च सुखी भवन्ति, तर्हि स्वस्थः इत्युच्यते, यः व्यक्तिः शारीरिक-मानसिक-आरोग्योऽस्ति, इत्यर्थः। रोगरहितः स्वस्थः इत्युच्यते। संक्षेपेण आयुर्वेदः आरोग्येण जीवनं जीवितुं कलाशिक्षणस्य शास्त्रमस्ति।

**धातुः शरीरस्य आधारः** - शरीरस्य एतेषां त्रयाणां मूलतत्त्वानां त्रिधातुः अर्थात् वायुः, पित्तः, कफः इति उल्लेखः अथर्ववेदे बहुषु स्थानेषु वयं प्राप्नुमः। इदं शरीरं त्रिधातुभिः (वायुः, पित्तं, कफं, च) सुन्दरं गृहं स्मृतम्। त्रिविधशोकविहीनं भवेत् (आध्यात्मिकं, आदिदैविकं,आदिभौतिकं च)। आयुर्वेदस्य उद्देश्यं च शरीरस्य त्रयः तापात् मुक्तिः।[21] पित्तोऽपि बहुषु मन्त्रेषु उल्लिखितः।[22] एकस्मिन् स्थाने एते अभ्रजा (वृष्ट्या शीते वा उत्पन्नः कफः), वातजा (वायुजः वातः) शुष्मं (उष्णात् उत्पन्नः पित्तः) इत्यादयः।[23] अन्यत्र ते वायुः, अर्कः इत्युच्यन्ते रयि च।[24]

चरके सुश्रुते अष्टाङ्गहृदये च वातपित्तकफेषु एते त्रयः शरीरस्य आधारत्वेन मन्तव्याः। एतेषां च त्रयाणां विकारात् शरीरे भिन्नाः दोषाः उत्पद्यन्ते इति विश्वासः।[25] सुश्रुतः कथयति यत् यथा गृहं स्तम्भत्रयेण आश्रितं तथैव शरीरं त्रिभिः आश्रितं भवति। अत एव शरीरं त्रिस्थूणं कथ्यते।[26] अष्टाङ्गहृदयः वायुः पित्तः कफश्च दोषत्रयमिति। विकृते शरीरस्य हानिं कुर्वन्ति, अविकृते स्थिते शरीरं स्थिरं कुर्वन्ति।[27] यथा अथर्ववेदे

वातपित्तकफौ वायुः अर्कः(अग्नि) रयिः(सोम) इत्युक्तौ, तथैव चरकसुश्रुतौ वायु-वातः, अग्निः-पित्तः, सोमश्च श्लेष्मा इत्युक्तौ ।[28]

**अथर्ववेदे शरीराङ्गवर्णनम्-** शरीराङ्गवर्णनं अथर्ववेदे प्राप्यते ।[29]

**अथर्ववेदे रोगनिमित्तानि** - अस्मिन् तश्मनशब्दः ज्वरस्य कृते प्रयुक्तः। चरकः ज्वरः सर्वेषां रोगानाम् मुख्यं मन्यते यतः सः सर्वभूतानां प्राणान् गृह्णाति, शरीरं, मनः, इन्द्रियाणि च क्षतिं करोति । शरीरं प्रकोपयति अतः ज्वरः इति कथ्यते। अन्यरोगाणां अपेक्षया अस्य चिकित्सा दुष्करं मन्यते ।[30]

**अथर्ववेदे रोगानाम् नामानि-** नानारोगाणां नामानि अथर्ववेदे प्राप्यन्ते। केचन नामानि यथा- शीर्षक्तिं(शीरोवातः),शीर्षामयं (शिरोवेदना), कर्णशुलः (कर्णवेदना), विलाहितः (पीतरोगः), पाण्डुरोगः, शीर्षण्यः (तन्त्रिकारोगः) ।[31] हरिमा (पीतरोगः, जलोदरः) ।[32] कासः (कासः, यक्ष्मा) यः सर्वाङ्गेषु प्रसरति ।[33] शीर्षलोकः (शिररोगः), सदन्दि (नित्यरोगः), हायनः (वर्षपर्यन्तं रोगः) ।[34] आशरीकः (अस्थि भंग इत्यादि), बलासः (कासः, क्षयः),पृष्ठवेदना शीतजन्यरोगाःच ।[35]

अथर्ववेदे प्रत्येकं अङ्गे भवन्ति रोगानामपि उल्लेखः यथा- आस्रावः(प्रवाहिका) ।[36] विसल्पः(वेदना), विद्रधः(स्फोटः), वातीकारः(ग्रन्थिवातः) ।[37] उनमत्तता(उन्मादः) ।[38] कुष्ठः ।[39] क्लीबत्व ।[40] गर्भदोष ।[41] गण्डमाला ।[42] ज्वरः ।[43] दुःस्वप्नः ।[44] मूत्रकृच्छ्रः ।[45] यक्ष्मः ।[46] रुधिर-स्रावः ।[47] श्वेतकुष्ठः ।[48] हृद्रोगः ।[49] क्षेत्रियरोगः ।[50] अथर्ववेदे उपचाराः चतुर्धा विभक्ताः आसन् यथा-

- क. **मनुष्याः**- अस्मिन् वैद्यादिकृताः उपचाराः सन्ति।
- ख. **देवी-** पञ्चधातुभिः कृताः उपचाराः अस्मिन् अन्तर्भवन्ति ।
- ग. **आङ्गिरसि चिकित्सा** – मानसिकशक्त्या इच्छाशक्त्या वा क्रियमाणाः चिकित्साविधयः सन्ति ।[51]
- घ. **आथर्वणी चिकित्सा** -अथर्वा योगी इति कथ्यते,अतः योगचिकित्सा अथवा या चिकित्सा योगाभ्यासेन क्रियते ।[52]

उपर्युक्तचिकित्साविधिव्यतिरिक्तानि अथर्ववेदे अपि निम्नलिखितचिकित्साविधयः उल्लिखिताः सन्ति।

**1.सूर्यकिरण चिकित्सा-** सूर्यकिरणाः शरीराय सुखं ददाति। अथर्ववेदे सूर्यकिरणैः सह चिकित्सायाः अत्यन्तं विस्तृतं वर्णनं भवति ।[53] सूर्यः पृथिव्यां सर्वशक्तिः मुख्यः अस्ति। सूर्यः सर्वभूतानां जीवनदाता। सूर्यः प्राणदात्री सर्वरोगचिकित्सा प्रज्ञादा च प्रोक्ता ।[54] ऋग्वेदे सूर्यः स्थावर-जङ्गमस्य आत्मा इति उच्यते, **'सूर्य आत्मा जगतस्तस्थुषश्च'** ।[55] हृदयरोगनिवारणाय उदयमानः सूर्यः विशेषतया महान् इति ऋग्वेदे उक्तम्। अथर्ववेदेऽपि एतादृशाः वचनानि सन्ति।

**''उद्यन् अद्यमित्रमह आरोहणउत्तरां दिवम् ।**

**हृदरोगं मम सूर्य,हरिमाणं च नाशय ।।**[56]

**अनु सूर्यमुदयतां हृद्योतो हरिमा च ते'' ।**[57]

सूर्यप्रकाशेन न केवलं हृदयरोगः अपितु रक्ताल्पता, शिरोवेदना, ज्वरः, इत्यादयः सर्वे रोगाः अपि चिकित्सिताः भवन्ति। अथर्ववेदस्य बहुषु स्थानेषु सूर्यः कृमिनाशकत्वेन परिकीर्तितः। सूर्योदयमात्रेण सः स्वस्य तीव्रविकिरणेन दृश्यमानं अदृश्यं च कृमिं नाशयति।[58] अतः न केवलं रोगनिवारणाय, अपितु मानवजीवनस्य विविधपक्षेषु सूर्यस्य माहात्म्यमप्रतिममस्ति।

**2.जलचिकित्सा** - अथर्ववेदे जलचिकित्सायाः बहु महत्त्वं दत्तमस्ति। सर्वप्रकाराः रोगाः जलेन नाशयितुं शक्यन्ते।[59] ऋग्वेद-अथर्ववेदेषु शुद्धजलं "विश्वभेषजी" अर्थात् सर्वरोगाणां निवारणाय वर्णितमस्ति।

**अप्सु...... अन्तर्विश्वानि भषजा। आपश्च विश्वभेषजीः।**[60]

वैदिकसाहित्ये जलं महाचिकित्सकम्, प्राणवर्धकम्, अमृतौषधम्, उत्तमौषधमिति वर्णितम्। **''अप्सन्तरमृतमप्सु भेषजम्''**[61] जलेन अनिद्रा, निद्रा, स्वप्नदोषः,हृदयरोगः, त्वचा रोगः, वंशानुगत रोगः इत्यादयः चिकित्सा कर्तुं शक्यन्ते । अस्मिन् सन्दर्भे वेदाः वदन्ति-

**'आपो ह मह्यं तद् देवूर्ददन् हृद्योतभेषजम्।'**[62]

**'आपस्तत् सर्वं निष्करन् भिषजां सुभिषक्तमाः'** ।[63]

अथर्ववेदे जलचिकित्सा 'जलाषभेषजः' इति रुद्रः तस्य विशेषज्ञः इति स्वीकृतः—**"रुद्रःजलाषभेषज"**[64] भारते परम्परागतरूपेण प्रातः जागरणानन्तरं मुखस्य प्रक्षालनात् पूर्वं एकलीटरं जलं पिबन् उदरसम्बद्धाः सर्वे रोगाः दूरीकृताः भवन्ति। यस्य परिणामेण जनाः स्वस्थाः भवन्ति। एवं जलस्नानेन न केवलमेकं रोगं अपितु औषधरूपेण सर्वे रोगाः चिकित्सिताः भवन्ति।

**3.वायु चिकित्सा-** प्रदूषणरहितः स्वच्छः वायुः आजीवनं औषधत्वेन बहुमूल्यः अस्ति। वायुं विना अस्माकं अस्तित्वं क्षणमपि न सम्भवति। वृक्षाः वनस्पतयः च वायुं शुद्धं जीवनाय योग्यं च कुर्वन्ति। ऋग्वेदे वायुः प्रकीर्तितः अमृतस्य भण्डारः यः अस्माकं जीवनं ददाति।

**यददो वात ते गृहे अमृतस्य निधिर्हितः।**

**तेन नो देहि जीवसे।**[65]

अथर्ववेदे वायुः सर्वव्याधिचिकित्सा इत्यर्थः विश्वभेषज इति उक्तम् ।

**'आ वात वाहि भेषजं वि वात वाहि यद्रपः।**

**त्वां हि विश्वभेषज देवानां दूत ईयसे''।**[66]

स्वच्छवायुग्रहणेन शरीरस्य परितः रक्तं शुद्धं भवति, शरीरस्य श्रान्तता च निष्कासिता भवति। अत एव भेषज वायुः हृदयप्रियः प्राणवर्धकः इति ऋग्वेदे उच्यते।

**'वात आ वात भेषजं शम्भु मयोभु नो हृदे।**
**प्राण आमूंषितारिशत'** ।[67]

**4. प्राकृतिकचिकित्सा** - अथर्ववेदे प्राकृतिकचिकित्सायाः अनेकविधाः उल्लिखिताः। अस्मिन् प्राणायामः- प्राकृतिकचिकित्सायां सूर्य-चिकित्सा, चन्द्र-चिकित्सा च मुख्याः। चन्द्रः आयुः वर्धने सहायकः इति मन्यते।[68]

**5. मानवचिकित्सा** - अथर्ववेदे मनोबलस्य विशेषं महत्त्वमस्ति। श्री मनोचिकित्सायाः लाभं प्राप्नोति। मनुष्यः स्वस्थः नीरोगः च भूत्वा दीप्तिमान् भवति।[69]

**6. यज्ञचिकित्सा** - अथर्ववेदे अपि यज्ञचिकित्सायाः महत्त्वपूर्णं स्थानं प्रदत्तम्। अथर्ववेदे उक्तं यत् यस्मिन् गृहे नियमितरूपेण यज्ञः क्रियते तस्मिन् गृहे रोगकृमिः एव नश्यन्ति।[70]

**7. शल्यचिकित्सा**- अथर्ववेदे अपि शल्यचिकित्सायाः उल्लेखः वर्तते। व्रण-क्षत-अस्थि-भङ्ग-आदि-चिकित्सा इति रोहिणी-चिकित्सा वर्णिता।[71]

**8. सर्पविषचिकित्सा**- अथर्ववेदे अष्टादशप्रकाराः सर्पाः उल्लिखिताः।[72] अथर्ववेदे तावुव औषधेन सर्पविषविनाशस्य वर्णनमस्ति।[73] अन्ये बहवः औषधाः अपि वर्णिताः सन्ति।

**9. कृमिचिकित्सा** - अथर्ववेदे कृमिस्य द्वे रूपे वर्णितौ - दृष्टि (दृश्यमानः) अद्रष्टा (दृश्यमानः) च। आंतः, शिरः पृष्ठपार्श्विका इति तेषां निवासस्थानानि कीर्तितानि सन्ति। बहुषु स्थानेषु सूर्यः कृमिनाशकः इत्युच्यते। प्रत्यक्षपरोक्षं च सर्वेषां कृमिनाशः सूर्यः उक्तः।[74]

**10. केसरोगः चिकित्सा** – अथर्ववेदे केशेषु उत्पद्यमानानां रोगानाम् उपचारः, केशवृद्ध्यर्थं च उपायाः वर्णिताः। अथर्ववेदे नितत्नीचिकित्सा केशरोगाणां चिकित्सा इति सूक्तद्वये वर्णितम्।[75]

**11. मानसिकचिकित्सा** - क्रोधस्य चिकित्सा अथर्ववेदे वर्णिता।[76] दर्भ-भूरीमाल-औषधानां वर्णनं वर्तते। भावप्रकाशनिघन्टु-ग्रन्थे कुशः शीतलः इत्युच्यते यः क्रोधशामयति।[77]

**12. उन्मादरोगचिकित्सा** - अथर्ववेदे उन्मादनाशस्य उपायः वर्णितः।[78] मनुष्यस्य हृदये ये आसुरीविचाराः सन्ति ते तस्य हृदयं बाधन्ते एव। एतस्मात् कारणात् पुरुषः आत्मानं विस्मृत्य भ्रष्टः भवति। एतादृशी अवस्था उन्माददशा उच्यते। अथर्ववेदे विस्तरेण वर्णिता।[79]

**13. नेत्ररोगचिकित्सा**- नेत्ररोगचिकित्सा वर्णनं अथर्ववेदे अपि प्राप्यते।[80]

**14. कासरोगचिकित्सा** - अथर्ववेदे सर्वशरीरे प्रसृता कासः औषधस्य सेवनं कृत्वा पर्वते एव तिष्ठतु इत्युक्तम् ।[81] मनोबलात् कासं दूरीकर्तुं अपि उक्तम् ।[82]

**15. गण्डमाला-चिकित्सा**- गण्डमालारोगस्य वर्णनं अथर्ववेदे दृश्यते। तस्य एकं नाम रामायणी अपि प्रदत्तम्। अस्य रोगस्य स्थानानि कण्ठगुल्फगुह्यस्थानानि स्त्रियाः ।[83]

**16. आनुवंशिकरोगचिकित्सा** - अथर्ववेदे बालकेषु आगच्छन्तः मातापितृणां रोगाः आनुवंशिकता अथवा प्रादेशिकरोगाः इत्युच्यन्ते ।[84]

**17.हृदयरोग** - औषधम् - अथर्ववेदे मृगशृङ्गं वंशानुगतहृदयरोगनाशकत्वेन वर्णितम् ।[85] सूर्यचन्द्रौ च रश्म्या हृदयरोगं हरन्ति धनं प्रकीर्तितम् अस्मिन् सूक्ते ।[86]

**18. ज्वरचिकित्सा**- ज्वरचिकित्सायाः विस्तृतं वर्णनं अथर्ववेदे प्राप्यते। कूठ-औषधं सर्वेषां रोगानाम् निवारणं करोति इत्युक्तम्। कूठः शिरःरोगान्, प्रतिदिनं आगच्छति ज्वरः, तृतीये दिने आगच्छन् ज्वरः, वर्षे पूर्णे आगच्छन् ज्वरः च नाशयति इत्युक्तम् ।[87]

**19. अग्निमाद्य (कब्ज) इत्यादयः रोगाः** - अथर्ववेदे अपचः (कब्जः), वमनः (कै) इत्यादीनां रोगानाम् उपचारः अपि वर्णितः। अपामार्गचिकित्सायाः गुणाः तस्य त्रयाणां सूक्तानां चतुर्विंशतिमन्त्रेषु विस्तरेण वर्णिताः ।[88]

**20. स्त्रीरोगचिकित्सा**- अथर्ववेदे अपि स्त्रियाः रोगचिकित्सायाः वर्णनं कृतम्। वंध्यरोगचिकित्सायां ऋषभकचिकित्सायाः उल्लेखः कृतः ।[89]

**21. श्वेतकुष्ठ - चिकित्सा** - श्वेतकुष्ठस्य चत्वारः कारणानि अथर्ववेदे उक्ताः। १. अस्थिषु विकारजन्यः अस्तिज इत्यर्थः २.तनुजः शारीरिकदोषजन्यः वा मांसदोषजन्यः इत्यर्थः ३.त्वक्विकारजन्यः। ४. अन्यायात् उत्पन्नः। अथर्ववेदे रामा कृष्णा-असिक्नी-औषधैः श्वेतकुष्ठ-रोगस्य चिकित्सां कर्तुं शक्यते इत्युक्तम् ।[90]

**22. क्षतं-व्रण-आदि-उपचारः** अथर्ववेदे नव-क्षतानां कृते जल-चिकित्सायाः वर्णनं कृतम्। व्रण-क्षत-आदिषु रोहिणी-औषधस्य उल्लेखः वर्तते ।[91]

**23. गठिया - चिकित्सा** - अथर्ववेदे उक्तं यत् यः व्यक्तिः पिप्पली अर्थात् पीपर सेवनं करोति सः कदापि संक्रमितः न भवति ।[92] पीपरस्य उपयोगः उन्मादस्य, वायुरोगस्य, पक्षाघातस्य च चिकित्सायां भवति।

**24.अतिसार चिकित्सा** - गुदायां मस्साः अंकुरिताः भवन्ति, मलप्रवाहस्य बाधां च जनयन्ति। मलस्य निर्गमनसमये रक्तस्रावः भवति तथा च अन्तः कण्डूः अपि खरचने अस्वस्थतां जनयति। अस्य रोगस्य चिकित्सायाः वर्णनं अथर्ववेदे प्राप्यते।[93] आयुर्वेदे मस्सा इत्यादयः दुर्णाम इत्युच्यन्ते। अपामार्गौषधेन

बवासीरहरणस्य अपि वर्णनमस्ति – “**अपामार्ग त्वया वयं सर्वं तदपमृज्महे**”[94] अपामार्गस्य बीजानि पिष्ट्वा कल्कजलेन पिवितुं तण्डुलानां रक्तस्रावः युक्तः अर्शः नश्यन्ति ।[95]

**25. श्वसनरोगचिकित्सा-** अथर्ववेदे श्वसनरोगचिकित्सायाम् कुष्ठौषधस्य वर्णनं प्राप्यते। एतत् औषधं हिमालयपर्वतेषु निर्मीयते इति कथ्यते, सोमनामस्य औषधस्य सहचरमस्ति। “यो गिरिष्वजायथाः”[96] “जातं हिमवतस्परि”[97] “सोमस्यासि सखा”[98]। सोम इति औषधं वैदिकसाहित्येषु सुप्रसिद्धमस्ति। एतत् औषधं विशेषतया पूञ्जवानपर्वते प्राप्तमासीत्- “सोमो वीरुधामधिपतिः” ।[99] अथर्ववेदे औषधराजः इत्युच्यते। बभ्रुः, अरुणया हरितवर्णा इति च उच्यते। अनेन श्वसनरोगाः, हृदयरोगाः इत्यादयः अपि नाशाः भवन्ति ।

उपर्युक्तविमर्शात् स्पष्टं भवति यत् मानवजीवनस्य प्रायः सर्वेषां रोगानाम् उन्मूलनार्थं वनस्पतयः महत्त्वपूर्णां भूमिकां निर्वहन्ति। अतः ऐतरेय ब्राह्मणस्य एतत् वचनं सर्वथा सत्यम्– **“प्राणो वै वनस्पतयः”** ।[100] वनस्पतयः जीवानां जीवनरूपाः सन्ति। आयुर्वेदस्य मूलभूतं ज्ञानं अथर्ववेदे विस्तरेण उपलभ्यते। अहमत्र केवलं संक्षिप्तं परिचयात्मकं वर्णनं दातुं समर्थाः अस्मत्। अथर्ववेदस्य प्रस्ताविता आयुर्वेदिकचिकित्सा एव वास्तविकः चिकित्साविधिः भवितुम् अर्हति, या प्राकृतिकनियमानामाधारेण तिष्ठति, न केवलं सामान्यजनं स्वस्थं स्थापयितुं शक्नोति अपितु दीर्घकालं जीवितुमपि शक्नोति। अतः **‘आयुर्वेदोऽमृतानाम्’** अर्थात् जीवनदायिषु आयुर्वेदः श्रेष्ठः इति यावत्। तस्य अध्ययनेन वयं स्वस्थं, सुखी, सद्गुणं च जीवनं यापयितुं विज्ञानं ज्ञास्यामः ।

## पादटीका

1. ऋग्वेद 4/30/13
2. मनु 2/7
3. सुश्रुत सूत्र 2/3
4. चरक संहिता सूत्र 1/43
5. ब्रह्मवैवर्त पुराण- 1/16/9.10

6. ब्रह्मा प्रोवाच ततः प्रजापतिरधिगते, तस्मादश्विनौ, अश्विभ्यामिन्द्रः, इन्द्रादहं, मयात्विह प्रदेयमर्थिभ्यः 7. प्रजाहितहेतोः।। सुश्रुत संहिता- 1/20

7. चरक संहिता सूत्र-1/41
8. चरक सूत्र 1/13
9. चरक सूत्र 30/23
10. चरक सूत्र 3/41
11. चरक सूत्र ½
12. चरक सूत्र 1/14
13. चरक सूत्र 30/23
14. चरक सूत्र 30/24
15. चरक सूत्र 30/24
16. चरक सूत्र 3/24
17. चरक सूत्र 30/27
18. चरक सूत्र 30/26
19. चरक संहिता सूत्र- 30/24
20. सुश्रुत सूत्र 15/47
21. पित्तमासिथ। अथर्व 1/24/1, अग्ने पित्तमपामसि। अथर्व 18/3/5

22. इन्द्र त्रिधातु शरणं त्रिवरूथम्...। अथर्व. 20/83/1 23. यो अभ्रजा वातजा यश्च शुष्मो वनस्पतीन्सचतां पर्वतांश्च। अथर्व.1/12/3
24. शतधारं वायुमर्कं..... रयिम्। अथर्व 18/4/29 25. वायुः पित्तं कफ चोक्तः ....। चरक संहिता सूत्र 21/3
26. सुश्रुत सूत्र 21/6 27. अष्टाङ्ग सूत्र 1/6/7
28. अथर्व 18/4/29 29. अथर्व 2/33/1-7 30. चरक निदान 1/16,35

31. शीर्षक्तिं शीर्षामयं कर्णशूलं विलेहितम्...। अथर्व 9/8/132. हरिमाणं ते अङ्गेभ्यो...। अथर्व 9/8/9
33. अथर्व 1/12/3 34. अथर्व 19/39/10 35. अथर्व. 19/34/10
36. अथर्व. 1/2/4 37. अथर्व.9/8/20 38. अथर्व.6/111/1-4
39. अथर्व.19/39/1-10 40. अथर्व.6/138/1-3 41. अथर्व. 8/6/1-26
42. अथर्व.7/74/1-4 43. अथर्व.19/39/10 44. अथर्व.20/96/1-24
45. अथर्व.1/3/6-9
46. अथर्व.1/12/3 47. अथर्व 1/17/1-4 48. अथर्व. 1/23/1-41
49. अथर्व. 1/22/1 50. अथर्व. 2/8/1-5 51. अथर्व. 4/4/5
52. अथर्व. 11/4/16 53. अथर्व. 8/1/5 54. अथर्व. 6/52/3
55. ऋग्वेद.1/115/1 56. ऋग्वेद. 1/50/11 57. अथर्व 1/22/1
58. अथर्व 5/23/6 59. अथर्व 1/22/3 60. ऋग्वेद 1/23/20
61. अथर्व 1/4/4 62. अथर्व 6/24/1 63. अथर्व 6/24/2
64. अथर्व 2/27/6 65. ऋग्वेद 10/186/3 66. अथर्व 4/13/3
67. ऋग्वेद 10/186/10 68. अथर्व 7/81/2 69. अथर्व 5/11/1
70. अथर्व 7/76/5 71. अथर्व 4/12/1 72. अथर्व 5/13/5-7
73. अथर्व 5/13/10 74. अथर्व 6/52/15 75. अथर्व सूक्त 136-137
76. अथर्व 6/43/1-2 77. भावप्रकाश नि. गु. श्लोक 166 78. अथर्व 6/111/1-4
79. अथर्व 4/37/1-12 80. अथर्व 4/20/1-9 81. अथर्व 1/12/3
82. अथर्व 6/105/2 83. अथर्व 6/83/3 84. अथर्व 5/30/4
85. अथर्व 3/7/2 86. अथर्व 3/7/4 87. अथर्व 19/39/10
88. अथर्व 4/ सूक्त 17-19 89. अथर्व 3/23/1-6 90. अथर्व 1/23/1
91. अथर्व 4/12/1-7 92. अथर्व 6/109/2 93. अथर्व 2/25/4
94. अथर्व 2/25/6 95. योग रत्नाकर 96. अथर्व 5/4/1
97. अथर्व 5/4/2 98. अथर्व 5/4/7 99. अथर्व 5/24/7
100. ऐतरेय ब्राह्मण-24,5/23,7/32

## सन्दर्भग्रन्थाः


i. सरस्वती महर्षि दयानन्द, भाष्य, ऋग्वेद संहिता, वैदिक पुस्तकालय, दयानन्द आश्रम, केशर गंज, अजमेर, राजस्थान । सन्-1996

ii. सरस्वती महर्षि दयानन्द, भाष्य, अथर्ववेद संहिता, वैदिक पुस्तकालय, दयानन्द आश्रम, केशर गंज, अजमेर, राजस्थान । सन्-1996

iii. कुमार श्री सुरेन्द्र भाष्य, मनुस्मृति, आर्ष साहित्य प्रचार ट्रस्ट, खारी बाबली, दिल्ली ।

iv. CARAKA-SAMHITĀ, MOTILAL BANARSIDASS, Maklagang, Delhi-110007

v. Susruta Samhita, Chaukhamba Sanskrit Pratishthan, Jawahar Nagar, Delhi-110007

vi. Caraka-Samhitǎ. Sanskrit Text with English Translation, Editor-translator P.V. Sharma Vol. 1 - 4 Complete. ChowKhaba Publisharsh, Varanasi

vii. Suśruta-Samhitǎ (Section on the study of human body) Sanskrit Text with English Translation and Commentary etc. SARIRASTHANAM by Dr. Dinkargovind Thatte, Chaukhamba Sanskrit Pratishthan, Jawahar Nagar, Delhi-110007

viii. आयुर्वेदीय शल्य निदान, डॉ. अनन्तराम शर्मा, चौखम्बा संस्कृत प्रतिष्ठान. बंगलो रोड,जवाहर नगर,दिल्ली-110007

ix. चरकसंहिता, श्रीचक्रपाणिदत्त विरचित 'आयुर्वेददीपिका' व्याख्या सहित, चौखम्बा संस्कृत प्रतिष्ठान. बंगलो रोड,जवाहर नगर,दिल्ली-110007

x. सुश्रुतसंहिता,श्रीडल्हणाचार्य विरचित निबन्धसंग्रहव्याख्या सहित, चौखम्बा संस्कृत प्रतिष्ठान. बंगलो रोड,जवाहर नगर,दिल्ली-110007

# पुद्गलसिद्धान्तः

डॉ. शान्तनुकुमारचक्रवर्त्ती

भारतीयदर्शनेषु सूक्ष्मतत्त्वान्वेषणे कणादानन्तरं गौतमस्यैव नाम लभ्यते। अनेनापि परमाणोरेतदेव स्वरूपमुपस्थापितम् सामान्यतया कणादगौतमयौः मतम् एकमेव। यथा कणादगौतमौ जगतो मूलतत्त्वान्वेषणे भृशं प्रायस्यताम्, तथैव जैनागमाचार्यैः दार्शनिकेरपि भिन्नरूपेणैवेदं मूलतत्त्वं स्वीकृतम्। ते मूलतत्वस्य पुद्गल इति नाम चक्रुः।

जैनदार्शनिकैरस्य पुद्गलस्य व्युत्पत्तिरर्थो लक्षणञ्चेत्थं स्वीकृतम्-पूरयन्ति गलयन्ति इति पूद्गलाः परमाणवः। पूरणगलनान्वर्थसंज्ञात्वात् पूद्गलाः परमाणवः। पूरणाद् गलनादिति पूद्गलाः परमाणवः इति विष्णुपुराणे। गुणपर्यायवद् द्रव्यं भवति, अतो द्रव्यापेक्षाऽयं पुद्गलः द्रव्यम्। अनेकेषां परमाणूनां यः समूहः स एव पुद्गल इति फलितोऽर्थः। द्व्यधिकपुद्गलानां संयोगः स्कन्ध इत्युच्यते। 'स्कन्धन्ति शुष्यन्ति पुद्गलविचटनेन, धीयन्ते च पुष्यन्ते पुद्गलविचटनेति स्कन्धः'।[१]

'पूर्यते गलति च', अथवा "पुनः पुनः गच्छति" इति विग्रहानुसारेण पुद्गलः इति शब्दः निष्पन्नं जातम्। पुरणात् पुत् गलनात् गलः। ततः कर्मधारयः। वृद्धिह्रासवत्त्वाद्देहस्य तथात्वमिति देहः इत्यर्थः।[२] "चक्रुः शिरसि भाले च नेत्रे सर्व्वाङ्गपुद्गले।।" आत्मा इति।[३] परमाणुः यथा "स्थूला मध्यास्तथा सूक्ष्माः सूक्ष्मात् सूक्ष्मतराश्च ये। देहभेदा भवान् सर्व्वे ये केचित् पुद्गलाश्रयाः।।"[४] "पुर्य्यन्ते गलन्ति चेति पुद्गलाः। पूरणाद्गलनाद्देहे पुद्गलाः" परमाणव इति।[५]

बुद्धस्य प्रमुखेषु सिद्धान्तेषु अन्यतमः अस्ति आत्मनः अस्तित्वस्य खण्डनं तथा च पञ्चानां स्कन्धानां उपस्थापनम्। भगवान् बुद्धः आत्मनः अस्तित्वं न अङ्गीकरोति। बौद्धानां मते आत्मा पञ्चानां स्कन्धानां समुच्चयः अस्ति। रूपस्कन्धः, विज्ञानस्कन्धः, वेदनास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धः इति पञ्चस्कन्धाः भवन्ति। बुद्धस्य मते प्रत्येकं जनः पञ्चानां स्कन्धानां समूहः एव अस्ति इति। प्रत्येकं जीवः नामरूपात्मकः अस्ति। एतद् अतिरिच्य आत्मनः पारमार्थिकम् अस्तित्वं न विद्यते इति।

अस्मिन् पुद्गले गुणाः यथा – जैनदर्शनसम्मताः पञ्चरसाः मधुराम्लकटुकषायतिक्ताख्या विद्यन्ते। तेऽस्मिन् पुद्गले सन्तिष्ठन्ते। सर्वे एते एकस्मिन्नेव काले समुदायरूपेणास्मिन् तिष्टन्तीत्यत्र न कोऽपि नियमः। तेष्वेकोऽपि अस्मिन् भवितुं शक्नोति।[६]

पुद्गलेऽस्मिन् सुगन्धिदुर्गन्धिभेदेन गन्धद्वयं विद्यते। पुद्गलेऽष्टौ स्पर्शाः स्निग्धरूक्षोष्णशीतप्रभृतयः विद्यन्ते।[७] परिणामी चायम्। अवस्थामेकामं त्यक्त्वाऽपरां च गृहीत्वा परिणमतीति। प्रत्येकं द्रव्यस्य परिणमनं स्वीकृत्य एव तेषां नित्यत्वमवस्थीयते। अवस्थितद्रव्यस्य पूर्वधर्मनिवृत्त्यौ धर्मान्तरोत्पत्तिः परिणामः।[८] अयं निर्जीवः। यस्मिन् जीवात्माभावस्तत् निर्जीवम्। चैतन्यरहितोऽयम्।

द्विविधाः पुद्गलाः स्निग्धा रुक्षाश्च। स्निग्ध-रुक्षत्वाद् बन्धो भवति। अतः, एतावेव गुणौ पुद्गलानां बन्धेषु कारणे वर्तते। एतावन्त एव पुद्गलस्य गुणाः अन्ये चापि वर्तन्ते। अपरेण पुद्गलेनासंयुक्तावस्थायां पुद्गलः परमाणुः। अतः परमाणुस्वरूपापेक्षायां पुद्गलस्यैको भेदः परमाणुरिति भावः।

समस्ता एव पुद्गलाः प्रथमं द्विविधाः परमाणवः स्कन्धाश्चेति। समवायरूपेण पुद्गलः स्कन्धः,असमवायरूपेण परमाणुः। पुनश्चायं चतुर्विधोऽस्ति स्कन्धो देशः प्रदेशः परमाणुश्चेति। परमाणुबद्धसमुदायः स्कन्धः, स्कन्धसार्धभागो देशः, देशसार्धभागः प्रदेशः, प्रदेशस्यापि चार्धभागः परमाणुरिति। अभिभाज्यो भागः परमाणुरित्यर्थः। पुनश्चायं पुद्गलः षड् विधः सूक्ष्म-सूक्ष्मः, सूक्ष्मः, सूक्ष्मबादरः, बादरसूक्ष्मः, बादरः, बादरबादरश्चेति।[९]

अतीन्द्रियार्थदर्शिभिरवलोक्यमानः सामान्यैः जीवैश्चानुमीयमानः पुद्गलः 'सूक्ष्मसूक्ष्मः'। इन्द्रियेणग्राह्यः 'सूक्ष्मः'। चक्षुरिन्द्रियं वर्जयित्वाऽऽन्यैचक्षुर्भिज्ञानेन्द्रियैः ग्राह्यः 'सूक्ष्मबादरः'। छेदनभेदनरहितोऽन्यत्र नेतुमशक्यश्चक्षुषा ग्राह्यो 'बादरसूक्ष्मः'। छेदन-भेदनरहितोऽन्यत्र नेतुं शक्यो 'बादरः'। सामान्यतया छेदन भेदनयोग्योऽन्यत्र च प्रापनीयः पुद्गलो 'बादरबादरः'। परमाणुसंयोगेन सूक्ष्मकत्वप्रकारसमुच्चयः उत्पद्यन्ते। षट् प्रकाराः पदार्थाः तेषां स्थूलतायाः आधारेण भेदिताः भवन्ति। द्रव्यस्य निश्चितं रूपं भवति, एतत् दृढतया परिभाषितुं शक्यते (गोलत्रिकोणचतुष्कोणमिव) अथवा सम्यक् वर्णनं कर्तुं न शक्यते (मेघरूपादिवत्) वा भवितुमर्हति द्रव्ये प्रकाशस्य उष्मविकिरणः (यथा सूर्यात् निर्गच्छति) प्रकाशस्य शीतविकिरणः(यथा चन्द्रमणिकान्तिः) इत्यादयः अनेकाः विशेषाः परिस्थितयः प्रादुर्भवितुं शक्नुवन्ति। तमः छाया च शब्दश्च। अन्धकारः प्रकाशस्य नकारमात्रं न मन्यते, अपितु किमपि भौतिकं इति मन्यते। शरीरात् निर्गतसूक्ष्मद्रव्येण भवति। शब्दः जैनैः सूक्ष्मद्रव्यत्वेन ज्ञायते, न तु अन्यैः भारतीयदार्शनिकैः।

बौद्धदर्शने नैरात्मद्वयम्- धर्मनैरात्म्यपुद्गलनैरात्मश्चेति। महायानसूत्रालंकारे वर्तते पुद्गलप्रत्ययः प्रयत्नः स्यात्, तस्य तथा स्थितस्य प्रत्ययत्वं न युज्यते, प्रागभावात्। सति हि तत्प्रत्यये न कदाचित्पुद्गलो नास्तीति। किमर्थं प्राक् प्रयत्नो न स्याद्यदा नोत्पन्नः। विनष्टस्यापि प्रत्ययत्वं न युज्यते , पुद्गलस्यानित्यत्वप्रसंगात्।

तृतीयश्च कश्चित्पक्षो नास्ति यत्र स्थित न विनष्टः स्यादिति। तत्प्रत्ययोऽपि प्रयत्नो न युज्यते। एवं तावद्युक्तिमाश्रित्य द्रव्यतः पुद्गलो नोपलभ्यते। आचार्यवसुबन्धुना उक्तम्- "आत्मदृष्टिप्रभवा रागादयः क्लेशाः , पुद्गलनैरात्म्यावबोधश्च सत्कायदृष्टेः प्रतिपक्षत्वात्, तत्प्रहाणाय प्रवर्तमानः सर्वक्लेशान् प्रजहाति।"[१०] क्लेशज्ञेयावरणप्रहाणपि मोक्षसर्वज्ञत्वाधिगमार्थम्। क्लेशा हि मोक्षप्राप्तेरावरणमिति, अतस्तेषु प्रहीणेषु मोक्षोऽधिगम्यते। ज्ञेयावरणमपि सर्वस्मिन् ज्ञेया ज्ञेये ज्ञानप्रवृत्तिप्रतिबन्धभूतमक्लिष्टमज्ञानम्। तस्मिन् प्रहीणे सर्वाकारे ज्ञेयेऽसक्तमप्रतिहतं च ज्ञानं प्रवर्तत इत्यतः सर्वज्ञत्वमधिगम्यते।[११] निःशरीरः परमाणुरिति निःस्वभावो व्यवस्थानमात्रमित्यर्थः, अपकर्षमर्दादाभावात्। बुद्ध्या पर्यन्तं भेदस्तु परमाणुव्यवस्थानं, बुद्ध्या यावानवयपापकर्षपर्यन्तः शक्यते प्रभेत्तुं तावता परमाणुव्यवस्थानं क्रियते। किं पुनः कारणं यदेवं निःशरीरोऽपि परमाणुव्यवस्थाप्यते। पिण्डसंज्ञाविभावनतामुपादाय, अवयवशो हि बुद्ध्या भिद्यमाने रूपे सर्वमेतदेकं रूपमिति पिण्डसंज्ञा विगच्छति, यतः पुद्गलनैरात्म्यप्रवेशस्यानुकूल्यं भवतीति। रूपद्रव्यापरिनिष्पत्तिप्रवेशतां चोपादाय, एवं हि बुद्ध्या भिद्यमानं रूपं न किंचिद् भवतीति मत्वा रूपद्रव्यस्यापरिनिष्पत्तिं प्रविशति, यतो विज्ञप्तिमात्रावतारेण धर्मनैरात्म्यप्रवेशस्यानुकूल्यं भवतीति।

धर्मोद्दानेषु हि भगवता- "सर्वे धर्मा अनात्मनः" इति देशितम्। परमार्थशून्यतायाम्- "अस्ति कर्मास्ति विपाकः, कारकस्तु नोपलभ्यते य इमाँश्च स्कन्धान् प्रतिसन्दधाति। अन्यत्र धर्मसंकेतात्" इति देशितम्। पञ्चकेषु पञ्चादीनवा आत्मोपलम्भ इति देशिताः। आत्मदृष्टिर्भवति जीवदृष्टिर्विशेषो भवति तीर्थिकैः। उन्मार्गप्रतिपन्नो भवति। शून्यतायामस्य चित्तं न प्रसीदति न सन्तिष्ठते नाधिमुच्यते। आर्यधर्मा अस्य न व्यवदायन्ते। एवमागमतोऽपि न युज्यते। पुद्गलोऽपि हि भगवता तत्र तत्र देशितः- "परिज्ञातावी भारहारः श्रद्धानुसार्यादिपुद्गलव्यवस्थानतः" इति, असति द्रव्यतोऽस्तित्वे कस्माद् देशितः।

पुद्गलपदार्थः अत्यन्त्यं लघुपरमाणुनां अनन्तविभिन्नतायुक्तः अस्ति ये इन्द्रियाणाम् अनुपलब्धाः न भवन्ति ये च अग्रे विभक्तुं न शक्यन्ते(परमाणु)। अन्ये सर्वे पदार्थाः निराकाराः सन्ति चेदपि प्रत्येकस्य परमाणोः निश्चितः गन्धः निश्चितः रसः, निश्चितः वर्णः, स्पर्शस्य द्वौ निश्चितौ प्रकारौ, अनुगन्धः शुभः दृष्टः वा, रसः कटुः, तीक्ष्णः, कटिजः, अम्लः, मधुरः वा लवणरसः ( मधुरस्य नानात्वं मन्यते)। वर्णः- कृष्णः, नीलः( हरितः), रक्तः, पीतः वा श्वेत वा। स्पर्शः- गुरुः, लधुः, मृदु, रुक्षः, शीतः, उष्णः, शुष्कः वा।

परमाणुः अन्तरिक्षबिन्दुं गृह्णाति। परन्तु अन्यैः एकेन वा अनेकैः सह समुच्चयेन(स्कन्धः) बद्धं भवितुम् अर्हति यत् तदा असंख्यानि, असंख्यं वा अनन्तं वा बहुभिः अन्तरिक्षबिन्दून् व्याप्नोति। परन्तु एकस्मिन्

अन्तरिक्षबिन्दौ एव असंख्याकाः सूक्ष्मपरमाणुः समाहिताः भवितुम् अर्हन्ति यतोहि केवलं कच्चे रूपेण दृश्यमानं द्रव्यं वोधितुं न शक्यते।

पुद्गलस्याविभाज्यो योंऽशः स परमाणुरिति। शस्त्रेण सुतीक्ष्णेनापि छेत्तुं भेत्तुं वायः किल न शक्यः। तं परमाणुं सिद्धा वदन्ति आदि परिमाणानाम्। द्विविधः परमाणुः स्यात् सूक्ष्मश्च व्यावहारिकः। अनन्तैरणुभिः सूक्ष्मैरेकोऽणुर्व्यावहारिकः। परमाणुः स्वतन्त्रः सच्च।[१२] सोऽयं कार्यलिङ्गश्च।[१३] एकः परमाणुरेकेन कृष्ण-परमाणुना संयुक्तः सन्नपि कालान्तरेऽनन्तैः कृष्णपरमाणुभिः संयुक्तो भवितुं शक्नोति। गुणेषु परिवर्तनं स्वाभाविकतया स्कन्धनिर्मितिहेतोरपि भवितुमर्हति।[१४]

पुद्गलद्रव्यस्य भेदद्वयम्। यथा- स्वभावपुद्गलः विभावपुद्गलश्चेति। तत्र स्वभावपुद्गलः परमाणुः विभावपुद्गलः स्कन्धः। स्वभावाः कथ्यन्ते। अस्ति स्वभावः नास्ति स्वभावः नित्यस्वभावः अनित्यस्वभावः एकस्वभावः अनेकस्वभावः भेदस्वभावः अभेदस्वभावः भव्यस्वभावः अभव्यस्वभावः परस्वभावः द्रव्याणामेकादशसामान्यस्वभावाः।चेतनस्वभावः अचेतनस्वभावः मूर्तस्वभावः अमूर्तस्वभावः एकप्रदेशस्वभावः अनेकप्रदेशस्वभावः विभावस्वभावः शुद्धस्वभावः अशुद्धस्वभावः उपचरितस्वभावः एते द्रव्याणां विशेषस्वभावाः।

पृथिवी तावत् घटादिलक्षणा स्पर्शादि-शव्दात्मिका सिद्धा।अम्भोऽपि पुद्गलस्य विकारत्वात् पुद्गलात्मकम्,साक्षात् गन्धपलब्धश्च। तत्संयोगिनां पार्थिवद्रव्याणां गन्धः तद् गुण इवोपलभ्यत इति चेत् न साध्यत्वात्। तद्वियोगकालादर्शनात् तदविनाभावाच्च तद् गुण एवेति निश्चयः कर्तव्यः।सर्वपुद्गलानां स्पर्शादिचतुष्कोपेतत्वाभ्युपगमात्। व्यक्तस्पर्शातिचतुष्कानां च चन्द्रकान्ता-रणियवानामारंभकैरेवपुद्गलैरव्यक्तगन्धाव्यक्तगन्धरसाव्यक्तगन्धरसवर्णानामव्यक्तज्योतिरुदरमरु-तामारम्भदर्शनात्।[१५] (प्रवचनसारः/तत्त्वदीपिका/132)

**उपसंहारः**

जैन-दार्शनिकैः जगतो मूलतत्त्वं सूक्ष्मदृष्ट्या विवेचितम्। परमाणोः संस्थानरहितत्वेन कार्यरहितत्वेन च पुद्गलो मौलिकरूपेण कणरूपः शक्तिरूपो वेति विभ्रमस्य समाधानम्, कणशः नास्ति इत्युक्तेः, यदयं कणरूपः स्यात्, तर्हि, कथं न तस्य संस्थानमिति प्रश्ने परमाणुशक्तिरथवा ऊर्जेति वक्तुं शक्यते, नान्यथा। स्कन्धपरमाणुस्तु कणरूपोऽथवा शक्तिरूपः, द्वेधा भवितुरमर्हति। स्कन्धन्ति शुष्यन्ति इति व्युपत्तेः। वस्तुतः पुद्गल आत्माभिः सह सम्बद्धतां प्राप्तुं तेषां स्वभावे पूर्णतया परिवर्तनं च कृत्वा द्रव्यस्य असाधारणं , महत्त्वं

प्राप्नोति । आत्मानं प्रविश्य द्रव्यं कर्म इति व्यज्यते। जैनदर्शनस्य मूलभूतस्य अस्याः अवधारणायाः विषये नास्ति संशयः लेशावसरः।

-----

## पादटीका

१. द्रव्यलोकप्रकाशः ११सर्गः
२. पार्श्वनाथचरितम् १२-११०
३. शब्दरत्नावली
४. विष्णुपुराणम्,5-20
५. विष्णुपुराणम्, श्रीधरस्वामीटीका
६. (तत्त्वार्थसूत्रम्)
७. द्र.लो.प्रकाशः11सर्गः
८. पातञ्जल यो.द.टीका
९. (तत्त्वार्थसूत्रम् 5.25)
१०. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिका
११. वि.मा.सि. त्रिं
१२.वृहत्संग्रहसूत्रम्, पृ.584
१३.द्रव्यलोकप्रकाशः प्रथमसर्गः
१४.भगवतीसूत्रम्,18.8.7
१५.प्रवचनसारः/तत्त्वदीपिका/132

## सन्दर्भग्रन्थाः

१.द्रव्यलोकप्रकाशः, एकादशसर्गः।
२.विष्णुपुराणम्,श्रीधरस्वामीटीका।
३.प्रमाणवार्तिकम्,धर्मकीर्त्तिः।
४.तत्त्वार्थसूत्रम्।
५.पातञ्जलयोगदर्शनटीका।
६.विज्ञप्तिमात्रतासिद्धिः, त्रिंशिका कारिका।
७.शोध-प्रभा (A Research Journul,S.L.B.S.K.S.V. New Delhi)
८.Jainism, H.V.Glasenapp

# किरातर्जुनीयमहाकाव्ये प्रथमसर्गान्तर्गतं साहित्यिकं वैशिष्ट्यम्

**सुशान्त धरुआ**
अनुसन्धाता, किस् मानितविश्वविद्यालयः, भुवनेश्वरम्
मार्गनिर्देशिका- डॉ. तृप्ति मिश्र
सहायकाचार्या, संस्कृतविभागः
किस् मानितविश्वविद्यालयः, भुवनेश्वरम्

**शोधपत्रसंक्षिप्तिका**

संस्कृतसाहित्याकाशे महाकविकालिदासादनन्तरं महाकविभारवेः स्थानम्। महाकविभारवेः कृतिः किरातार्जुनीयम् , संस्कृतवाङ्मयस्य अन्यतमं महाकाव्यम्। भारवेः रचनापरिपाटवं सुन्दरं भवेत् , परन्तु सहसा वोध्यं न भवति। वोधनादनन्तरमिदं सहृदयहृदयं स्पृशति। भारविः अर्थगौरवेन कविताकामिनीं गौरावान्वितं कृतवान्। ततः याथार्थ्येन उक्तम् ' भारवेरर्थगौरवम्' इति। अर्थगौरवाय महाकविः भारविः संस्कृतसाहित्ये प्रसिद्धः। एकां सामान्यकथां विशेषरूपेण उपस्थापयित्वा सहृदयानां मनः आकार्षयितुं कला भारवेः समीपे अस्ति। किरातार्जुनीयस्य प्रथमसर्गः गुणग्राहीपाठकानां कृते सर्वथा सामाजिकं तथा राजनैतिकं गुरत्वं आवहन्ति। अस्मिन् प्रथमसर्गे उपमा, उत्प्रेक्षा, अर्थान्तरन्यासादीनां अलंकाराणां समुचितः प्रयोगः, वंशस्थः, पुष्पिताग्रा, मालिनी इत्यादीनां छन्दसां सम्यक् विन्यासः, भाषासौष्ठवं , नीतिवाक्यानां सरसं वर्णनं प्रथमसर्गस्य साहित्यकं वैशिष्ट्यं प्रतिपाद्यते।

**वीजशब्दाः -** महाकविभारविः, किरातार्जुनीयम्, अर्थगौरवम्, अर्थान्तरन्यासः, शस्थः।

**१. ० उपक्रमः**

संस्कृतसाहित्येतिहासे महाकविकालिदासादनन्तरं महाकवेः भारवेः स्थानं अन्तर्भवति।अवश्यं भारविं कालिदासेन सह काव्यस्य उत्कृष्टता दृष्ट्या तुलयितुं न शक्यते। तथापि महाकवेः भारवेः कृतिः किरातार्जुनीयमहाकाव्यं संस्कृतवाङ्मये अन्यतमं वर्त्तते। कालिदासस्य शैली अत्यन्तं सरलं तथा हृदयस्पर्शी भवति। परन्तु भारवेः रचनापरिपाटवं सुन्दरं भवति। किन्तु सहसा वोधगम्यं न भवति।अवगमनादनन्तरमेव करुणहृदयं स्पृशति। अतः मल्लिनाथः भारवेः काव्यं नारिकेलफलेन सह तुलयित्वा कथयन्ति -

**नारिकेलफलसम्मितं वचो**
**भारवेः सपदि तद् विभज्यते।**
**स्वादयन्तु रसगर्भ निर्भरं**
**सारमस्य रसिका यथेप्सितम्।।**

संस्कृतसाहित्ये भारवेः यथेष्टख्यातिः वर्त्तते। यथा विश्वकविः कालिदासः उपमालङ्कारस्य प्रयोगं कृत्वा काव्यश्रीं अलंकृतवान्, नैषधकारः श्रीहर्षः अतीवसुन्दर-सावलीलपदावलीनां प्रयोगं कृत्वा काव्यस्य सौन्दर्य्यं अधिकतया परिवर्द्धितवान् तथा भारविः अर्थगौरवेन कविताकामिनीं गौरवान्वितं कृतवन्तः। अतः उच्यते-

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**

**नैषधे पदलालित्यं माघे सन्ति त्रयोगुणाः।।**

संस्कुतसाहित्याकाशे रविरिव भासते खलु भारविः। भारवेः प्रतिभा अद्वितीया। भारवेर्भाषासोष्ठवम् , भावगाम्भीर्य्यम्, शब्दवैभवम्, अर्थगोरवम्, अलंकारचातुर्य्यम्, नानाशास्त्रपाण्डित्यं च दर्शन् भृशं मुग्धा भवन्ति मनीषिणः। भारवेः काव्यं नवनवोन्मेषशालिन्व्याः प्रतिभायाः रमणीयं निदर्शनम् । महाकविर्भारविः दाक्षणात्ये आसीदिति समालोचकानां मतम्। अनेन महाकविना षष्ठ्यां शताब्द्यां भारतभूरलंकृता स्वजन्मना इति ऐहोल-शिलालेखेन प्रमाणीक्रियते। भारविः पुलकेशीद्वितीयानुजस्य विष्णुवर्धनस्य सभारन्तमासीत्। अनेन स्वप्रतिभया पाण्डित्ये च सर्वे पण्डिताः कवयश्च चमत्कृताः आसन्।

**१. १ -महाकविः भारवेः परिचयं कृतिश्च**

महाकविः भारविः शैवमतावलम्बी, प्रकाण्डपण्डितः, राजनीतिज्ञः, वीररसवर्णनकुशलः, अलङ्कृतशैल्याः प्रवर्तकः च आसीत्। भारविः स्वपरिवार-निवासस्थान-पिता-पितामह-गुरुणां विषये किरातार्जुनीये कुत्रापि उल्लेखः न कृतवान्।

दण्डिविरचितम् ***अवन्तीसुन्दरीकथा*** अनुसारेण कुशिकगोत्रीयाः ब्राह्मणाः आनदपुरे निवसन्ति स्म। ततः परं ते वरारप्रान्ते अचलपुरे *एलिचपुरे* वा आगत्य निवासम् अकुर्वन्। अस्मिन्नेव वंशे नारायणस्वामी जातः। तस्य पुत्रः एव दामोदरः आसीत्। अयमेव दामोदरः भारविः इति नाम्ना प्रख्यातः अभवत्। तत्र भारविविषयकः श्लोकः अयं प्राप्यते।

**स मेधावी कविर्विद्वान् भारविं प्रभवां गिराम् ।**
**अनुरुध्याकरोन्मैत्रीं नरेन्द्रे विष्णुवर्धने॥**

इत्थं भारविः दण्डिनः प्रपितामहः आसीत्। तस्य स्थितिकालः ६०० ईसवीयसमीपे मन्यते। अस्य 'किरातार्जुनीयम्' नाम एकमेव महाकाव्यं प्राप्यते; यत् बृहत्त्रय्यां प्रथमस्थाने' परिगणितम्। संस्कृतविद्वत्समाजे 'भारवेरर्थगौरवम्', 'नारिकेलफलसम्मितं वचो' 'स्पुटता न पदैरपाकृता' इत्याभणकानि सुप्रसिध्दानि

एव। महाकविभारवेः किरातार्जुनीयमहाकाव्ये तज्जीवनविषयकसाक्ष्याभावात् बाह्यसाक्ष्यानुसारं तस्य कालनिर्धारणं करणीयम्।

किरातार्जुनीयस्य कथानकस्य मूलाधारः महाभारतम् अस्ति। महाभारतस्य अष्टादशसर्गेषु वनपर्वणि किरातार्जुनीयस्य कथा अस्ति। अत्र किरातः तत्वेषधारी शिवः अस्ति। महाभारतात् संक्षिप्तकथानकं स्वीकृत्य भारविः स्वकल्पनाभिः काव्यप्रतिभयाच कथानके मौलिकताम् उत्पादितवान्। महाभारतस्य शैली सरला अस्ति किन्तु किरातार्जुनीयस्य शैली क्लिष्टा अलङ्कृता च अस्ति। महाकाव्यलक्षणानुरोधेन भारविः स्थाने स्थाने ऋतु-पर्वत-नदी-वन-प्रातः-सन्ध्यादीनाम् अपि सुन्दरं वर्णनं कृतवान्। **भारवेरर्थगौरवम्** इत्युक्त्यनुसारम् किरातर्जुनीयस्य अर्थगौरवम् अतीव प्रसिद्धमस्ति। भारवेः कृतित्वेन सम्प्रति किरातार्जुनीयमेव लभ्यते। एतदनुमीयते यदेतादृशस्य महाप्रतिभासम्पन्नस्य कवेः स्युरेव तदितरा अपि कृतयः कालेन कवलिताः। किरातार्जुनीयं सर्वविधलक्षणोपेतं महाकाव्यम् अत्र सन्ति अष्टादशसर्गाः सम्प्रति समुपलब्धाः। महाभारतस्य वनपर्वणि समुल्लिखतमर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तमादाय निबद्धमिदं महाकाव्यं भावपक्षापेक्षया कलापेक्षमेव समधिकं पुष्णाति। द्यूते पराजितो युधिष्ठिरः सानुजः सभार्यः संविदानुसारेण वनवासनिमित्तं द्वैतवनं प्रविशति। तत्र स्थितः स दुर्योधनवृत्तान्तज्ञानाय कञ्चित्किरातं वर्णिरूपेण हस्तिनापुरं प्रेषयति। ज्ञातवृत्तश्च स द्वैतवनमागत्य सर्वं राज्ञे निवेदयति। युधिष्ठिरोऽपि तत्सर्वं भ्रातृभ्यः श्रावयति। विपक्षस्योत्कर्षमसहमाना पाञ्चाली पतिं धिक्कृतवती सती युद्धाय प्रेरयति। प्रियोक्तं द्रढयन् भीमोऽपि तं धैर्यमपहाय विक्रमाय प्रेरयति। युधिष्ठिरश्च तं सान्त्वयन्नेव व्यासेन निर्दिश्यते फाल्गुनाय दिव्यास्त्रलाभाय प्रेषयितुम्। तत्परामर्शानुसारमेवार्जुनस्तपसे हिमालयं प्रविशति यक्षेण सह। इन्द्रकीलपर्वतं गत्वा तपसि रतोऽर्जुनोः विघ्नैः प्रतिहन्यमानोऽपि स्वलक्ष्यान्नैव विचलति। तं परीक्षितुं त्र्यम्बकः किरातवेषेण तत्रागच्छति। उभावेव समकालं मायाविनं शंकरं प्रहरतः। तस्य निधनकारणमादाय तयोः विवादः समुत्तिष्ठते। युद्धे पराजितोऽप्यर्जुनः स्वप्रयासं नैव जहाति। तेन परमप्रीतः शङ्करस्तस्मै पाशुपतास्त्रं ददाति।

### १.२ भारवेरर्थगौरवम्

भारवेः काव्ये पदे पदे दृश्यमानं अर्थगौरवं वस्तुतः प्रशंसनीयम्। भारविना स्वप्रतिभाया मूर्त्तरूपभूते किरातार्जुनीये महाकाव्ये येषामुपयोगीनामर्थानां योजना विहिता ते सन्-मार्गदर्शकाः सन्तिः सततमुपकुर्वन्ति मानवजीवनम्। 'कदापि सहसा किमपि कार्यं न कर्त्तव्यम्- अपितु सदा सुविचार्य्येव समाचरणीयम्' इत्यतीव गम्भीरो नितान्तमुपयोगी मूल्यवांश्चार्थः सरलया शैल्या एकस्मिनेव पद्ये सन्निवद्धः कविना–

**सहसा विदधीत न क्रियामविवेकः परमापदं पदम्।**
**वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः।।** (किरात. -२ / ३० )

यत्र नृपामात्ययोः पारस्पारिकं सौमनस्यं तत्रौव संपदां निवासः इति भारवेभिमतम् -

**स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किम्प्रभुः।**
**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥** (किरात. – १ / ५ )

यः राजा मन्त्रिणः समुचितम् उपदेशं समुचितसमये न श्रृणोति स राजा पदवाच्यः न। यः अपि उपयुक्तकाले राज्ञे उपयुक्तम् उपदेशं न प्रददाति सः अपि मन्त्रिपदवाच्यः न भवति। राजमन्त्रिणां मध्ये समुचिताभावः तिष्ठेत् , तर्हि राज्यस्य विविधानां सम्पत्तीनाम् अभिवृद्धिः अवश्यम् भवेत्। अतः मन्त्रिणः वा सम्वाददातारः राजभिः अवश्यं सयत्नं श्रोतव्याः।

अपि च –

"**हितं मनोहारि च दुर्लभं वचः**"(किरात.- १/४)

हितं पथ्यं च मनोहारि प्रियं च वचो दुर्लभम्। अतो मद्वचः अपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः।

मानवजीवनस्योद्बोधकानि एतानि सूक्तिमौक्तिकानि नितान्तमर्थगाम्भीर्यान्वितानि कवेः पाण्डित्यपरिचायकानि च सन्ति। अतः सत्यमेवोक्तं साहित्यसमालोचकैः – भारवेरर्थगौरवम् – इति ।

**१.३ अलंकारः**

भारवेः स्वकाव्ये विविधाः अलङ्काराः प्रयुक्ताः सन्ति। सः शब्दालंकार-अर्थालंकारयोः प्रयोगे निपुणः आसीत्। प्रथमसर्गे मुख्यरूपेण अर्थान्तन्यासः, उपमाअलंकारस्य प्रयोगाः सन्ति।

अर्थान्तन्यासालंकारस्य उदाहरणम् -

**कृतप्रणामस्य महीं महीभुजे**
**जितां सपत्नेन निवेदयिष्यतः।**
**न विव्यथे तस्य मनो न हि प्रियं**
**प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥**(किरात.-१/२)

राज्ञे युधिष्ठिराय प्रमाणनिवेदनपुरःसरः यदा। सन्न्यासिवेशधारी दूतः दुर्य्योधनेन जितस्य राज्यस्य शासनप्रणालीप्रसङ्गे किञ्चित् निवेदयितुमियेषः, तदा तस्य मनः व्यथातुरं नाभूत्। यतः शुभकांक्षिणः कदापि मिथ्याभूतं प्रियं प्रवक्तुं इच्छन्ति।

उक्तमर्थम् अर्थान्तरन्यासेन समर्थयते हि यस्मात्। हितं इच्छन्ति इति– हितैषिणः। स्वामिहितार्थिनः पुरुषाःमृषा – मिथ्याभूतं प्रियं प्रवक्तुं न इच्छन्ति , अन्यथा कार्य्यविघातकतया स्वमिद्रोहिणः स्युरिति भावः। "अमौढ्यम् अमाद्यम् अमृषाभाषित्वम् अभ्युहकत्वम् चेति चारगुणाः "इति नीतिवाक्यामृते।"

अपि च – उपमालंकारस्य प्रयोगः दृश्यते -

**न तेन सज्यं क्वचिदुद्यतं धनुः**

**कृतं न वा कोपविजिह्ममाननम् ।**

**गुणानुरागेण शिरोभिरुह्यते**

**नराधिपैर्माल्यमिवास्य शासनम् ॥** (किरात.-१/२१)

अधुना मित्रवलमाह, तेन राज्ञा क्वचित्, कुत्रापि सहज्यया मौर्व्या सज्यम्। मौर्वो ज्या शिञ्जिनी गुणः, इत्यमरः। तेन सहेति तुल्ययोगे इति वहुव्रीहिः। धनुः उद्यतं न उर्ध्वोकृतम्। आननं वा कोपविजिह्मं कोपकुटिलं न कृतम् यस्य कोप एव न उदेति कुतस्तस्य युद्धप्रसक्ति इतिभावः। कथं तर्हि आज्ञां कारयति राज्ञ इत्यत्राह गुणेति। गुणेषु दयादाक्षिण्यादिषु अनुरागेण प्रेमणा। माल्यपक्षे सुत्रानुषङ्गेण सौरभ्यगुणलोभेन नगधिपैः अन्यभूपालैः अस्य शासनम् आज्ञा माला एव माल्यं तदिव . चातुर्वण्यादित्वात् स्वार्थ ष्यञ् , इति क्षीरस्वामी शिरोभिः उह्यते धार्य्यते। वचि स्वपियजादीनां किति इतियकि सम्प्रसारणम्। अत्र उपमा स्फुटैव।

**१. ४ छन्दः**

किरातार्जुनीयस्य प्रथमसर्गे प्रथमश्लोकतः आरभ्य चतुः-चत्वारिंशत् श्लोकाः यावत् वंशस्थछन्दसः प्रयोगः भृशं दृश्यते।

**निसर्गदुर्बोधमबोधविक्लवाः**

**क्व भूपतीनां चरितं क्व जन्तवः ।**

**तवानुभावोऽयमवेदि यन्मया**

**निगूढतत्त्वं नयवर्त्म विद्विषाम्॥** (किरात.-१/६)

केवलमात्रं पञ्चचत्वारिंशत् श्लोके पुष्पिताग्राछन्दसः प्रयोगः भवति-

**न समयपरिरक्षणं क्षमं ते**

**निकृतिपरेषु परेषु भूरिधाम्नः।**
**अरिषु हि विजयार्थिनः क्षितीशा**
**विदधति सोपधि सन्धिदूषणानि॥** (किरात.-१ /४५)

एवं च षट्चत्वारींशत् श्लोके मालिनी इति छन्दसः प्रयोगः भवति।

**विधिसमयनियोगाद्दीप्तिसंहारजिह्मं**
**शिथिलवसुमगाधे मग्नमापत्पयोधौ ।**
**रिपुतिमिरमुदस्योदीयमानं दिनादौ**
**दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥** (किरात.-१/४६)

**१. ५ भाषा सौष्ठवम्**

भारवेर्भाषा खलु भावमयी प्रभावमयी माधुर्य्यमयी गौरवमयी च वरीवर्त्तते। पदानां विशदता, अर्थानां गरिमा वाचां भिन्नार्थता वर्णानां च शक्तिमत्ता भारवेर्भाषायाः वैशिष्ट्यं विद्यते।

**स्फुटता न पदैरपाकृता**
**न च न स्वीकृतमर्थगौरवम्।**
**रचिता पृथगर्थता गिरां**
**न च सामर्थ्यमपोहितं क्वचित्॥** (किरात.-२ /२७)

वाग्-विशेषे भारवेर्मान्यता सर्वथा अद्वितीय। तदनुसारं सा एव वाग्-वारियसी यासुस्पष्टाक्षरा सुखश्राव्या च सती शत्रुणामपि हृदयानि प्रसादयितुं समर्था स्यात् यस्य चाखिलानि पदानि विमलानि गम्भीराणि च स्युः। वस्तुतः एतादृशी विलक्षणा वाणी पुण्यात्मभिरेव प्राप्यते।

एतानि पद्यनि भारवेर्भाषापटुतां वाग्-विशेज्ञतां च विद्योतयन्ति। इत्थञ्च भारवेः प्रतिपदं भावसौष्ठवम् अर्थगाम्भीर्य्यं च संलक्षन्ते ।

**१. ६ उपसंहृतिः**

भारवेः किरातार्जुनीयमहाकाव्ये अनेकाः विषयवस्तुनि सन्निवेशितानि , परन्तु प्रथमसर्गस्य सामाजिकं तथा राजनैतिकं गुरुत्वं सर्वथा अस्ति। भारविः राजनीतौ एकः धुरीणः पण्डितरासीत्। ज्ञायते यत् सः राजकार्ये संपूर्णरूपेण सक्रियाशंग्रहणं कृतवान्। राज्यस्य वृत्तान्तः ददन् गुप्तचरः अत्यन्तः शिष्टाचारः, निर्भिकः, सत्यवादी तथा कर्त्तव्यपरायणः भवेदिति भारविः काव्यस्य प्रथमसर्गे मतव्यक्तं कृतवान्। यथा– "कृतप्रणामस्य महीं महीभुजे ………………मृषा हितैषिणः।। "द्रैपद्याः चरित्रमाध्यमेन एकस्याः वीरनार्याः चरित्रं वहुसुन्दरतया

महाकाविः चित्रितवान्। किरातार्जुनीयमहाकाव्यस्य प्रतिछत्रं भारतस्यसंस्कृतेः वर्णना प्राप्यते। आलंकारिकदृष्टेः अपि किरातार्जुनीयमहाकाव्यं अत्यन्तं गुरुत्वपूर्णम्। उपमा, उत्प्रेक्षा प्रभृतीनां अलंकाराणां समुचितः सन्निवेशः, शब्दः तथा अर्थस्य समविन्यास्यः च सर्वोपरि नानारसानां यथार्थं परिवेषणं काव्यस्य श्रीं वर्द्धितवान्।

## सन्दर्भग्रन्थाः


1. पाण्डे,जनार्दन, महाकविभारविप्रणीतंकिरातार्जुनीयम्, (प्रथम-तृतीयः सर्गः) , ISBN : 13-978–1820838178, मोतिलाल बनारसीदास प्रकासन्, प्रथम संस्करण – 2014 ।
2. यादव , बलवान सिंह, महाकविभारविरचितंकिरातार्जुनीयम्, (प्रथमसर्गः), चौखम्भा संस्कृत भवन, वाराणसी, संस्करण– 2016 ।
3. पाण्डे, परमेश्वरदीन, महाकविभारविप्रणीतंकिरातार्जुनीयम्, ( प्रथमसर्गः ) चौखम्बा कृष्णदास अकादमी, वाराणसी।
4. मिश्र,बदरीनाराण, महाकविभारविप्रणीतंकिरातार्जुनीयम्, ISBN : 978-93-81484-27-2 , चौखम्बा सुरभारती प्रकाशन, वारणासी, संस्करण-2020।
5. Kale,M.R.,The Kiratarjuniyam of Bharavi, Cantos I- III, ISBN - 9788120805712, Motilal Banarsidass Publishers Private limited,Delhi, Fourth : 1966.
6. Gupta, Dharmendra Kumar, Kavya Darshah,ITEM CODE – NZ0387, Meherchand Lakshmandas Publication : 2006.
7. ଶତପଥୀ, ହରେକୃଷ୍ଣ, ମହାକବିଭାରବିବିରଚିତଂକିରାତାର୍ଜୁନୀୟମ୍ ( ପ୍ରଥମସର୍ଗ), କିତାବମହଲ, କଟକ, ୬ଷ୍ଠ ସଂସ୍କରଣ : ୨୦୧୪ ।
8. ମହାପାତ୍ର, ଗୋପୀନାଥ,ଭାରବେଃକିରାତାର୍ଜୁନୀୟମ୍ (ପ୍ରଥମସର୍ଗ),ନାଳନ୍ଦା,ବିନୋଦ ବିହାରୀ ,କଟକ-୨, ପରିବର୍ଦ୍ଧିତ ନୂତନ ସଂସ୍କରଣ -୧୯୯୧ ।
9. ଶତପଥୀ, ହରେକୃଷ୍ଣ, ସଂସ୍କୃତ ସାହିତ୍ୟର ଇତିହାସ, ISBN: 978-93–80360–55–3, କିତାବ ମହଲ, କଲେଜ୍, କଟକ, ଚତୁର୍ଥ ସଂସ୍କରଣ ୨୦୦୮ ।

# दूतकाव्यपरम्परा: साहित्यशास्त्रीय एवं ऐतिहासिक दृष्टि

**डॉ. शैलेश कुमार मिश्र**
असिस्टेंट प्रोफेसर राजकीय संस्कृत
कॉलेज, राँची

**"रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुकीभवति ...[1]"** के आलोक में यह कहना अनुचित न होगा कि जब ईश्वर की कविता से आपका साक्षात्कार होता है ; वह आपके चर्मचक्षुओं के माध्यम से हृदय की अतल गहराइयों में उतरकर आपको झिंझोड़ती है तो आप पर्युत्सुक हो उठते हैं, उत्कण्ठित हो जाते हैं। यह पर्युत्सुकीभवन आपके अव्यक्त हृदय की छटपटाहट है, भावों का ज्वार अभिव्यक्त कर देने के लिए। कवि एक ऐसा ही पर्युत्सुक प्राणी है जो ईश्वर की चक्षुष्पेय या श्रोत्रपेय अभिराम रचनाओं से उत्कण्ठित हो स्वयं को अभिव्यक्त कर देना चाहता है। उस क्षण वह कविता के शब्द नहीं ढूँढता फिरता, शब्द ही उसे झकझोरते हैं मध्यमा से वैखरी तक पहुँचा देने के लिए। कवि फिर उन शब्दों का जिस तरह प्रयोग करता है कि वे पुराने नहीं रह जाते, अपने पुराने परिधान को त्यागकर कविप्रदत्त एक नई अर्थच्छटा को धारण करते हैं जिसका साक्षात्कार कोई तत्त्वार्थदर्शिनी बुद्धि ही कर सकती है। आचार्य आनंदवर्धन के शब्दों में - **"बुद्धौ तत्त्वार्थदर्शिन्यां झटित्यवभासते।[2]"**

मेघदूत एक ऐसे ही पर्युत्सुकहृदय कवि के तरलतर भावों की अभिव्यंजना है। साहित्य में दौत्यकर्म की परम्परा अति पुरातन है। ऋग्वेद(१०/१०८) में देवराज इंद्र ने देवशुनी सरमा को पणियों के पास दूत बनाकर भेजा है। सरमा कहती है -'हे पणियों ! मैं इन्द्रदेव की दूती बनकर आई हूँ। आप लोगों ने जिस महिमामय गोधन को एकत्रित किया है, उसे प्राप्त करने की मेरी अभिलाषा है। उन इन्द्रदेव के भय से जल ने मुझे आने दिया (उसे मैंने पार किया। इस प्रकार से रस प्रवाहों को पारकर मेरा आना हुआ है -

**इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः।**

**अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि।।**[3]

ऋग्वेद (५/६१) में ही रथवीति की पुत्री के साथ अपने विवाह के लिए ऋषि श्यावाश्व रात्रि को दूती बनाकर भेजते हैं। श्यावाश्व कहते हैं -"हे रात्रि देवि! रथवीति द्वारा संपादित सोमयाग में हमारी कामनाएँ विफल नहीं हुई हैं, ऐसे मेरे वचन उनसे कहें। यह धनवान् रथवीति गोमती नदी के किनारे निवास करते हैं, और पर्वतों में भी उनका निवास है -

**उत मे वोचतादिति सुतसोमे रथवीतौ।**

**न का मो अप वेति मे ।।**

**एष क्षेति रथवीतिर्मघवा गोमतीरनु**

**पर्वतेष्वपश्रितः ।।**[4]

दौत्यपरम्परा के ये प्राचीनतम सन्दर्भ हैं। इसके पश्चात् लौकिक साहित्य में रामायण के किष्किन्धा और सुन्दरकाण्ड में हनुमत्संदेश तथा महाभारत के वनपर्व में नलोपाख्यान में हंससन्देश प्राप्त होता है। श्रीमद्भागवत के दशम स्कंध में गोपियों के पास उद्धव को भेजना आदि दौत्यकर्म के उल्लेख्य प्रसंग हैं।

साहित्य में दूत के माध्यम से अपने भावों की अभिव्यक्ति की यह अवधारणा कालिदास को विरासत में मिली अवश्य थी किन्तु साहित्यिक दौत्यपरम्परा का सूत्रपात उनके मेघदूत से ही माना जाता है , जो अपने भावों की हृदयावर्जकता और कोमलकान्त शब्दावली से संपूर्ण विश्व के सहृदयों के हृदय पर राज करता है। मेघदूत में कवि की तरलभावार्द्र अभिव्यंजना का जादू आस्वादकों के सर चढ़कर बोलता है जिससे कोई भी सहृदय मेघदूत की कोमलकान्त पदावली में सन्निहित सुरम्य भावों से पर्युत्सुक हो उठता है और उसके भीतर का कवि कालिदास के पदचिह्नों का अनुसरण करता हुआ किसी चेतन अचेतन को अपना दूत बनाकर अपने को अभिव्यक्त कर देने को उत्कण्ठित हो उठता है। इन्हीं उत्कण्ठाओं ने दूतकाव्य की एक सुदीर्घ परम्परा को जन्म दिया है जो अब तक अविच्छिन्न है।

मेघदूत का अनुकरण दो प्रकार से हुआ है।कुछ कवियों, विशेषतः जैनकवियों ने मेघदूत की पंक्तियों की अविकल समस्यापूर्ति के रूप में दूतकाव्यों की रचना की। अर्थात् अपने काव्य के पद्यों में तीन चरण स्वरचित और चौथे चरण के रूप में मेघदूत के पद्य का एक चरण रखा। दूसरे प्रकार का अनुकरण सन्देश-प्रेषण के रूप में है, जो वस्तुतः मेघदूत का अनुकरण कहा जा सकता है। कतिपय समीक्षकों के मत में इस काव्यपरम्परा में कालिदास के पश्चात् सबसे पहला दूतकाव्य धोयी कवि का पवनदूत है, हालाँकि प्रो. उमाशंकर शर्मा 'ऋषि' अपने ग्रन्थ 'संस्कृत साहित्य का इतिहास' में यह सूचना देते हैं कि जम्बूकवि का 'चन्द्रदूत' प्राचीनतम दूतकाव्य है जिनका समय 959 ई. है। धोयी बारहवीं शती में वर्तमान बंगाल के राजा लक्ष्मणसेन के सभाकवि थे। पवनदूत में मन्दाक्रान्ता छन्द में निबद्ध १०४ श्लोक हैं। इसमें दक्षिण भारत की कुवलयवती नामक गंधर्वकन्या ने राजा लक्ष्मणसेन के पास पवन के माध्यम से अपना प्रणयसन्देश भेजा है। कालिदासोत्तर दूतकाव्यों की लम्बी श्रृङ्खला में शताधिक दूतकाव्यों की सूचना मिलती है जिनमें चेतन अचेतन दोनों को दूत बनाकर सन्देशप्रेषण का कार्य किया गया है। इनमें मेरुतुङ्ग

(प्रबन्धचिन्तामणिकार से भिन्न) का जैनमेघदूत(१४वीं शती), रुद्रवाचस्पतिकृत पिकदूत और भ्रमरदूत (१५वीं शती), रङ्गनाथ के पुत्र उद्दण्डकवि का कोकिलसन्देश(१५वीं शती), रूपगोस्वामी का उद्धवसन्देश(१६वीं शती), नवद्वीप (बङ्गाल) निवासी कृष्णसार्वभौम का पदाङ्कदूत (१६वींशती), बङ्गाल निवासी विष्णुदास का मनोदूत (१६वीं शती), विष्णुदास के शिष्य रामराम का मनोदूत (१६वींशती), वैद्यनाथ भट्टाचार्यकृत तुलसीदूत (१७वीं शती), तैलङ्गव्रजनाथकृत मनोदूत (१८वीं शती),माधवशर्मा का उद्धवदूत(१९वीं शती), वेदान्तदेशिक का हंससन्देश, वादिचन्द्र का पवनदूत, भोलानाथ ब्राह्मण का पान्थदूत, कालीप्रसाद शर्मा का भक्तिदूत या भक्तिदूती, श्रीविज्ञसूरी वीरराघवाचार्य का हनुमत्सन्देश (१९वीं शती) तथा म.म. रामावतारशर्माकृत मुद्गरदूत (२०वीं शती) उल्लेखनीय हैं। मेघदूत की समस्यापूर्ति पर अनेक जैन काव्यों की रचना हुई है जिनमें प्रत्येक श्लोक में मेघदूत के एक या दो पाद रखे गये हैं। इनमें जिनसेनकृत पार्श्वाभ्युदय (९वीं शती), विक्रमकविकृत नेमिदूत (१४वीं शती) बृहत्तपागच्छीय चरित्रसुन्दरगणिरचित शीलदूत(१५वीं शती) आदि उल्लेख्य हैं।

स्वातन्त्र्योत्तर भारत में भी दूतकाव्यसर्जना की अविच्छिन्न परम्परा अद्यावधि वर्तमान है। १९७० ई. के दशक में तत्कालीन बिहार में तीन दूतकाव्य राँची में रचे गये थे। ये हैं - प्रो. दिनेशप्रसाद पाण्डेय कृत मित्रदूत (१९७३ई.), प्रो. रामाशीष पाण्डेय कृत मयूखदूत (१९७४ई.) तथा प्रो. वनेश्वर पाठक कृत प्लवंगदूत (१९७५ई.)। वर्तमान शताब्दी के आरम्भ में प्रो. अभिराजराजेन्द्र मिश्र का मृगाङ्कदूत इस परम्परा की उल्लेख्य कड़ी है। इन पंक्तियों के लेखक ने भी भगवान् केदारनाथ को इन्दु के माध्यम से अपनी अभ्यर्थना शान्तरस में निबद्ध अपने दूतकाव्य ‘इन्दुदूतम्’ में निवेदित की है।

इन दूतकाव्यों की कई कोटियाँ हैं। इनमें कुछ तो शुद्ध श्रृङ्गारी काव्य हैं। कुछ काव्य रामकथा पर आश्रित हैं जिनमें सीता को सन्देश भिजवाने के लिये हनुमान् या किसी अन्य दूत का आश्रय लिया गया है। वेदान्तदेशिक का हंससन्देश , रुद्रवाचस्पति का भ्रमरदूत तथा कृष्णचन्द्र तर्कालंकार का चन्द्रदूत इसी के अन्तर्गत आते हैं। तीसरे प्रकार के दूतकाव्य कृष्णकथा पर आधारित हैं जहाँ कृष्ण और गोपियों के मध्य सन्देशप्रेषण का कार्य किया गया है। इन रचनाकारों में बङ्गाल के गौड़ीय संप्रदाय के कवि प्रमुख हैं। इनमें रूपगोस्वामी का उद्धवसन्देश और हंसदूत तथा भोलानाथ ब्राह्मण का पान्थदूत आदि हैं। चौथी परम्परा उन दूतकाव्यों की है जिनमें श्रृङ्गार के बजाय शान्तरस की परिपुष्टि हुई है। विष्णुदास का मनोदूत और कालीप्रसाद का भक्तिदूत या भक्तिदूती ऐसे ही काव्य हैं। संस्कृतेतर भाषाओं में भी दूतकाव्यों की रचना हुई है। बारहवीं शताब्दी में रचा गया अद्दहमाण या अब्दुलरहमान का संदेशरासक अपभ्रंश का उल्लेखनीय दूतकाव्य है। इसमें विरहिणी नायिका एक पथिक के माध्यम से अपने प्रिय को संदेश

भिजवाती है। एक छन्द ध्यातव्य है, जहाँ कवि कहता है कि विजयनगर की कोई सुन्दर रमणी जो ऊँचे, स्थिर और स्थूल स्तनों वाली है, जिसकी कटि पतली है, चाल हंस के समान है, विरह में जिसका मुखमंडल दीन हो गया है, वह आँसू बहाती हुई अपने प्रिय का पंथ निहार रही है। स्वर्णाभ देहयष्टि वाली उस रमणी का शरीर इस प्रकार श्यामल हो गया है मानो राहु द्वारा चन्द्रमा सम्पूर्ण रूप से ग्रस लिया गया है-

**विजयनयरहु कावि वररमणि,**
**उत्तंगथिरथोथणि, विरुडलक्कि, धयरट्ठपउहरि।**
**दीणाणहि पहुणिहइ, जलपवाह पवहंति दीहरि।**
**विरहग्गिहि कणयंगितणु तह सामलिमपवन्नु।**

**णज्जइ राहि विडंबिअउ ताराहिवइ सउन्नु ।।**[5]

सूरदास का भ्रमरगीत ब्रजभाषा में इस परम्परा का प्रतिनिधित्व करता है जहाँ उद्धव सन्देशवाहक का कार्य करते हैं। खड़ी बोली के आधुनिक हिन्दी काव्यों में कविवर हरिऔध जी के प्रियप्रवास का नामोल्लेख आवश्यक होगा जिसके षष्ठ सर्ग के अन्तिम ५८ पद्य मन्दाक्रान्ता छन्द में निबद्ध हैं, जिनमें राधा पवन को अपना दूत बनाकर मथुरा भेज रही हैं। विरहिणी राधा के हृदय के टीस की सशक्त अभिव्यंजना कवि ने की है। खड़ी बोली में मन्दाक्रान्ता का यह अभिनव प्रयोग है। यथा –

**मेरे प्यारे नव जलद से कंज से नेत्र वाले**
**जाके आये न मधुवन से औ न भेजा संदेशा।**
**मैं रो-रो के प्रियविरह से बावली हो रही हूँ**
**जाके मेरी सब दुःख कथा श्याम को तू सुना दे ।।**[6]

दूतकाव्यों की काव्यशैली को गीतिकाव्य का नाम दिया गया है। वस्तुतः प्राचीन अलङ्कारशास्त्रीय ग्रन्थों में गीतिकाव्य जैसी किसी काव्यविधा का उल्लेख नहीं मिलता है। हृदय के तरल भावों को अभिव्यक्त करने वाली , गेयता से परिपूर्ण काव्यविधा गीतिकाव्य की संज्ञा से अभिहित है। आचार्य बलदेव उपाध्याय ने गीतिकाव्य के सम्बन्ध में अपने ग्रन्थ ‘संस्कृत साहित्य का इतिहास’ में लिखा है - “गीति की आत्मा भावातिरेक है। कवि अपनी रागात्मक अनुभूति तथा कल्पना से वर्ण्य विषय तथा वस्तु को भावात्मक बना देता है। गीतियों का निर्माण उस बिन्दु पर होता है, जब कवि का हृदय सुख-दुःख के तीव्र अनुभव से आप्लावित हो जाता है और वह अपनी रागात्मिका अनुभूति को अपनी हार्दिक भावना की

पूर्णता के कारण बाह्य अभिव्यक्ति के रूप में परिणत करता है। 'स्वगम्य' अनुभूति को 'परगम्य' अनुभूति के रूप में परिणत करने के लिये कवि जिन मधुर भावापन्न रससान्द्र उक्तियों का माध्यम पकड़ता है वही होती हैं गीतियाँ। इसके लिये कतिपय उपकरण आवश्यक होते हैं जो इसके साधक तत्व होते हैं।

भावमयता इनमें मुख्य है। संक्षिप्तता तथा गेयता उसके अन्य उपलक्षण हैं। कवि को गीति में वर्ण्य विषय के परिबृंहण के लिये अवकाश नहीं होता; कभी-कभी भावना का आवेश इतना क्षणिक होता है कि कवि एक ही पद या पद्य में उसकी पूर्ण अभिव्यक्ति कर देता है। अनुभूति तथा अभिव्यक्ति के तारतम्य पर ही काव्य के परिमाण का प्रश्न आधारित होता है नहीं तो संक्षिप्तता गीतिकाव्य का आवश्यक तत्त्व होता है। गेयता इसी प्रकार गीति का अनिवार्य उपादान है। काव्य तथा संगीत दो पृथक्-पृथक् अभिव्यक्तियाँ हैं। काव्य अपनी अभिव्यंजना के निमित्त संगीत का सहारा नहीं चाहता और संगीत भी अपने प्राकट्य के निमित्त काव्य का आलम्बन नहीं चाहता परन्तु दैवयोग से दोनों का एकत्र समन्वय कला की दृष्टि से एक अत्यन्त उत्कृष्ट अभिव्यक्ति का रूप धारण करता है, और गीति उसका मधुमय मोहन काव्यरूप है।"[7]

अंग्रेज़ी काव्यजगत् में गीतिकाव्य 'लीरिक पोयट्री' के नाम से अभिहित है। Lyric शब्द की उत्पत्ति Lyre शब्द से हुई है जो एक तन्त्रीवाद्य है। Lyre पर गाये जाने के कारण काव्य की यह विधा Lyric Poetry के नाम से अभिहित हुई।

काव्यशैली की दृष्टि से गीतिकाव्य को द्विविध रूपों में देखा जा सकता है- मुक्तक और प्रबन्ध। मुक्तक काव्य संदर्भनिरपेक्ष एवं पूर्वापर प्रसंग से मुक्त हुआ करता है। मुक्त का अर्थ है अन्य से अनालिङ्गित -**"मुक्तमन्येनानालिङ्गितं स्यात् तस्य संज्ञायां कन्।"**[8] अभिनवगुप्त कहते हैं कि यदि प्रबन्ध के मध्य में भी मुक्तक की सत्ता मानी जाय तो जिस पूर्वापरनिरपेक्ष श्लोक से रसचर्वणा की जाए वह मुक्तक है - **"पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम्।"**[9] भर्तृहरि के शतककाव्य और अमरूककवि का अमरूशतक प्रसिद्ध मुक्तककाव्य हैं।

दूसरे प्रकार का गीतिकाव्य प्रबन्धगीति है जिसमें कोई कथा गुम्फित होती है। अतः इसके श्लोक संदर्भसापेक्ष, परस्पर एकसूत्र में बँधे होते हैं। मेघदूत प्रबन्धगीतिकाव्य है। साहित्यदर्पणकार विश्वनाथ ने ऐसे प्रबन्धगीतिकाव्यों को खण्डकाव्य की संज्ञा दी है - **"खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च यथा मेघदूतादि।"**[10] अर्थात् काव्य या महाकाव्य के कतिपय लक्षणों से युक्त पद्यप्रबन्ध खण्डकाव्य कहलाता है।

दो चार अपवादों को छोड़कर दूतकाव्यपरम्परा में रचे गये तमाम दूतकाव्य मन्दाक्रान्ता छन्द में निबद्ध हैं। संदेशप्रेषण दूतकाव्य का प्रधान गुण है अतः इसे सन्देशकाव्य का नाम भी दिया गया है। अतएव कतिपय काव्यों में दूत के स्थान पर सन्देश शब्द का प्रयोग किया गया है यथा -उद्धवसन्देश, हंससन्देश आदि।

विरहोन्मादी जब अपना सन्देश भेजने को उत्कण्ठित रहता है तो वह सन्देशवाहक की योग्यता, अयोग्यता का विचार भी नहीं कर पाता। सीता के वियोग में दुःखी राम तो पशु-पक्षियों, पौधों से सीता का पता पूछते फिरते हैं - **"हे खग मृग हे मधुकर श्रेणी तुम देखी सीता मृगनयनी।"**[11] काव्यों में ऐसे अयोग्य संदेशवाहकों का प्रयोग देखकर आचार्य भामह ऐसे काव्यों को अयुक्तिमत् दोष से युक्त मानते हैं-

**अयुक्तिमद् यथा दूता जलभृन्मारुतेन्दवः।**

**तथा भ्रमरहारीतचक्रवाकशुकादयः।।**

**अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः।**

**कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते ।।**[12]

समीक्षक तो काव्य को बुद्धि की तुला पर भी तोलता है इसलिये मेघ पवन, शुक, पिकादि दौत्यकर्म में अयोग्य दीख पड़ते हैं; किन्तु कवि, वह भी विरहोन्मादी चित्त की दशा को चित्रित करने वाला, केवल और केवल हृदय से काम लेता है। कालिदास ने भामह के आक्षेप का समाधान पहले ही दे दिया है - **"कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।"**[13] विरहीजन चेतन और अचेतन का विचार नहीं करते, सन्देशप्रेषण उनका एकमात्र उद्देश्य होता है। कालिदास के इस तर्क से मानो प्रभावित भामह आगे स्वीकार कर लेते हैं कि यदि उत्कण्ठा के कारण कोई उन्मत्त के समान असंबद्ध बोलता है तो ऐसा हो सकता है। बुद्धिमान् इसका प्रचुर प्रयोग भी करते हैं-

**यदि चोत्कण्ठया यत्तदुन्मत्त इव भाषते।**

**तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते ।।**[14]

कालिदास की कवितावनिता (विशेषकर मेघदूत) के मदिरनयनों में झाँकनेवाला सहृदय उससे आसक्त हुए बिना नहीं रह सकता। मेघदूत की आसक्ति से आविर्भूत दूतकाव्य की परम्परा अब भी निरन्तर वर्धमान है।

## पादटीका

1.अभिज्ञानशाकुन्तल-5.2 2. ध्वन्यालोक -1.12 3. ऋग्वेद-10.108.02

4.वही- 5.61.18-19 5.सन्देशरासक-2.24 6.प्रियप्रवास-6.33

7.संस्कृत साहित्य का इतिहास(बलदेव उपाध्याय) -पृ.323

8.ध्वन्यालोक-3.7 पर लोचन 9.वही- 3.7 पर लोचन 10.साहित्यदर्पण- 6.328

11.रामचरितमानस-अरण्यकांड दोहा 29(ख) के बाद 12.काव्यालंकार(भामह)-1.42- 43 13.मेघदूत-पूर्वमेघ -5

14.काव्यालंकार(भामह)- 1.44

## सन्दर्भग्रन्थाः

1. अभिज्ञानशाकुन्तलम्- डॉ. हरिदत्त शास्त्री एवं प्रो. शिवबालक द्विवेदी, ग्रन्थम् ,रामबाग,कानपुर, 1983

2. ऋग्वेद- सं. पं.श्रीराम शर्मा आचार्य, युगनिर्माणयोजना विस्तार ट्रस्ट, मथुरा, 2010

3. काव्यालंकार(भामह)- सं. आचार्य देवेन्द्रनाथ शर्मा, बिहार राष्ट्रभाषा परिषद्, पटना, 1985

4. ध्वन्यालोक- डॉ. रामसागर त्रिपाठी, मोतीलाल बनारसीदास, दिल्ली, 1989

5. प्रियप्रवास- अयोध्या सिंह उपाध्याय ‘हरिऔध’, लोकभारती प्रकाशन, इलाहाबाद, 2008

6. मेघदूत : एक अनुचिंतन - डॉ. श्रीरंजन सूरिदेव, मोतीलाल बनारसीदास, दिल्ली, 1985

7. रामचरितमानस- गीताप्रेस गोरखपुर, सं. 2057

8. संदेशरासक- सं. आचार्य हजारी प्र.द्विवेदी एवं डॉ. विश्वनाथ त्रिपाठी, राजकमल प्रकाशन,दिल्ली, 2008

9. संस्कृत साहित्य का इतिहास - आचार्य बलदेव उपाध्याय, शारदा निकेतन, 1987

10. संस्कृत साहित्य का इतिहास- प्रो. उमाशंकर शर्मा ‘ऋषि’,चौखम्बा भारती अकादमी, वाराणसी 2014

11. साहित्यदर्पण- डॉ. सत्यव्रत सिंह, चौखम्बा विद्याभवन, वाराणसी, 1997

# पञ्चमहाकाव्यव्याख्यानेषु मल्लिनाथस्य अलङ्कारयोजनाचातुरि

**डॉ. एम. किषनः,**
सहायकाचार्यः, संस्कृतविभागः,
दिल्लीविश्वविद्यालयः,
नई दिल्ली-११०००७

**प्रस्तावना**

प्रभुसम्मितेभ्यः वेदेभ्यः सुहृत् सम्मितेभ्यः शास्त्रपुराणेभ्यः कान्तासम्मितानि काव्यानि उत्तमोपदेशकाणि इति विदुषां मतम्। प्राचीनः कालिदासादीनां काव्यानि स्वप्रज्ञया एव अध्येतुं शक्ताः आसन् गच्छतिकाले काव्यार्थोऽपि दुरवग्राह्यः असद्गृहीतः वा अभूत्। विशेषतः नैषधीयचरितादिकाव्यानि ग्रन्थ-ग्रन्थिपूर्णानि सामान्यतः अध्येतुमशक्यानि आसन्। ततो विद्वांसः काव्यानामपि व्याख्यानानि लोकानुग्रहाय रचयामासुः।

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**
**आकाङ्क्षो अथ समाधानं व्याख्यानं षड्विधं मतम्** ॥1।।

एवं व्याख्यानलक्षणमनुसृत्य A.D दशमशतकात् प्रागेव बहवः पण्डिताः बहूनि काव्यानि व्याख्यातवन्तः। किन्तु A.D द्वादशशतके मल्लिनाथेन पूर्वकृतानि व्याख्यानानि असम्पूर्णानि मत्वा बहूनां काव्यानां शास्त्रग्रन्थानां च व्याख्यानानि विरचय्य "व्याख्यातृचक्रवर्ति" इति बिरुदाङ्कितोऽभूत्। व्याख्यारम्भे सर्वेषु ग्रन्थेषु स्वव्याख्या रीतिमपि एवं प्रतिजानीते।[1]

**इहान्वयमुखेनैव सर्वं व्याख्यायते मया।**
**नामूलं लिख्यते किञ्चित् नानपेक्षितमुच्यते ॥2॥**

मल्लिनाथः नवमहाकाव्यानां सप्तशास्त्रग्रन्थानां व्याख्यानानि रचितवान्। स्वयं च द्वादशाधिकान् ग्रन्थान् रचयामास। मल्लिनाथः स्वव्याख्यासु बहून् शास्त्रविषयान् धर्मशास्त्राणि, अर्थशास्त्रविषयान्, कामशास्त्रविषयान्, सङ्गीतशास्त्रविषयान् च उदाहृतवान्। प्राचीनव्याख्यानानि दोषयुक्तानि निश्चित्य कालिदासादीनां काव्यानां व्याख्यां करोमि इति मल्लिनाथः स्पष्टमुक्तवान् यथा –

**कालिदास कवेर्वाणी दुर्व्याख्या विषमूर्च्छिता ।**
**एषा सञ्जीविनी टीका तामघोज्जीवयिष्यति ॥ ३ ॥**

पञ्चमहाकाव्येभ्यः अतिरिक्तानां मेघसन्देशभट्टिकाव्यादीनामपि व्याख्याः मल्लिनाथस्य प्रसिद्धाः किन्तु अस्मिन् गोष्टी पत्रे "पञ्चमहाकाव्यव्याख्यानेषु मल्लिनाथस्य अलङ्कारयोजना चातुरी" इति मुख्यतया गृहीतः।

पञ्चकाव्यानां गणना विद्वद्भिः एवमङ्गीकृता कालिदासकाव्यद्वयम्-

| | |
|---|---|
| कालिदासकाव्यद्वयम् - | १. **रघुवंशमहाकाव्यम्** |
| | २. **कुमारसम्भवम्** |
| माघकवेः - | ३. **शिशुपालवधम्** |
| भारवेः - | ४. **किरातार्जुनीयम्** |
| श्रीहर्षस्य- | ५. **नैषधीयचरितम् इति** 3 |

केचित् पुनः नैषधीयचरितस्थाने मेघसन्देशम् इच्छन्ति किन्तु तस्य परिणामित्वाभावात् नैषधस्याङ्गीकारः एव समञ्जसः। तेषु काव्येषु व्याख्यायां सम्यक् तया निरुपितम्।

**१. रघुवंशकाव्ये अलङ्कारयोजना चातुरी -**

रघुवंश महाकाव्ये शब्दालङ्काराणां प्रयोगः विरलतर एव। तथापि नवमसर्गे दशरथस्य वर्णने तत्र तत्र शब्दालङ्कारप्रयोगः दृष्टः मल्लिनाथेन शास्त्रप्रमाणप्रदर्शनपूर्वकं शब्दान् व्याख्याय तस्यार्थः सम्यक् तया निरूपितः।

**प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः।**
**उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः॥**

अत्र चतुर्थपादे "हरिहयोऽरिहयोग" इति यमकप्रयोगः। हरिहयः, अरिहयः इति पदद्वयावृत्या पादयमकम् एवं तिसृभिः इति पदस्य द्विरावृत्या पदगतं यमकम्। प्रजाः "**विनिनीषुरिव**" इति सामान्यधर्मप्रयोगेन हरिहयेन= इन्द्रेण साम्य प्राप इति उपमालङ्कारः। एवं शब्दालङ्कारस्य यमकस्य अर्थालङ्कारस्य उपमायाश्च सङ्करः मल्लिनाथेन विनासांकर्यं सम्यक् व्याख्यातः।4

यथा प्रियतमाभिरिति। अरिन्नन्तीत्यरिहणो रिपुन्नाः। हन्तेः क्विप् **'ब्रह्मभ्रूणवृत्रेषु क्विप्'**[2] इति नियमस्य प्रायित्त्वात्। यथाह न्यासकारः प्रायिकश्चायं नियमः क्वचिदन्यस्मिन्नप्युपपदे दृश्यते मधुहा। प्रायिकत्वं च वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यते इति तेषु योगेषूपायेषु विचक्षणो दक्षः। 'योगःसन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः। प्रजा विनिनीषुर्विनेतुमिच्छुस्तिसृभिः शक्तिभिः प्रभुमन्त्रोत्साहशक्तिभिरेव सह भुवमुपगतो हरिहय इन्द्रइव बभौ।

रघुवंशमहाकाव्ये शब्दालङ्काराः विरलाः एव अर्थालङ्काराणां प्रयोगः एव विशेषतया दृश्यते । षष्ठसर्गे अजेन्दुमत्योः विवाहवर्णने स्वयंवरसमये च कालिदास प्रयुक्ताः उपमालङ्काराः सर्वेभ्यः अलङ्कारान्तरेभ्यः रमणीयतराः वर्तन्ते । इन्दुमती मगधराजादीन् सर्वान एकैकशः अतिक्रम्य पुरः जगाम तदानीं तिरस्कृतानां राज्ञां मुखानि कलाहीनानि बभूवुः इति वर्णनेन कालिदासः एव “**दीपशिखा कालिदासः**” इति प्रसिद्धं प्राप्तवान्। मल्लिनाथः तत्रस्थ अट्टशब्दस्य अनुकूलकोशार्थनिरूपणेन उपमां शोभातिशायिनीं व्याख्यातवान्।3

**संचारणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।**

सञ्चारिणीति पतिंवरा सेन्दुमती रात्रौ संचारिणी दीपशिखेव यं यं भूमिपालं व्यतीयायातीत्यगता स स भूमिपालः। स सर्व इत्यर्थः। नित्यवीप्सयोः[4] इति वीप्सायां द्विवचनम्। नरेन्द्रमार्गे राजपथेऽट्टाख्यो गृहभेद इव स्यादट्टः क्षौममस्त्रियाम् इत्यमरः। विवर्णभावं विच्छायत्वं प्रपेदे ।

एवम् एकोनविंशसर्गसमाप्तिपर्यन्तं बहवः अर्थालङ्काराः मल्लिनाथेन विशेषतया व्याख्याताः। यया व्याख्यया हेमाद्रिनाथ कृता व्याख्या स्मरणीयापि न बभूव।

**कुमारसम्भवकाव्ये अलङ्कारयोजना चातुरी**

कुमारसंभवमहाकाव्यमपि सप्तदशसर्गात्मिकं प्रकाशितं उपलभ्यते। किन्तु अष्टावेव सर्गाः कालिदासकृताः तावतैव काव्यसमाप्तिः इत्यापि विदुषां मतम्। मल्लिनाथोपि अष्टौ सर्गान् व्याख्याय अष्टमसर्गान्ते व्याख्या समाप्तिसूचकं मङ्गलाचरणमपि कृतवान्।[5] कुमारसंभवेपि शब्दालङ्काराणां प्रयोगः मृग्यः एव। अर्थालङ्कारव्याख्याने मल्लिनाथः अलङ्कारस्य इतिवृत्तोपयोगित्वं रसोपयोगित्वं च विशेषेण व्याख्यातवान्।

प्रथमसर्गे देव्याः सौन्दर्यवर्णने पञ्चमसर्गे देव्याः तपश्चर्यायाश्च एवं विधाः बहवो विशेषाःदृष्टाः। प्रथमसर्गे निदर्शनालङ्कारः देव्याः सौन्दर्यसूचनायाः प्रयोजकः अपि तु तस्याः सौभाग्यसामुद्रिकलक्षणव्यञ्जकः इति स्पष्टमुक्तवान्। एवमलङ्कारसमन्वयोऽपि अलङ्कारान्तर शङ्का निराकरणपूर्वकं व्याख्यातः।

**अभ्युन्नतांगुष्ठनखप्रभाभिर्निक्षेपणाद्रागमिवोद्गिरन्तौ।**
**आजहृतुस्तच्चरणौ पृथिव्यां स्थलाविन्दश्रियमव्यवस्थाम्।।**

**अभ्युन्नतेति** - अभ्युन्नतयोरङ्गुष्ठनखयोः प्रभाभिः निमित्तेन निक्षेपणान्निर्भखन्यासाद्धेतोः रागमन्तर्गतं लौहित्यम् निरागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु इति शाश्वतः उद्भिरन्तौ- ममन्तौ - बहिर्निस्सारयन्तौ इव स्थिताविल्यर्थः। अत्रोद्भिरणगगौणार्थत्वान्नग्राम्यतादोषः प्रत्युत गुण एव। यथाह दण्डी –

**निष्ठ्यतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।**

**अति सुन्दरमन्यत्र ग्राम्यकक्ष्यां विगाहते॥ इति**[6]

**तस्याश्चरणौ तच्चरणौ पृथिव्या मव्यतस्थां व्यवस्थारहिताम् एकत्रावस्थानरहिताम्।** सञ्चारिणीमित्यर्थः स्थलारविन्दश्रियमाजहृतुः, स्थलविशेषणान्नियतलौहित्यलाभः। अत्र सामुद्रिकाः –

**यस्या रक्ततलौ पादावुन्नताग्रौ तलस्पृशौ।**

**निगूढगुल्फौ निहतो सा स्यान्नृपतिसम्मता।।** इति

अत्रोपमानधर्मस्यारविन्दश्रियश्चरणयोरुपमेययोरसम्भवादरविन्दश्रियमिव श्रियमिति प्रतिविम्बिकरणाक्षेपान्निदर्शनालङ्कारः। सा च सम्बन्धेऽसंबन्धलक्षणातिशयोक्त्यानुप्राणिता अव्यवस्थामित्यनेन स्थलारविन्दस्य स्थैर्यसंबन्धेऽप्यसंबन्धाभिधानात्। निदर्शनालङ्कार लक्षणं तु

**असम्भवद्धर्मयोगादुपमानोपमेययोः।**

**प्रतिबिम्बक्रियागम्या यत्र सा स्यन्निदर्शना।।** इति

अपि च पञ्चमसर्गे एव देव्याः तपश्चर्या वर्णने प्रथमावृष्टिः पार्वत्याः तपोभङ्गाय नालं बभूव इति कालिदासः परिकरालङ्कारप्रयोगेन वर्णितवान्। तमेव परिकरालङ्कारं देव्याः समाध्यवस्थाभिव्यञ्जकं सामुद्रिकनिरुपकं च मल्लिनाथः व्याख्यातवान्। मल्लिनाथव्याख्या एव अप्पय्यदीक्षितादिभिः यथायथं गृहीता श्लोकमिमं उत्तमकाव्योदाहरणम् इति निरूपिता। यथा-

**स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः।**

**वलीषु तस्याःस्खलिताः प्रपेदिरेचिरेण नाभि प्रथमोदविन्दवः।।**

स्थिता इति उदकस्य बिन्दव उदबिन्दवः "मन्थौदन" इत्यादिनोदकशब्दस्योदादेशः। प्रथम उदबिन्दवः प्रथमविशेषणाद् बिन्दूनां विरलत्वं बहुवचनान्नातिविरलत्वं च गम्यते। तथा च चिरत्वनाभ्यन्तरगमनयोर्निर्वाहः तस्याः पार्वत्याः पक्ष्मसु नेत्रलोमासु क्षुणं स्थितिं गताः। स्थिता इत्यनेन पक्ष्मणां सान्द्रत्वं क्षणमिति स्नैग्ध्यं च गम्यते। अनन्तरं ताडितो व्यथितोऽधर ओष्ठौ यैस्ते तथोक्ताः। एतेनाधरस्य मार्दवं गम्यते। ततः पयोधरयोः स्तनयोरुत्सेधः उपरिभागे निपातेन पतनेन चूर्णिता जर्जरिताः कुचकाठीन्यादिति भावः। तदनु वलीषूदररेखासुस्खलिताः। निम्नोन्नतत्वादिति भावः। इत्थम् चिरेण न तु शीघ्रं

प्रतिबन्धबाहुल्यादिति भावः। नाभिं प्रपेदिरे प्रतिष्ठा न तु निर्जग्मुः। एतेन नाभेर्गाम्भीर्यं गम्यते। अत्र प्रतिपदमर्थवत्वात् परिकरालङ्कारः।[8]

**शिशुपालवधमहाकाव्ये अलङ्कारयोजना चातुरी**

**"माघे मेघे गतं वयः"** काव्यद्वयस्य पठने सर्वमपि जीवितं अपर्याप्तमिति लोकोक्तिः प्रसिद्धैव। यतः माघकाव्ये व्याकरण-राजनीतिप्रभृतिशास्त्राणां बहवो विषयाः ग्रथिताः वर्तन्ते। माघकाव्यस्य समग्रां व्याख्यां सर्वङ्कषा नामिकाम् अन्वर्थां व्याख्यां मल्लिनाथः रचितवान्। विंशतिसर्गात्मके अस्मिन् काव्ये बहूनां शब्दालङ्काराणां, अर्थालङ्कारणां प्रयोगो दृष्टः। विशेषतः एकोनविंशे सर्गे गर्भबन्धादि कविता विशेषाः व्याख्यया विना दुर्ज्ञेयाः वर्तन्ते। अर्थालङ्कारव्याख्यायाः अपि एकाक्षरपादादि श्लोकानां प्रत्यक्षरम् अर्थान्वेषणेन व्याख्यानं न सुलभम्। मल्लिनाथः एकाक्षरश्लोकादीन् सप्रमाणं व्याख्याय बन्धकवित्वे सर्वतोभद्र, मुरजबन्धादीनामपि लक्षणं सम्यक् तया निरूपितवान्। मल्लिनाथ चातुरीनिरूपनार्थं श्लोकमेकं सव्याख्यं निरूप्यते ।

**जजौजोजाजिजिज्जाजी ततताेऽतिततातितुत् ।**
**भाभोऽ भीभाभिभूभाभूरारारिररिरीररः ।।**

जजाविति। ततोऽवलोकनानन्तरं जजन्तीति जजाः योधाः। जज युद्धे पचाद्यच् जजानामोजसा जाता जजौजोजा तामाजिं जयतीति।[9]

जजौजोजाजिजित्। जयतेः क्विप्। जजतीति जाजी योधी। ताच्छील्ये णिनिः। अतिततानत्युद्धतान् अतितुदति अतिव्यथयतीति अतितुत्। तुदतेः क्विप्। भस्याभेवामा यस्य स भाभो नक्षत्रकान्तिः। "नक्षत्रमृक्षं भं तारा" इत्यमरः। नास्तिभीर्येषां तेऽभियो निर्भीकाः तानिभान् गजान् अभिभवतीति अभीभाभिभूः क्विप्। तस्याः भास्तजसो भूः स्थानं अभीभाभिभूभाभूः। अराः सन्त्येषामित्यरीणि चक्राणि तैः रीणन्ति गच्छन्तीति अरिर्यो रथाः। रीगतिश्लेषणयोः इति धातोः क्विप्। तेषाम् ईर प्रेरण राति अरिरीररो रथिकः। आतोऽनुसर्गेकः। अरिः शत्रुर्बलभद्रः तं वेणुदारिणम् आर यो उद्गमयमास इत्यर्थः। ऋ गतौ इति द्यातोर्लिट् द्विर्भावेकृते णलि वृद्धिः अभ्यासस्योरदत्वे अत आदेः इति दीर्घ पुनः सवर्णदीर्घः। भिन्नैकाक्षरदारव्योऽनुप्रासभेदः। भाम इत्युपानुपमेययोरेकवाचकानुप्रवेशलक्षणस्सङ्करः।

अर्थालङ्कारप्रयोगे अपि रसभावानुकूलतया अलङ्कारसमन्वयः अलङ्कारान्तरसङ्करश्च मल्लिनाथेन बहुधा व्याख्यातः। एवं विद्यानि उदाहरणानि प्रथमसर्गे एव बहूनि दृश्यन्ते। इन्द्रसंदेशं श्रावयित्वा निष्क्रान्ते नारदे शिशुपालाय कुपितस्य कृष्णस्य मुखे अविष्कृतो भावः अस्मिन् श्लोके वर्णितः मल्लिनाथेन रसानुकूलः व्याख्यातः निदर्शनापह्नवयोः साङ्कर्यमपि सम्यक् निरुपितिम्। [10]

**ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाच नभ**
**स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति।**
**शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति**
**व्योम्नीव भृकुटिच्छलेन वदने केतुश्चकारास्पदम्।।**

भुकुटिच्छलेन भ्रूभङ्गव्याजेनास्पदं प्रतिष्ठां स्थितिं चकार " आस्पदं प्रतिष्ठायाम्" इति निपातनात् सुडागमः। अनेन वाक्यार्थभूतस्य वीररससहकारिणो रौद्रस्य स्थायी क्रोधः स्वानुभावेन भुकुट्या कारणभूतो अनुमेय इत्युक्तम्। तथा तदविनाभूतस्याङ्गिनो वीरस्य स्थायी प्रयत्नोपनेय उत्साहोऽप्युत्पन्न एवेत्यनुसन्धेयम् इन्दोः श्रियं बिभ्रति इत्यत्र मुनेरिन्दुश्रियोऽयोगात् तत्सदृशमिति सादृश्याक्षेपादसम्भवाद्वस्तुसम्बन्धरूपो निदर्शनालङ्कारः। वदने व्योम्स्रीवेत्युपमा। भुकुटिच्छलेन केतुरिति छलादिशब्देनासत्यत्वप्रतिपादनरूपोऽपह्नवः तत्र शत्रुः विनाशसूचके त्वपेक्षितेन्दुसान्निध्यव्योमावस्थानसंपादकत्वे निदर्श नोपमयोरपह्नवोपका-रसत्वादङ्गाङ्गिभावेन सङ्कर:।[11]

**किरातार्जुनीयकाव्ये अलङ्कारयोजना चातुरी**

किरातार्जुनीयकाव्यस्य घण्टापथ व्याख्यां मल्लिनाथः रचितवान्। किरातार्जुनीये अपि पञ्चदशसर्गे चित्रगर्भबन्धादि बहवो विशेषाः शब्दालङ्काराश्च दृश्यन्ते। माघकाव्यादपि बन्धकवित्वोदाहरणानि चातूरी निरुपकः श्लोकः उदाह्रियते।

**देवाकानिनि कावादे वाहिकास्वस्वकाहि वा।**
**काकारेभभरे काका निस्वभव्यव्यभस्वनि।।**

देवेति। पुनश्च। देवानाकनयत्युद्दीपयत्युत्साहयतीति देवाकानी तस्मिन्देवाकानिनि। कन दीप्तौ इति धातोर्ण्यन्ताण्णिनिः। कावाद ईषद्वादो वाक्कलहः। ईषदर्थे इति कुशब्दस्य कादेशः। तद्वति कावादे । "अर्थ आदिभ्योच्" 12 ।८ वाहिका पर्यायेण रणभारोद्वहनम् । " वहेःपर्याये घात्वर्थनिर्देशे ण्वुल्वक्तव्यः। वाहिकया क्रमप्राप्तरणक्रियया सुष्ठुठ शोभनं यथा तथाऽस्वकान्परानाजिहीतेऽभियुङ्क्ते। योजयतीति यावत्। वाहिकास्वस्वकाहास्तस्मिन्। योद्धधर्मो युद्ध उपचर्यते। ओहाङ् गतौ इति धातोर्विच्प्रत्ययः। सोमपाशब्दवत्प्रक्रिया। वाशब्दश्चार्थे कं मदोदकमाकिरन्तीति काकारा मदस्राविणः।[13]

किरतेराङ्गूर्वात्कर्मण्यण्। एवं विधा इभभरा गजघटा यत्र तस्मिन्काकारेभभरे। काका इव काका गह्य इति लक्षणया तेषामामन्त्रणम्। निस्वा निरुत्साहा भव्याः सोत्साहास्तानु भयान्व्ययन्ति संवृण्वन्तीति निस्वभव्यव्याः व्येञ् संवरणे। आतोऽनुपसर्गे कः [14] ।७ तैर्बभस्ति भासत इति निस्वभव्यव्यभस्वांस्तस्मिन्।

अन्येभ्योऽपि दृश्यन्ते इति क्वनिप्। सर्वतो भ्रम णात्सर्वतोभद्राख्यश्चिन्नबन्धः । यथाह दण्डी “तदिदं सर्वतोभद्रं भ्रमणं यदि सर्वतः” इति। उद्धारस्तु - चतुष्कोष्ठे चतुरङ्गबन्धक्रमेणाद्यपंक्तिचतुष्टये पादचतुष्टयं विलिख्यानन्तरपङ्क्ति चतुष्टयेऽप्यधः क्रमेण पादचतुष्टयलेखने प्रथमासु चतसृषु पङ्क्तिषु प्रथमः पादः सर्वतो वाच्यते, द्वितीयादिषु द्वितीय इत्यादि।

अर्थालङ्कारव्याख्यापि रसानुकूला बहुधा वर्तते इति विस्तरभयात् न निरुप्यते ।

**नैषधीयचरिते अलङ्कारयोजना चातूरी**

द्वाविंशतिसर्गात्मकं नैषधीयचितं महाकाव्येषु क्लिष्टतरम्। विद्वत्कविः श्रीहर्षः प्रयत्नपूर्वकं ग्रन्थग्रन्थीन् तत्र तत्र निक्षिप्य काव्यं दुर्बोध्यं कृतवान्।

स्वयं च - **ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मयः**
**प्राज्ञम्मन्यमाना हठेन पठिती माऽस्मिन् खलः खेलतु।।**

इति प्रतिज्ञातवान्। नैषधीयचरिते पञ्चनलीयनामकः त्रयोदशसर्गः न सुलभवेद्यः। तत्रस्थाः श्लोकाः सर्वे श्लेषपूर्णाः एकस्मिन् श्लोके इन्द्र, यम, वरुणाऽग्नीनां चतुर्णां लोकपालानां नलस्य च वर्णनं हर्षेण कृतं मल्लिनाथेन सुबोधतया व्याख्यातम्। यथा –

**देवः पतिर्विदुषि ! नैष धराजगत्या**
**निर्णीयते न किमु न क्रियते भवत्या।**
**नायं नलः खलु तवातिमहा नलाभो**
**यद्येनमुज्झसि वरः कतरः पुनस्ते।।**

देव इति विदुषि। हे विहधे। मदुक्ति वैचित्र्याभिज्ञे। एष धराजगत्याः भूलोकस्य पतिः न, किन्तु देवः जातावेकवचनम्, एते न भूपाः किन्तु देवा इत्यर्थः भवत्या न निर्णीयते किमु न क्रियते किमु? मर्त्यवरणात् वरम् अमर्त्यवरणमेवेति भावः। अथवा धरान् पर्वतान् अजति क्षिपतीति धराज इन्द्रः, स एव गतिः शरणं यस्या इति धराजगतिः प्रचीदिक् तस्याः प्रतिः एष देव इन्द्रः न निर्णीयते इति न, अपि तु निर्णीयते एव, अत एव उ इति सम्बोधनम्, उ भोः। भवत्या किं कथं न ब्रियते? अयमेव ते वरणीय इति भावः।

वरुणपक्षे- धरायां पृथिव्यां, जायन्ते इति धराजानि स्थावरजङ्गमानि भूतानि, तेषां गतिर्जीवनोपायो जलं तस्याः, पतिः जलाधिपतिरित्यर्थः, देवः वरुणः, न निर्णीयते इति न, अन्यत् पूर्ववत्। अयं तव सम्बन्धो त्वत्प्रार्थित इत्यर्थः, नलो न खलु, किन्तु अतिमहा मौष्यापेक्षया अतितेजाः, नलाभः नलकल्पः, नैते नलाः

किन्तु नलप्रतिरूपका इत्यर्थः, यद्येनम् उज्झसि एषाम् अन्यतमं न वृणोषि चेदित्यर्थः, पुनः पश्चात्, ते तव, व्रियते इति वरो वरणीयः, वृङोऽप्, कतरः? न कश्चिदस्ति, सत्यनलस्य दुर्लभत्वादिति भावः।

नलपक्षे भवत्या एष धराजगत्याः भूलोकस्य, पतिः रक्षकः, देवो राजा, 'देव सुरे घने राज्ञि' इति विश्वः, नैषधराजगत्या नलमहाराजरूपेण, नैषधराजस्य नलस्य, गत्या ज्ञानेन वा, अथवा-नैषधराज एव गतिर्जीवनोपायो यस्यास्तस्या, भवत्या इत्यस्य विशेषणम्, पतिभर्त्ता, न निर्णीयते किमु ? न क्रियते किमु ? अयं ना पुरुषः, नलः खलु अतोऽयमेव वरणीय इत्यर्थः, एनं नलम्, उज्झसि यदि तव अतिमहान् अलाभोऽनर्थः, वर इत्यादि पूर्ववत्।

अग्निपक्षे तु - धरो वाहनम्, अजः छात्राः यस्येति धराजो वाह्निः वन्हेरजवाहनत्व, स एव गतिः शरणं यस्याः तस्याः आग्नेय्या दिशः, पतिरेष देवो अग्निः, न निणीयते इति न, अन्यत् पूर्ववत्।

यमपक्षे तु धरान् पर्वतान्, अजः छागः यस्येति धराजो वह्निः वाहनेरजवाहनत्वश्रवनात्, स एव गतिः शरणं यस्याःतस्याः आग्नेय्या दिशः, पतिरेष देवो अग्निः, न निर्णीयते इति न, अन्यत् पूर्ववत् । यमपक्षे तु धरान् पर्वतान् अजति श्रृङ्गाभ्यां खुरैर्वा क्षिपति इति धराजः महिषः, तेन या गतिर्गमनं तयोपलक्षितः, पतिः धर्मरूपत्वात् पालकः देवः यमः अन्यत् पूर्ववत्।

स्थालीपुलाकन्यायेन कानिचन उदाहरणान्येव यथावकाशं निरूपितानि। न केवलमलङ्कारान् किन्तु गहनान् शास्त्रविषयान् अपि तत्तत् काव्यगतान् सप्रमाणं मल्लिनाथः व्याख्यातवान्। अपि च व्याख्यायां काव्ये यत् असामञ्जस्यरूपेण लोके दृष्टं तद्दोषं खण्डयितुं अपि मल्लिनाथः विशिष्टं यत्नं कृतवान्। यथा -

मेघसन्देशे आषाढस्य प्रथमदिवसे.... इति पाठं समर्थयितुं प्रशमदिवसे इति पाठं च निराकर्तुं काव्यस्थं आन्तरङ्गिकं प्रमाणं "**शापान्तो मे भुजगशयनादुत्थिते शाङ्गपाणौ**"...इति श्लोकमुदाहृत्य कतिपय दिनाधिक्यं निराकर्तुं ईषद्वैषम्यमविवक्षितमिति लौकिकं व्यवहारं प्रमाणीकृतवान्। जिज्ञासुभिः एवं विधाः विषयाः प्रतिकाव्यं द्रष्टव्याः इति अलं विस्तरेण।

## पादटीका

1. Mallinatha A study - By N. C. V. Nararirhacharya - Pg no. 23
2. 2 पा. सूत्र ३.२.८७
3. * रघुवंशम् - १/१८ श्लोक मल्लिनाथ व्याख्या pg no. - ५६
4. * पा.सूत्र ८.१.४

5. रघुवंशम् - ६/६७ श्लोक मल्लिनाथ व्याख्या pg no. २६८
6. * कुमारसम्भवम् - 1/33 श्लोकः मल्लिनाथ व्याख्या च pgNo. - 15
7. 'एव अप्पय्यदीक्षितादिभिः यथायथमं गृहीता श्लोकमिम उत्तमकाव्योदाहृणम् इति निरूपिता। - यथा –
8. कुमारसम्भवम् - 5/24 श्लोकः मल्लिनाथव्याख्या च - pg no. 81, 82
9. "कुमारसम्भवम् - 5/24 श्लोकः मल्लिनाथ व्याख्या च - Pg-81, 82
10. २० अस्मिन् श्लोके वर्णितः मल्लिनाथेन रसानुकुलः व्याख्यातः।
11. " शिशुपावधम् - 1/75 श्लोकः मल्लिनाथव्याख्या च pg.no. 27,28
12. 12 पा. सूत्र ५.२.१७०
13. " किरातार्जुनीयम् - 15/25 श्लोकः मल्लिनाथ व्याख्या च pg No. 225.
14. 14 पा. सूत्र ३.२.३

## सन्दर्भग्रन्थाः

1. रघुवंशम् - संजीवनी व्याख्या कृष्णदास अकादमि, वाराणसी-1983
2. कुमारसम्भवम् - संजीवनी व्याख्या कृष्णदास अकादमि, वाराणसी- 1985
3. शिषुपालवधम् - सर्वडकषा - वेड्ङ्कटेश्वर स्ष्टीप्रेस - 1982
4. किरातार्जनीयम् (घण्टापथ) चौखम्भा संस्कृतसिरिज, वाराणसी- 1984
5. नैषीयचरितम् - जीवातु व्याख्या चौखम्भा संस्कृतसिरिज, वाराणसी, 1980
6. Mallinatha a study by N.C.V. narangsrimahacharya R.S. Vidhyapeeth tirupat - 2002
7. अष्टाध्यायी भाष्य (प्रथमावृत्ति) ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, सोनीपत हरयाणा- २०१६
8. पाणिनीय अष्टाध्यायी सं ब्रह्मदत जिज्ञासु, रामलाल कपूर ट्रस्ट, सोनीपत, हरयाणा २०१०

# नाट्यतत्त्वदृष्ट्या अभिज्ञानशाकुन्तलस्य काव्यिकं सौन्दर्यम्

**डॉ. श्वेतपद्मा शतपथी**
सहाचार्या साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

काव्यं मुख्यतः द्विधम्। यथा-श्रव्यकाव्यं, दृश्यकाव्यं च। श्रव्यकाव्यं तदेव भवति यत् श्रोतुं शक्यते। दृश्यकाव्यं तु विशिषरुपेण द्रष्टुं शक्यते। दृश्यकाव्येषु नाटकानि एव प्रसिद्धानि। तेषु नाटकेषु महाकविकालिदासविरचितम् अभिज्ञानशाकुन्तलम् प्रसिद्धमस्ति अतः उक्तम्- कालिदासस्य सर्वस्वम् अभिज्ञानशाकुन्तलम्।

नाट्यतत्त्वदृष्ट्या नाटकस्य नामकरणं सम्पृक्त नाटकस्य कथावस्तुनः अनुसारेण कर्तव्यम्। अतः नाट्यतत्वविदः कथयन्ति यत्- नामकार्य नाटकस्य गर्भितार्थ प्रकाशनम्। अनेन नियमानुसारेण अभिज्ञानशाकुन्तलस्य नामकरणं एतस्य कथावस्तुमाधारीकृत्य एव कृतम् । नाटकेस्मिन् एकेन अभिज्ञानेन वा परिचयात्मकवस्तूना यथा मुद्रिकया राजा दुष्यन्तः प्रत्याक्षातां शकुन्तलां स्वकीयपत्नीरुपेण अङ्गीकरोति । अतः नाटकस्य नामकरणम् अभिज्ञानशाकुन्तलमिति कृतम् ।

भरतमुनिप्रभृतीनां बहूनां नाट्यतत्वविदां मतानुसारेण नाटके सर्वप्रथमम् उपयुक्तं रंगमञ्च निर्माणान्तरं नाटकस्य मंचस्थिकरणम् आदौ नान्दी वा मंगलाचरणम्, तदनन्तरं रङ्गमञ्चपूजा, ततः परं प्रस्तावनामाध्यमेन विषयप्रवेशः। सम्पूर्ण नाटके मुख-प्रतिमुख-गर्भ-विमर्श-उपसंहृति इति पञ्चसन्धीनां सन्निवेशनं तथा नव नाट्ये रसाः स्मृताः इति दृष्ट्या श्रृंगारादिषु रसेषु एकस्य श्रृंगारस्य वा वीरस्य वा करुणस्य मुख्यत्वम् अन्येषां रसानां अङ्गत्वं भवेत्। एते सर्वे नाट्यतत्वविषयकाः नियमाः अभिज्ञानशाकुन्तले परिलक्ष्यन्ते। अतः नाटकमिदं समग्रसंस्कृतवाङ्मयस्य एकं सर्वोत्कृष्टं नाटकमिति न केवलं प्राच्यैः, अपितु पाश्चात्यैः अपि नाट्यतत्वसमीक्षकैः प्रतिपादितम्। अतः जर्मान् दार्शनिकेन गेटे महोदयेन उक्तम्-

**वासन्तं कुसुमं फलञ्च युगपत् ग्रीष्मस्य सर्वञ्च यत्।**
**यच्चान्यत् मनसो रसायनमतः सन्तर्पणं मोहनम्,**
**एकीभूतमभूतपूर्वमथवा स्वर्लोक भूलोकयोः**
**ऐश्वर्यं यदि वाञ्छसि प्रियसखे ! शाकुन्तलं सेव्यताम् ।।**

नाट्यतत्वदृष्ट्या अभिज्ञानशाकुन्तलस्य आदौ नान्दी वा मंगलाचरणं भवति-या सृष्टिस्रष्टुराद्या..... । तथैव नाट्यतत्वदृष्ष्या अन्तिमे मंगलाधायकं भरतवाक्यमपि आवश्यकम् । अभिज्ञानशाकुन्तलस्य भरतवाक्यं भवति-

**प्रवर्तिनां प्रकृतिहिताय पार्थिवः**
**सरस्वती श्रुतिमहती महियताम्।**
**ममापि च क्षपयतु नीललोहितः**
**पुनर्भवं परिगतशक्तिरात्मभूः ।।** (अभि.-7/35)

नाटकस्य एका मुख्या आवश्यकता भवति पञ्चसन्धि सन्निवेशनम् । पञ्चसन्धयः भवन्ति यथा-मुख-प्रतिमुख-गर्भः-विमर्शः -उपसंहृतिः । एकस्मात् कथावस्तुनः यदा कथान्तरं प्रति मुख्यकथावस्तु गच्छति, तदा एकः सन्धिः भवति। अनया दृष्ट्या अभिज्ञानशाकुन्तलस्य सप्ताष्वङ्केषु पञ्चसन्धीनां सन्निवेषनम् विधिवत्तया कृतम्। यथा-अभिज्ञानशाकुन्तलस्य प्रथमाङ्के मुखसन्धिः संजातः । मुखसन्धेः लक्षणं भवति-

**यत्र वीजसमुपत्तिः नानार्थरससम्भवाः।**
**प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम्।।**

प्रथमाङ्के दुष्यन्तशकुन्तलयोः मिलनरुपककथावस्तुनः वीजस्य समुत्पत्तिः संजाता इति हेतोः अत्र मुखसन्धिः।

द्वितीयाङ्कस्य प्रारम्भात् तृतीयाङ्कस्य पृष्ठाजनेन समदुःखसुखेन वाला इति पयं यावत् प्रतिमुखसन्धिः संजातः। प्रतिमुखसन्धेः लक्षणं भवति-

**फलप्रदानोपायस्य मुखसन्धिनिवेसिनः।**
**लक्ष्यलक्ष्यइवोद्धेदः यत्र प्रतिमुखं हि तत्।।**

तृतीयतः गर्भसन्धिः। अस्य सन्धेः लक्षणं भवति-

**फलप्रधानोपायस्य प्रागुद्भिन्नस्य किंचन।**
**गर्भेयत्र समुद्भेदो हासान्वेषणवान् मुहुः।।**

अर्थात् यत्र फलप्रधानोपायस्य ह्रासः अथवा कदाचित् विकासः भवति , तत्र गर्भसन्धिः। अनया दृष्ट्या पृष्टाजनेन समदुःखसुखेन वाला इति पद्यात् प्रारभ्य तृतीयाङ्कस्य अन्तिमं यावत् गर्भसन्धिर्भवति। अभिज्ञानशाकुन्तलस्य चतुर्थाड्कात् अरभ्य षष्ठांकं यावत् वर्णिते कथावस्तुनि विमर्शसन्धिः संजातः। कारणम् अयमंशः दुर्वाससः अभिशापेन प्रतिहतः। अस्य सन्धेः लक्षणं भवति-

**यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोधिकः।**
**शापायैः शान्तरायश्च सविमर्श इति स्मृतः ।।**

एवंप्रकारेण नाटकस्य सप्तमाङ्के यत्र कथावस्तुनः उपसंहृतिः वा उपसंहारः भवति, तत्र उपसंहृतिः वा निर्वहणः सन्धिः भवति । तस्य लक्षणं यथा-

**वीजवन्तो मुखाद्यर्थाः विप्रकिर्णायिथायथम्।**
**एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ।।**

एवंप्रकारेण नाट्यतत्वदृष्ट्या अभिज्ञानशाकुन्तलम् नाटके पञ्चअर्थोपक्षेपकाः वा पञ्च अर्थप्रकृतयः अपि संघटिताः भवन्ति। पञ्चविधाः अर्थप्रकृतयः यथा-

**वीजविन्दुपताका च प्रकरी कार्यमेव च।**
**अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि।।**

अर्थात् 1-वीजम्, 2. विन्दुः, 3. पताका, 4. प्रकरी, 5. कार्यम् इत्येताः पञ्च अर्थप्रकृतयः अभिज्ञानशाकुन्तनले विभिन्नेषु स्थानेषु संयोजिता । एतानि नाट्यतत्वानि विहाय नाटकेस्मिन् प्रथमांके प्रस्तावना, तृतीयांके विष्कम्भकः, चतुर्थाके अपि विष्कम्भकः, षष्ठांके प्रवेशकः इति एतानि नाट्यतत्वानि अभिज्ञानशाकुन्तले विद्यते।

आलंकारिकाणां मतानुसारेण काव्ये नवरसाः भवन्ति किन्तु नाट्ये अष्टौ रसाः भवन्ति। शान्तरसः नाटके न सम्भवति इति ते विचारयन्ति । यत् भवतु अभिज्ञानशाकुन्तलनाटके मुख्यरसः श्रृंगारः अस्ति। एतत् विहाय हास्य-करुण-वीर-भयानकादयः रसाः अपि सन्निवेशिताः। रसः एव काव्यस्यात्मा। अयं सहृदयेभ्यः आनन्दं प्रददाति। अतः बहूनां रसानां सन्निवेशद्वारा इदं नाटकं सरसं, समृद्धं, तथा विश्वप्रसिद्धं जातम्।

## सन्दर्भग्रन्थाः

1. अभिज्ञानशाकुन्तलम्, प्रो. हरेकृष्ण शतपथी, कितावमहल, कटक-753003,(2010)
2. संस्कृकसाहित्य का इतिहास, डा. उमाशमकर शर्मा, चौखम्बा भारती अकादमी, वाराणसी, 2016
3. संस्कृतसाहित्य का इतिहास-आचार्य बलदेव उपाध्याय, शारदा निकेतन, 5 बी, कस्तूरवा नगर, सिगरा वाराणसी-221010
4. महाकवि कालिदासकी नाट्यरचनाओ का शास्त्रीय अध्ययन-डा. जयकृष्णप्रसाद खंडालवाल रिसर्च बुक्स बी-5/263 यमुना विहार, दिल्ली-110053, 2009
5. संस्कृतसाहित्य का इतिहास-डा. जयकृष्णप्रसाद खंडेलवाल, परिमल पब्लिकेशन्स, दिल्ली, 2009

# मुग्धबोधव्याकरणस्य कारकपादे विभक्तिसूत्रविमर्शः

**Atanu Adhya**
Assistant Professor
Dept. of Sanskrit, Raiganj University
&
**Nilima Sarkar**
Assistant Professor
Dept. of Sanskrit, Samsi College.

संस्कृतव्याकरणशास्त्रस्य मूर्धन्यमुनिरस्ति महामुनिपाणिनिः। तेन प्रणीतं व्याकरणमस्ति अष्टाध्यायी इति। अष्टाध्याय्यां संस्कृतव्याकरणशास्त्रस्य सर्वे विषयाः सुत्रक्रमेण ग्रथिताः। तेषु अन्यतममस्ति कारकमिति। अपाणिनीयपरम्परायां बहवः वैयाकरणाः व्याकरणविषयान् सरलीकृताः। तेषु अन्यतमः बोपदेवः। अनुमानतः त्रयोदशशतके मुग्धबोधव्याकरणं प्रणीतम्। अतिस्वल्पाक्षरप्रयोगेण प्रायतः 1185 सूत्रैः दशाध्याये बोपदेवः मुग्धबोधव्याकरणं विरचितवान्। तत्र स्याद्यन्त्यायः इति चतुर्थाध्यायस्य द्वितीयपादोऽस्ति कम् (कारकमिति) –पादः। कम्-पादे स्थितविभक्तिविषयकसूत्राणां पाणिनीयविभक्तिविषयकसूत्रैः सह विमर्शात्मकमध्ययनं प्रस्तुयतेऽत्र। अनेन विभक्तिविषये अपाणिनीयपरम्परायाभिः पाणिनीयपरम्परायां सादृश्यं वैसादृश्यं च वयं द्रक्ष्यामः।

संकेतसूचीः – ढधघभजडाः, प्री, सम्बुद्धिः, लेरर्थे ,

संख्याकारकादिबोधयित्री विभक्तिः। वि-भज्-क्तिन् – विभक्तिः। विभक्तिश्चैव ध्वात्वंशस्तद्धितं कृदिति क्रमात्। चतुर्धा प्रत्ययः प्रोक्तः कादिभिः पञ्चधाऽथवा। सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङेति विभेदतः। यद्यपि सुप्-विभक्तयः सप्त प्रथमादिक्रमेण सन्ति। कारकप्रकरणे विभक्तयः प्रयोगरूपेण तिस्रः। कारकयोगे विभक्तिः शब्दयोगे विभक्तिः विशेषार्थयोगे विभक्तिश्चेति विभक्तयः सन्ति। विभक्तिशब्दः कारकशक्तिवचनः। विभज्यते अनया प्रातिपदिकार्थः इति । अर्थस्य विभञ्जनाद् विभक्तयः इति[1]। मुग्धबोधव्याकरणे प्री-द्वी-त्री-ची-पी-षी-प्ती एवं क्रमेण प्रथमादिविभक्तयः सन्ति।

प्रथमा (प्री ) – 'ल्यर्थसम्बुद्ध्युक्तार्थे प्री'[2]- इति मुग्धबोधव्याकरणस्य प्रथमाविभक्तिविषयकं सूत्रम्। सूत्रार्थः यथा - लेरर्थे सम्बोधने त्यैरुक्तार्थे के सति च प्री स्यात्। अत्र लेरर्थे 'प्रातिपदिक-लिङ्ग-परिमाण-वचनमात्रे प्रथमा' इति पाणिनीयसूत्रमस्ति। उदाहरणं यथा – कृष्णः, श्री, ज्ञानम् इति । तथा तटः, तटी, तटमिति लिङ्गमात्रस्योदाहरणमस्ति। एवमपि अन्यत्र वर्तते। सम्बुद्ध्यर्थे 'सम्बोधने च'[3] इति पाणिनीयसूत्रमस्ति। स्थितस्य सिद्धस्य पदार्थस्य आभिमुख्यविधानं विज्ञापनीय-विषयबोधनाय अभिमुखीकरणं सम्बोधनम्। हे विष्णो इति सम्बुद्ध्यर्थस्योदाहरणम्। उक्तार्थे 'अभिहिते कर्तरि कर्मणि च' एवं प्रकारेण नियमसूत्रं वर्तते। सर्व्वोऽर्च्च्यो जीवनः पाता दानीयः प्रभवो लयः इत्यस्योक्तार्थस्योदाहरणमस्ति। अधातुविभक्त्यर्थवत् प्रातिपदिकम्[4] इति सुपद्मव्याकरणस्य सूत्रम्।

द्वितीया (द्वी) – 'कर्मक्रियाविशेषणाभिनिविशाधिशीङ्स्थासन्वध्युपावस-ङं-ढं द्वी'[5]। अनेन मुग्धबोधीयसूत्रेण कर्मकारकयोगे द्वितीया (द्वी) विभक्तिः भवति। अस्मिन् विषये पाणिनीयव्याकरणे सुपद्मव्याकरणे च 'कर्मणि द्वितीया'[6] इति कारकविभक्तिसूत्रमस्ति। उदाहरणं यथा - रामं नमति सानन्दं धर्म्मानभिनिविश्य सन्। श्रीशोऽधिशेतेऽहिमधिष्ठितोऽब्धिमध्यास्य घोषं मथुरामनूष्य। यो द्वारकामध्युषितो विकुण्ठमुपावसच्चावसतात् स ह्वन्नः इत्योदाहरणमस्ति। 'धिक्समयानिकषाहान्तरान्तरेणैनाति-येन-तेनाभ्युभयपरिसर्वतोविनर्त्तेऽभिपरिप्रत्यनूपद्व्युपर्य्यधोऽधिभिः'[7]। अनेन मुग्धबोधीयसूत्रेण धिक्-योगे, समयायोगे, निकषायोगे, हायोगे, अन्तरायोगे, अन्तरेणयोगे, एनयोगे, अतियोगे, येनयोगे, तेनयोगे, अभितः-योगे, उभयतः-योगे, परितः-योगे, सर्व्वतः-योगे, विनायोगे, ऋते-योगे, अभियोगे, परियोगे, प्रतियोगे, अनुयोगे, उपयोगे, उपर्य्युपरि-योगे, अधोधः-योगे, अध्यधि-योगे च द्वितीयाविभक्तिः भवति। अस्मिन् विषये मुग्धबोधे कारिकारूपेणोदाहरणं प्रदीयते। वीप्सात्थम्भावचिह्नेऽभिस्तेषु भागे परिप्रती। अनुस्तेषु सहार्थे च हीनेऽनूपौ मताविह।। धिग् लोकमीश्वराभक्तं समया माधवं रमा। निकषा गिरिशं गौरी हा लोकं केशवद्विषम्।। कृष्णोऽन्तरा ब्रह्मशम्भु नान्तरेणाच्युतं सुखम्। दक्षिणेन हरिं रुद्रो गोविन्दमति नेश्वरः।। येनेशं हरिरीशस्तं तेनेशमभितोऽर्च्चकाः। रामकृष्णावुभयतो गोपेशं परितः परे।। प्रथमाः सर्व्वतः सर्व्वं शर्म्म नेशार्च्चं विना। मुक्तिर्नर्त्तेऽच्युतोपास्तिं भूतं भूतमभि प्रभुः। भक्तोविभुमभि प्राज्ञो गोविन्दमभि तिष्ठति। हरिं पर्य्यभवल्लक्ष्मीर्हरं प्रति हलाहलम्।। विष्णुमन्वर्च्यते भर्गः शक्रादय उपाच्युतम्। लोकानुपर्य्युपर्य्यास्तेऽधोऽधोऽध्यधि च माधवः।। अस्मिन् विषये पाणिनीयपरम्परायां कारिकारूपेण बहुनि सूत्राणि वार्तिकानि च सन्ति। यथा,- 'उभ-सर्व-तसोः कार्या धिगुपर्यागिषु त्रिषु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते'।।इति वार्तिकमस्ति। ततः 'अभितः परितः समया निकषा हा प्रतियोगेऽपि' इत्यपि वार्तिकम्। 'अन्तरान्तरेणयुक्ते' इति पाणिनिसूत्रमस्ति।[8] सुपद्मव्याकरणेऽपि बहुनि सूत्राणि सन्ति[9]।

तृतीया (त्री)- 'साधनहेतुविशेषणभेदकं धं कर्त्ता घस्त्री'[10]। अनेन मुग्धबोधसूत्रेण करणकारके (धम्) कर्तृकारके (घम्) तृतीयाविभक्तिः (त्री) भवति। 'कर्तृकरणयोस्तृतीया'[11] इति पाणिनीयसूत्रमपि च सुपद्मव्याकरणस्य सूत्रम्। उदाहरणमस्ति - नेत्रैः पुण्येन भूषाभिर्नाम्ना दृष्टः शिवो जनैः। 'सहवारणसमोनार्थार्थाविनापृथङ्नानाद्यैः'[12]। अत्र सहादियोगे तृतीयाविभक्तिः (त्री) जायते। सहेशार्च्योऽच्युतो भेदेनालं तेल समोऽस्ति कः। विकारै रहितः शम्भुः सतामर्थः शिव्वार्चया।। श्रीर्नेशेन विना शम्भुः पृथक् विश्वेन तत् पुनः। न नाना शम्भुना रामात् वर्षेणाधोक्षजोऽवरः।।पाणिनीयव्याकरणे अस्मिन् विषये बहुनि सूत्राणि सन्ति। 'सहयुक्तेऽप्रधाने'। 'पृथग्विना-नानाभिस्तृतीयान्यतरस्याम्'[13]। अस्मिन् विषये सुपद्मव्याकरणे सूत्रं यथा - सहार्थेनाप्रधाने, शकाराथ-हिथ-नमः स्वस्कि- स्वाहा-स्वधा वषट्योगे [14]। मुग्धबोधव्याकरणस्यापरसूत्रं 'कालभाड्डे वा'[15]। कालवाचिनो नक्षत्रात् डे त्री वा स्यात्। रोहिण्यामभवत् कृष्णो रोहिण्यासीच्च चण्डिका। अस्मिन् विषये पाणिनीयसूत्रं यथा- 'नक्षत्रे च लुपि'[16]। 'मानाद्वीप्सायां

ढे'[17] इति मुग्धबोधव्याकरणस्य सूत्रम्। शतं पतं पयोऽपीप्यत् वत्सान् विष्णुः शतेन गाः। द्विद्रोणेन क्रीणाति, पञ्चकेन क्रीणाति द्विद्रोणं पञ्चकम्। 'संज्ञोऽस्मृतौ'[18] इत्यस्य मुग्धबोधीयसूत्रस्य अर्थः - स्मरणादन्यस्मिन्नर्थे वर्त्तमानस्य संपूर्वस्य जानाते ढे त्री स्यात्। संजानीष्व स्वमीशा च संजानीहि ततः शिवम्। 'संज्ञोऽन्यतरस्यां कर्मणि'[19] इति पाणिनीयसूत्रमस्ति। 'सन्दानो भेऽधर्म्मे नित्यम्'[20]। सम्पूर्व्वदानसम्बन्धिनि अधर्म्मे धे त्री स्यान्नित्यम्। संयच्छते स्म गोप्येष्टं श्रीशः संयच्छति श्रियै। 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' इति पाणिनीयपरम्परायाम्।

चतुर्थी (ची) - बोपदेवेन कृतं सूत्रं यत् 'यस्मै दित्सासूयाक्रोधेर्ष्यारुचि-द्रोहस्थाह्नु-श्लाघ-स्पृहि-शप्राधीक्षा-प्रतिश्रु- प्रत्यनुगृधार्यार्था भं ची तादर्थ्ये च'[20] इति। यस्मै दातुमिच्छा, असूयादयः स्थादेरर्थश्च यस्मै, तद् भसंज्ञं स्यात्, तत्र ची, तादर्थ्ये च। ददातु सद्भ्यः स सुखं हरिः स्मराद्, गोपीगणोऽसूयति कुप्यतीर्ष्यति। स्म रोचते द्रुह्यति तिष्ठते ह्नुतेऽश्लाघिष्ट यस्मै स्पृहयत्यशप्त च।। गर्गो राध्यति रामाय कृष्णाय स्मेक्षते व्रजे। शुभाशुभं पर्य्यालोचयदित्यर्थः। विभीषणायाशुश्राव राज्यं प्रत्यश्रृणोन्यशः। प्रतिज्ञातवानित्यर्थः। रामः, प्रत्यगृणात्तस्मै लक्ष्मणोऽन्वगृणात् कपिः। रामं वदन्तं प्रोत्साहयामास इत्यर्थः। सर्व्वो धारयते सर्व्वं सद्भ्यस्तं भज मुक्तये। अस्मिन् विषये पाणिनीयव्याकरणे बहुनि सूत्राणि सन्ति। यथा – चतुर्थी सम्प्रदाने , तादर्थ्ये चतुर्थी वाच्या (वा)[21]। सुपद्मव्याकरणे सम्प्रदाने चतुर्थी, तादर्थ्ये[22] इति स्यात्। 'शक्तार्थवषड्हितसुखस्वाहास्वधास्वस्तिनमोभिः'[23]-मुग्धबोधीयसूत्रस्यार्थः एभिर्योगे ची स्यात्। दैत्येभ्योऽलं हरिः, पूष्णे वषट्, सद्भ्यो हितं सुखम्। स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते।। अस्मिन् विषये पाणिनीयव्याकरणे सूत्राणि सन्ति। यथा – 'नमः स्वस्ति-स्वाहा-स्वधालं-वषड्योगाच्च'[24], 'हितयोगे च(वा)'। शकाराथ-हिथ-नमः स्वस्कि- स्वाहा-स्वधा वषट्योगे[25] इति सुपद्मव्याकरणस्य सूत्रम्। मुग्धबोधीयापरसूत्रं 'ढेनाशिषि वा'[26]। सद्भ्यः सतां वा शं भूयात्। अस्मिन् विषये पाणिनीयसूत्रमस्ति – 'चतुर्थी चाशिष्यायुष्य-मद्र-भद्र-कुशल-सुखार्थ हितैः'[27]। 'परिक्रियो धे वा'[28] मुग्धबोधीयापरसूत्रस्योदाहरणमस्ति भक्त्यै मुक्तिः परिक्रिता सद्भिर्विष्णो रुषारिभिः। अस्मिन् विषये पाणिनीयसूत्रं यथा - 'परिक्रयणे सम्प्रदानमन्यतरस्याम्'[29]। 'गत्यर्थमन्यढे चेष्टावज्ञेऽनध्वाकाकशुकश्वगालनावन्ने वा'[30] इति बोपदेवसूत्रस्यार्थः - गत्यर्थमन्यत्योर्ढे क्रमान्यर्गकाकादिवर्जे चेष्टावज्ञयोश्ची स्याद्वा। व्रजाय व्रजति श्रीशो व्रजं त्रजति केशवः। न त्वा तृणाय मन्येऽहं न त्वा मन्ये तृणं खल। चेष्टावजित्रे किं – मनसा द्वारकामेति त्वां मन्येऽहं जनार्द्दनम्। अध्वादौ तु – गच्छत्यनन्तः पन्थानं न त्वा काकंस मन्यते। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि'। 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु'[31]। मन्यकर्मण्यवज्ञार्थानावादेर्वा[32] इति सुपद्मव्याकरणसूत्रम्।

पञ्चमी (पी) - 'यतोऽपायभीजुगुप्सापराजयप्रमादादानभुत्राणविरामान्तर्धिवारणं जं पी'[33] मुग्धबोघीय सूत्रस्यार्थः - यतः एते तत् जसंज्ञं स्यात्, तत्र पी। विभीषणः पदाद्भ्रष्टो भ्रातुर्भीतो जुगुप्सितः। पापात्

पराजितो दुःखादप्रमत्तो विधेः सतः। आत्तविद्यो मुनेर्जातो भ्रातुस्त्रातो निजैर्भवात्। विरतोऽन्तर्हितो दुष्टच्छोकाद् रामेण वारितः। अस्मिन् विषये पाणिनीयसूत्रं तथा सुपद्मसूत्रं यथा- 'अपादाने पञ्चमी'[34]। 'अन्यारभ्यार्थाराद्वहिर्विनर्त्ते-प्रतिपर्य्यपाङ्-दिक्-शब्दैर्हेतुयवर्थे च'[35]इति सूत्रस्यार्थः- एभिर्योगे हेतौ यवन्तस्यार्थे च पी स्यात्। आङ् वाप्तिसीम्नोस्त्यागेऽन्यौ प्रतिदाननिधौ प्रति। नेतरो विष्णुरीशानात् भवात् प्रभृति सोऽर्च्यते। सोऽस्मदारात् वहिस्त्वत् शं विना नार्थो वृषाद्दते।।भक्तेः प्रत्यमृतं शम्भोः प्रद्युम्नः केशवात् प्रति। पर्य्यनन्तात् त्रयस्तापा आमृत्योः सेव्यतां हरिः।।ब्रह्मास्त्यासकलात् पूर्व्वः कृष्णाद्रामोऽवरो गदः। आनन्दादीश्वरः शैलादासनादीक्षतेऽलकाम्।। शैलमारुह्य आसने उपविश्येत्यर्थः। अस्मिन् विषये पाणिनीयसूत्राणि यथा – 'अन्यारादितरर्ते दिक्-शब्दाञ्चुत्तरपदाजाहियुक्ते'। 'अप-परि-वहिः- इति समासविधानात् ज्ञापकात् वहिर्योगे पञ्चमी'। 'पञ्चम्यपाङ् परिभिः', 'प्रतिनिधि-प्रतिदाने च यस्मात्'। 'अकर्तर्षृणे पञ्चमी', 'विभाषा गुणेऽस्त्रियाम्'[36]। अपरं मुग्धबोधसूत्रं 'वारादर्थैः'[37] इति। दूरान्तिकार्थैः पी स्याद्वा। रामाद्रुद्रस्य यो दूरं पापाद् दुःखस्य सोऽन्तिकम्। अस्मिन् विषये पाणिनीयसूत्रं यथा- 'दूरान्तिकार्थेभ्यो द्वितीया च'[38]।

षष्ठी (षी) - 'समार्थैनार्य्यस्तस्ताद्धितसुखै निद्धरि सम्बन्धे ढे च षी'[39] इत्यस्यार्थः एभिर्योगे एषु च षी स्यात्। यः सर्व्वस्य समो यश्च दक्षिणेनोत्तरा स्थितः। उपर्य्यधः पूर्व्वतश्च पश्चाद् यस्याखिलं हितम्। सुखञ्च तस्य देवानां वर्य्यस्य पदयोर्भजे। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'षष्ठी शेषे'। ' एनपा द्वितीया', 'षष्ठ्यतसर्थप्रत्ययेन', 'व्यव-हृ-पणोः समर्थयोः'। 'विभाषोपसर्गे', 'प्रेष्यव्रुवोर्हविषो देवतासम्प्रदाने'। 'कर्तृकर्मणोः कृति'। 'उभयप्राप्तौ कर्मणि'। 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्', 'यतश्च निर्धारणम्'[40]। 'ज्ञोऽज्ञाने धे'[41]-इति मुग्धबोधीयसूत्रस्योदाहरणं यथा - शम्भोर्मुकुन्दे जानीते भक्त्या जानाति शङ्करम्। शम्भुना साधनेन मुकुन्दे प्रवर्त्तते इत्यर्थः। प्रवृत्त्यर्थश्च जानातिः। अस्मिन् विषये पाणिनीयसूत्रं यथा- 'ज्ञोऽविदर्थस्य करणे'[42]। 'तृस्यर्थानां वा'[43]। तृस्यर्थधातोः प्रयोगे धे षी स्याद्वा। श्रृङ्गारस्य परिस्तृप्तः पूर्णः शान्तेन शङ्करः। 'कर्मादीनामपि सम्बन्धमात्रविवक्षया षष्ठी एव' इति दीक्षितोऽक्तिः। मुग्धबोधव्याकरणस्य अपरं सूत्रं 'ढघे कृत्यव्यक्युकक्तवतुखलर्थोच्छत्रानवसुशीलार्थतृन्-भव्यर्णार्थाणिनि'[44] इति। व्यादिवर्ज्जे कृति प्रयुज्यमाने ढे घे च षी स्याद्वा। जगतां कारकः कृष्णः कृतिर्मुररिपोरियम्। व्यादौतु – सृष्ट्वा दधिं शारुकमेतदर्च्चकान् उन्नीतवन्तं यतिभिः सुदर्शनम्। ज्ञातं हरिं जिष्णुरघानि संस्तुवन् मुदं दधानोऽर्थितमीयिवान् न कः।। शं दाता हृत् कदागामी दायी मोक्षमृणं शिवः। अस्मिन् विषये पाणिनीयसूत्राणि यथा- कर्तृकर्मणोः कृति। उभयप्राप्तौ कर्मणि। कृत्यानां कर्तरि वा। न लोकाव्ययनिष्ठाखलर्थतृणाम्। अकेनोर्भविष्यदाधमर्ण्ययोः[45]। कामुकसङ्घार्थक्तेन[46]मुग्धबोधसूत्रस्यार्थः कामुकशब्देन वर्त्तमानडयोर्विहितेन क्तेन च योगे ढे घे च षी स्यात्। यो लक्ष्याः कामुको ज्ञातः सतां तस्येदमासितम्। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'क्तस्य च वर्त्तमाने'। 'अधिकरणवाचिनश्च'[47]। 'कमेरनिषेधः (वा)'।

'ल्यभावक्तास्त्र्यणकसढे घे वा'[48]इत्यस्य अर्थः ल्ये भावार्थ – क्ते स्त्रीविहितं अं णकञ्च हित्वा अन्यत्र सढे घे षी स्याद्वा। त्वया मम च कृष्णोऽर्च्यः स्नातं ह्यत्र स यस्य तु। सृष्टेः कृतिर्हृतिर्येन चिकीर्षा यस्य भेदिका। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'कर्तृकर्मणोः कृतिः'[49]। 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभुप्रसूत कुशलायुक्त निपुणसाधुसुजर्थैर्नादरे ष्ती च'[50]। स्वामी मुकुन्दः सर्व्वेषां साक्षी सर्व्वेष्वधोक्षजः। निश्यह्नस्त्रिरगुर्ग्योप्योऽपत्ये मातूरुदत्यजद्।। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च'[51]।

सप्तमी (ष्ती) - 'कालभावाधारं डं ष्ती'[52]। एते ड संज्ञाः स्युः, तत्र ष्ती। सामीप्याश्लेघविषयैर्व्याप्त्याधारश्चतुर्व्विधः। रेमे शरदि गोविन्दो गोपीभिरूदिते विधौ। कालिन्द्यां कानने केलौ कुशलः सकले स्थितः। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'सप्तम्यधिकरणे च', 'यस्य च भावेन भावलक्षणम्'[53] , 'अधिकेशार्थोपाधिभ्याम्'[54]। अधिकार्थेनोपेन स्वाम्यर्थेनाधिना च योगे ष्ती स्यात्। गुणा उप परार्द्धे स्युर्विष्णोरधि हरौ सुराः। अस्मिन् विषये पाणिनीयसूत्राणि यथा- 'उपोऽधिके च'[55] । 'ढेनार्थात्'[56]। ढेन योगे निमित्तात् ष्ती स्यात्। वस्त्रेषु रजकमवधीत् कृष्णः। निमित्तात् कर्मयोगे(वा) क्तेना ढे[57]। क्ताद्विहितेनेना योगे ढे ष्ती स्यात्। वेदेऽधीती। 'क्तस्येन्विषयस्य कर्म्मण्युपसंख्यानम् (वा)' 'निर्द्धारेऽधिकेन क्रियान्तःकालाध्वनोश्च पीच[58]'। श्रेष्ठं कृपालुष्वर्कादे रुद्रैकादशकेऽधिकम्। मूर्त्यष्टकाच्छिवं ध्यायन् भुञ्जीथा द्व्यह्नि वा त्यहात्। भूस्थो योजनलक्षेऽर्कं पश्येल्लक्षद्वयाद्विधुम्। 'सीमान्तर्मार्गात् प्री चान्ते'[59]। सोमनाथाच्चच्छतं क्रोथाः कृष्णः क्रोशेषु चायुते। गङ्गायमुनयोर्मध्ये कति क्रोशाश्च जाह्नवी।। 'त्रादयोऽर्थार्थैकक्तेः स्रेस्तु सर्व्वाः'[60]। अर्थाथैनैकक्तेर्लेस्त्यादयः स्यु, स्रेस्तु सर्व्वाः। भुक्त्यार्थे नार्थस्य मुक्तेः किं कार्य्यं नाच्चर्यतेऽच्युतः।।

उपयुक्तादालोचनातः ज्ञायते यत् पाणिनीयव्याकरणस्यानुकरणेनैव बोपदेवः मुग्धबोधव्याकरणं विरचितवान्। सांकेतिकवर्णप्रयोगे व्याकरणस्याभिनत्वं दृश्यते। प्रायशः विभक्तिविषये विषयानुकरणे पाणिनिव्याकरणस्य प्रभावो दृश्यते। स्पष्टीकरणार्थं स्थाने स्थाने अष्टाध्याय्याः सुपद्मव्याकरणस्य च सूत्राणि अपि प्रदर्शितानि। बहुषु स्थलेषु पाणिनिव्याकरणस्य सूत्राणां योऽर्थः तमेवार्थमाधारीकृत्य बोपदेवेन स्वस्य ग्रन्थे सूत्राणि प्रणीतानि। अतः सरलीकरणार्थं एव तस्य धृष्टता इति। कुत्रचित् साक्षात् बहुनि सूत्राणि एकसूत्रेण प्रदर्शितानि, कुत्रचित् वा अनुवादकत्वेन प्रदर्शितानि। प्री-इत्यादि स्वल्पाक्षरावलम्बनेन विषयचयने भिन्नता जायते। प्रथमपाठेऽपि कोमलमतिशिक्षार्थीनां काठिन्यता जायते। परन्तु व्याकरणसूत्रप्रणयने तस्याभिनवत्त्वविषये मुग्धता जायते।

## पादटीका

1. शब्दशास्त्रेर इतिहास- कालीजीवनदेवशर्मा पृ- 589
2. मुग्धबोधव्याकरणे - 281
3. अष्टाध्यायी – 2.3.46 , 47
4. सुपद्मव्याकरणम्-2.2.1
5. मुग्धबोधव्याकरणे – 282
6. अष्टाध्यायी – 2.3.2, सुपद्मव्याकरणम्-2.2.8
7. मुग्धबोधव्याकरणे – 288
8. अष्टाध्यायी – 2.3.4
9. सुपद्मव्याकरणम्-2.3.13-16
10. मुग्धबोधव्याकरणे - 289
11. अष्टाध्यायी – 2.3.18 सुपद्मव्याकरणम्-2.2.17
12. मुग्धबोधव्याकरणे – 290
13. अष्टाध्यायी -2.3.19, 2.3.32
14. सुपद्मव्याकरणम्-2.2.18,
15. मुग्धबोधव्याकरणम् -291
16. अष्टाध्यायी – 2.3.45
17. मुग्धबोधव्याकरणम् -292
18. मुग्धबोधव्याकरणम्-293
19. अष्टाध्यायी - 2.3.22
20. मुग्धबोधव्याकरणम् -294, 295
21. अष्टाध्यायी - 2.3.13
22. सुपद्मव्याकरणम् -2.2.27-28
23. मुग्धबोधव्याकरणम् -296
24. अष्टाध्यायी - 2.3.16
25. सुपद्मव्याकरणम्-2.2.29
26. मुग्धबोधव्याकरणम्-297
27. अष्टाध्यायी - 2.3.73
28. मुग्धबोधव्याकरणम्-298
29. अष्टाध्यायी - 2.3.44
30. मुग्धबोधव्याकरणम्-299
31. अष्टाध्यायी -2.3.52, 2.3.17
32. सुपद्मव्याकरणम् -2.2.30
33. मुग्धबोधव्याकरणम्-300
34. अष्टाध्यायी - 2.3.28, सुपद्मव्याकरणम् -2.2.31
35. मुग्धबोधव्याकरणम्-301
36. अष्टाध्यायी- 2.3.29,10,11,24,25
37. मुग्धबोधव्याकरणम् -302
38. अष्टाध्यायी - 2.3.35
39. मुग्धबोधव्याकरणम् -303
40. अष्टाध्यायी - 2.3.50....
41. मुग्धबोधव्याकरणम् -304
42. अष्टाध्यायी - 2.3.51
43. मुग्धबोधव्याकरणम् -305
44. मुग्धबोधव्याकरणम् - 306
45. अष्टाध्यायी - 2.3.65,66
46. मुग्धबोधव्याकरणम् - 307
47. अष्टाध्यायी - 2.3.67,68
48. मुग्धबोधव्याकरणम् - 308
49. अष्टाध्यायी - 2.3.67,65
50. मुग्धबोधव्याकरणम् - 309
51 . अष्टाध्यायी - 2.3.39
52. मुग्धबोधव्याकरणम् - 310
53. अष्टाध्यायी - 2.3.36,37
54. मुग्धबोधव्याकरणम् - 311
55. अष्टाध्यायी – 23.38.
56. मुग्धबोधव्याकरणम् - 312
57. मुग्धबोधव्याकरणम् – 313
58. मुग्धबोधव्याकरणम् - 314
59. मुग्धबोधव्याकरणम् – 315
60. सुपद्मव्याकरणम्-1.2.32

**सन्दर्भग्रन्थाः**

1. बोपदेवस्य मुग्धवोधव्याकरणम् , श्रीनिरञ्जनस्वरूपब्रह्मचारिणा, संस्कृतपुस्तकभाण्डारः, कलिकाता - 1377 बङ्गाव्दः।

2. बोपदेवस्य मुग्धवोधव्याकरणम्, श्रीनिरञ्जनस्वरूपब्रह्मचारिणा, संस्कृतपुस्तकभाण्डारः, कलिकाता - 1391 बङ्गाव्दः।

3. पद्मनाभदत्तस्य *सुपद्मव्याकरणम्* उपेन्द्रनाथभट्टाचार्यश्च-श्रीमन्मथनाथभट्टाचार्यः श्री ,(सम्पा.) , ,कलिकाता1306 वङ्गाब्दः।

4. पद्मनाभदत्तस्य *सुपद्मव्याकरणम्* ,त्रैलोक्यनाथभट्टाचार्यः(सम्पा.) ,कलिकाता ,,1320 वङ्गाब्दः।

5. देवशर्मा ,श्रीकालीजीवनः ,*शब्दशास्त्रेरइतिहासः* ,रामकृष्णमिशनइनस्टिटिउट अव कालचार , प्रथमसंस्करणम्1995। कलकाता ,

6. हालदारः ,गुरुपदः ,*व्याकरणदर्शनेरइतिहासः* ,कलिकाता ,प्रथमखण्डः ,1350 वङ्गाब्दः।

7. दाहालः ,लोकमणिः ,*व्याकरणशास्त्रेतिहासः,* भारतीयविद्याप्रकाशनम् ,वाराणसी ,द्वितीयसंस्करणम् , 2018।

# प्रातिपदिकार्थतत्त्वविमर्शः

**Mrs. Nilima Sarkar**
Assistant Professor
Dept. of Sanskrit
Samsi College
&
**Md Zabir Alam**
Research Scholar
Raiganj University

**शोधसारः**

भाषा मानवसंसारभावस्य वाहिका चालिका च। विश्वसंसारे विश्वचर्चिततत्त्वानां मूलमस्ति भाषा एव। भाषायाः मूलमस्ति शब्दः इति। शब्दतत्त्वविषये विविधविचाराः सन्ति। संस्कृतशब्दशास्त्रे शब्दतत्त्वं प्रातिपदिकपदेन अभिधीयते। प्रातिपदिकं नाम किम्, कथं च प्रातिपदिकत्वं सिध्यति, पदं कतिविधम्, प्रातिपदिकविधायकसूत्राणां वर्णनम्, प्रातिपदिकस्यार्थः षोढा तद्यथा- जाति-व्यक्ति-लिङ्ग-संख्या-कारक-शब्दाः प्रभृतयः विषयाः समासेन उपस्थापिताः शोधपत्रेऽस्मिन्।

**संकेतसूची -** पदम्, जातिः, लिङ्गम्, शब्दः, प्रत्ययाः ।

**उपक्रमः**

किं नाम प्रातिपदिकम्, केन च प्रातिपदिकत्वं सिध्यतीति प्रसङ्गेऽस्मिन् चिन्तनं क्रियते। सुबन्तं तिङन्तञ्चेति नाम्ना पदं द्विविधमस्ति। येषां पदानामन्ते सुप्प्रत्ययाः विद्यन्ते, तानि सुबन्तपदानि एवञ्च येषां पदानामन्ते तिङ्प्रत्ययाः विद्यन्ते, तानि तिङन्तपदानि। पदसंज्ञाविषये पाणिनीयव्याकरणे "सुप्तिङन्तं पदम्"[i] इति सूत्रं वर्तते, यस्यार्थः सुप्-प्रत्ययान्तशब्दाः तिङ्-प्रत्ययान्तशब्दाः च पदसंज्ञकाः भवन्ति। एकविंशतिः सुप्-प्रत्ययाः सन्ति, तथा च अष्टादश तिङ्-प्रत्ययाः सन्ति।

**प्रातिपदिकविधायकसूत्राणि**

संस्कृतव्याकरणे प्रातिपदिकविधायकसूत्रद्वयमस्ति, तद्यथा 1. "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[ii], 2. "कृत्तद्धितसमासाश्च"[iii] चेति। सम्प्रति उक्तसूत्रद्वयस्य विषये अधः प्रस्तूयते-

1. "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"- अर्थात् यः अर्थवान् शब्दः धातुसंज्ञकः, प्रत्ययसंज्ञकः, प्रत्ययान्तः च नास्ति, तस्य प्रातिपदिकसंज्ञा भवति। व्याकरणशास्त्रे पठितासु संज्ञासु अन्यतमा संज्ञा अस्ति

प्रातिपदिकसंज्ञा इति। अतएव धातुभिन्नानां प्रत्ययान्तभिन्नानाम् अर्थवतां शब्दानाम् “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यनेन सूत्रेण प्रातिपदिकसंज्ञा भवति।

2. “कृत्तद्धितसमासाश्च”- अर्थात् कृत्-प्रत्ययान्तशब्दानाम्, तद्धितप्रत्ययान्तशब्दानाम् एवञ्च सामासिकशब्दानाम् प्रातिपदिकसंज्ञा स्यात्। अतएव ये शब्दाः कृत्-प्रत्ययान्ताः सन्ति, तद्धितप्रत्ययान्ताः वा सन्ति तेषाम् एवञ्च समासेन सिद्धानां शब्दानाम् “कृत्तद्धितसमासाश्च” इत्यनेन सूत्रेण प्रातिपदिकसंज्ञा भवति।

प्रातिपदिकविषये गरुडपुराणे निगदितमस्ति यत्, “अर्थवत् प्रातिपदिकं धातुप्रत्ययवर्जितम्”[iv] । शब्दशक्तिप्रकाशिकायां यथा – “यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते”[v]

**प्रातिपदिकार्थविचारः**

प्रतिपद+ठक्-प्रत्ययेन प्रातिपदिकम्, यस्यार्थः सुपद्मव्याकरणे उक्तं यत् अधातुविभक्त्यर्थवत्प्रातिपदिकमिति। प्रातिपदिकस्य अर्थः प्रातिपदिकार्थः। प्रातिपदिकार्थमात्रे प्रथमा स्यात्, इदं प्रातिपदिकं त्रिविधं, तद्यथा अलिङ्गाः-नियतलिङ्गयुक्ताः-अनियतलिङ्गयुक्ताः चेति। अलिङ्गाः नाम लिङ्गरहिताः अव्ययादयः तथा च नियतलिङ्गयुक्ताः शब्दाः प्रातिपदिकार्थमात्रे इत्यस्योदाहरणं भवन्ति। यथा अलिङ्गाः उच्चैः, नीचैः एवञ्च नियतलिङ्गयुक्ताः कृष्णः, श्रीः, ज्ञानञ्चेति। अनियतलिङ्गयुक्ताः नाम लिङ्गमात्राधिक्यस्य उदाहरणानि भवन्ति। यथा तटः, तटी, तटञ्चेति।

अस्य प्रातिपदिकस्य अर्थविषये व्याकरणशास्त्रे विस्तृता चर्चा दरीदृश्यते। अयञ्च प्रातिपदिकार्थः सिद्धान्तः षोढा इति। तद्यथा- जातिः व्यक्तिः लिङ्गम् संख्या कारकः शब्दश्चेति। यदुक्तं वैयाकरणसिद्धान्तकारिकायाम्-

**“एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।**

**नामार्थ इति सर्वेऽमी पक्षा शास्त्रे निरूपिताः।।”**[vi]

अर्थात् एकं नाम जातिः, द्विकं नाम जाकिव्यक्ती, त्रिकं नाम जातिव्यक्तिलिङ्गानि, चतुष्कं नाम जातिव्यक्तिलिङ्गसंख्या, पञ्चकं नाम जातिव्यक्तिलिङ्गसंख्याकारकानि, षोढा नाम जातिव्यक्तिलिङ्गसंख्याकारकशब्दश्चेति। प्रातिपदिकार्थः इति पदम् “प्रातिपदिकार्थलिङ्गपरिमाणवचमात्रे प्रथमा”[vii] इत्यस्मिन् सूत्रे प्राप्यते। कः प्रातिपदिकार्थः इत्यस्मिन् प्रसङ्गेऽपि नः व्याकरणशास्त्रे परम्परायाञ्च मतभेदः दृश्यते। अतः षोढा प्रातिपदिकार्थः, सम्प्रति एतेषां षण्णां प्रातिपदिकार्थानां विषये अधः समासेन व्याख्यानं क्रियते। तद्यथा-

**एकं प्रातिपदिकार्थः–**

एकं नाम जातिः यस्यार्थः भवति प्रवृत्तिनिमित्तम्, सत्ता, स्वार्थः वेति प्रातिपदिकार्थः। काशिकाकारस्य मते एकः प्रातिपदिकार्थः, पुनः तस्य मतानुसारेण जातिः नाम सत्ता एवञ्च सत्ता नाम प्रवृत्तिनिमित्तं प्रातिपदिकार्थः इति। अतः काशिकाकारः "प्रातिपदिकार्थः सत्ता" इति कथयति। अयं जातिः तत्तत्पदार्थसाधारणधर्मः शास्त्रे स्वार्थशब्देनोच्यते। जातिशक्तिवादः मीमांसकानामभिमतः। तेषामभिप्रायः यत् जातौ लाघवात् शब्दानां शक्तिः स्वीकार्यः। जातेः शब्दशक्यत्वे पाणिनीयसूत्रं यथा "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"[viii] इति। काशिकाकारः जातिरिति पदस्य स्थाने सत्तापदम् एवञ्च नागेशभट्टः प्रवृत्तिनिमित्तपदम् इति व्यवहरति।

**द्विकं प्रातिपदिकार्थः-**

द्विकं नाम जातिव्यक्ती अर्थात् जातिः, व्यक्तिः चेति। जातिविशिष्टा व्यक्तिः व्यक्तिविशिष्टा जातिः वा प्रातिपदिकार्थः। नागेशभट्टस्य मतानुसारेण द्विकः प्रातिपदिकार्थः नाम जातिः, व्यक्तिः चेति। नागेशः तस्य लघुशब्देन्दुशेखरे निगदति यत् 'परे त्वत्र सूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्च'[ix] इति।

**त्रिकं प्रातिपदिकार्थः-**

त्रिकं नाम जातिव्यक्तिलिङ्गानि अर्थात् जातिः, व्यक्तिः, लिङ्गञ्चेति। तत्त्वबोधिनीकारस्य ज्ञानेन्द्रसरस्वतेः मतानुसारेण त्रिकः प्रातिपदिकार्थः नाम जातिः, व्यक्तिः, लिङ्गञ्चेति। पुनः ज्ञानेन्द्रसरस्वतिना प्रतिपादितं यत्- 'अतस्त्रिकमेव प्रातिपदिकार्थः, संख्याकर्मादयस्तु विभक्त्यर्था इति'[x] इति।

**चतुष्कं प्रातिपदिकार्थः-**

चतुष्कं नाम जातिव्यक्तिलिङ्गसंख्याः अर्थात् जातिः, व्यक्तिः, लिङ्गम्, संख्या चेति। जातिः व्यक्तिः लिङ्गम् संख्या चेति चत्वारः नामार्थः इति केषाञ्चित् अभिमतम्। अतएव चतुष्कपदेन संख्याऽपि प्रातिपदिकार्थः। कैयटस्य मतानुसारेण चतुष्कः प्रातिपदिकार्थः इति।

**पञ्चकं प्रातिपदिकार्थः-**

पञ्चकं नाम जातिव्यक्तिलिङ्गसंख्याकारकाणि अर्थात् जातिः, व्यक्तिः, लिङ्गम्, संख्या, कारकञ्चेति। भट्टोजिदीक्षितस्य मतानुसारेण पञ्चकः प्रातिपदिकार्थः। तेन उक्तं यत्- 'नियतोपस्थितिकः प्रातिपदिकार्थः'[xi] इति।

"प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" सूत्रेऽस्मिन् 'प्रातिपदिकार्थः' इति पदमस्ति। अनेन प्रथमा विधीयते। अत्र प्रश्नः जायते यत्- प्रातिपदिकार्थपदस्य कोऽर्थः? प्रातिपदिकार्थपदे केषां ग्रहणं च भवेत्? तदानीमुच्यते- जातिः, व्यक्तिः, लिङ्गम्, संख्या, कारकञ्चेति प्रातिपदिकार्थः। तथाहि-

**"जातिः व्यक्तिर्लिङ्गं च संख्या कारकमेव च।**

**पञ्चकं प्रातिपदिकार्थाऽमी शास्त्रे प्रकल्पिताः।।"**[xii]

**षोढा प्रातिपदिकार्थः-**

षोढा प्रातिपदिकार्थः नाम जातिः, व्यक्तिः, लिङ्गम्, संख्या, कारकः, शब्दश्चेति। कौण्डभट्टादीनां मतं भवति षोढा प्रातिपदिकार्थः। एतेषां मतानुसारेण शब्दोऽपि शाब्दबोधे भसते, तस्माद्धि शब्दोऽपि प्रातिपदिकार्थः इति। अतएव प्रसङ्गेऽस्मिन् वाक्यपदीये उक्तमस्ति यत्-

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।"**[xiii]

उपयुक्तादालोचनातः ज्ञायते यत्, प्रातिपदिकविषये बहवः विचाराः सन्ति। पाणिनीयव्याकरणे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" "कृत्तद्धितसमासाश्च" इति प्रातिपदिकविधायकसूत्रद्वयमस्ति। पाणिनीयव्याकरणदर्शने जातिव्यक्तिलिङ्गसंख्याकारकशब्दश्चेति षोढा प्रातिपदिकार्थः इति सिद्धान्तः। नियतोपस्थितिकः प्रातिपदिकार्थः इत्यस्य व्याकरणशास्त्रस्यार्थः पदार्थः इति। यदि वयं व्याकरणदार्शनिकपरम्परायां ज्ञास्यामः तर्हि प्रातिपदिकार्थस्य बहवः समार्थकाः जाताः इत्यस्मिन् विषये नास्ति खलु सन्देहः।

## पादटीका

i पाणिनीयव्याकरणे. 1.4.14

ii पाणिनीयव्याकरणे 1.2.45

iii पाणिनीयव्याकरणे 1.2.46

iv गरुडपुराणम् – पूर्वखण्डः-209.7

v शब्दशक्तिप्रकाशिका-13

vi वैयाकरणसिद्धान्तकौमुदी 25

vii पाणिनीयव्याकरणे 2.3.46, 2.3.46

viii पाणिनीयव्याकरणे 1.2.51

ix वैयाकरणसिद्धान्तकौमुदी कारकप्रकरणम्, 39

x तत्रैव

xi वैयाकरणसिद्धान्तकौमुदी 532, (पा- 2.3.46)

Xii ई.पि.जि. पाठशाला, कारकप्करण्।

xiii वाक्यपदीयम्- 1.123

## सन्दर्भग्रन्थाः

1. आचार्यः पाणिनिः, *अष्टाध्यायी*– पाणिनिप्रणीता – चौखम्बा संस्कृत सीरीज्, वाराणसी,1965.
2. आचार्यः पाणिनिः, *अष्टाध्यायी*– सम्पादकौ श्रीगोपालदत्तपाण्डेयः, स्वामीप्रह्लादगिरिः, द्वि..सं..,चौखम्बासुरभारतीप्रकाशन, वाराणसी, 1981.
3. आचार्यः पाणिनिः, *अष्टाध्यायीसूत्रपाठः*– सम्पा., सि.शंकररामशास्त्री, द्वि.सं., श्रीबालमनोरमाग्रन्थमाला, मैलापूरम्,मद्रास, 1937.
4. आचार्यः पाणिनिः, *अष्टाध्यायीसूत्रपाठः*– स्वामीप्रह्लादगिरिवेदान्तकेशरी, पञ्च.सं., चौखम्बा कृष्णदास अकादमी, वाराणसी, 2018.
5. आचार्यः ड. सुदर्शनदेवः, *पाणिनीय-अष्टाध्यायी-प्रवचनम्*– प्रथमो भागः, सम्पा., ब्रह्मर्षि स्वामी विरजानन्द धर्मार्थ न्यास, रोहतक, हरियाणा, 1997.
6. आचार्यः वरदराजः, *लघुसिद्धान्तकौमुदी*– अध्यापक ड. तपनशंकरभट्टाचार्य्यः, पुनर्मुद्रण, संस्कृत वुक डिपो, 2016.
7. आचार्यः भर्तृहरिः, *वाक्यपदीये ब्रह्मकाण्ड*– सम्पा., मृणालकान्ति गङ्गोपाध्यायः, संस्कृत वुक डिपो, प्र.प्र.2018.
8. आचार्यः भर्तृहरिः, *वाक्यपदीयम्*– सम्पा + हिन्दी व्याख्याकार विद्यावाचस्पति प्रो. हरिनारायण तिवारी, पदकाण्डम्..I,II,III, श्रीमद्भर्तृहरिप्रणीतम् । संस्कृत टीका एवं नारायण हिन्दीव्याख्या सहित, चौखम्बा संस्कृत सीरीज्, वाराणसी ।
9. चक्रवर्ती सत्यनारायण, *पाणिनीयशब्दशास्त्र*– प्र.प्र. संस्कृत पुस्तक भाण्डार, कोलकाता, 2016.
10. ब्रह्मर्षि प्रो. ड. रामानुज शर्मा, *कारककौमुदी* , प्र..प्र.,चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2018.
11. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी*– व्या., श्री गोविन्दाचार्यः, सम्पा., लक्ष्मी शर्मा, श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता, प्रथमभागः, चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2017.
12. मिश्रः ड. शशिभूषण, *कारकप्रकरणम्*, प्र.सं., वि.एन्.पाब्लिकेशान् , 2016.
13. मुखोपाध्यायः ड. सच्चिदानन्द,*कारकप्रकरणम्*, वर्तमान मु.., साहित्य निकेतन, 2016.

# निर्वचनसिद्धान्त एवं तद्धितपदों की निर्वचनशैली

**Sukant Arya**
Lecturer in Sanskrit, SSB College,
Mahakalpara, Kendrapara.

**शोधसार-**

वेद अनन्त ज्ञाननिधि की शाश्वत महोदधि है। धातुचतुष्टय से निष्पन्न इस ज्ञानार्थक वेद को साक्षात्कृतधर्मा ऋषियों ने वेदपुरुष कहकर सम्बोधित किया है। उस वेदपुरुष के षट् वेदाङ्गों की भी परिकल्पना की गई है। तद्यथा-शिक्षा, निरुक्त, व्याकरण, ज्योतिष, छन्द तथा कल्प। वेदाङ्गग्रन्थ वेदज्ञान को बोधगम्य करने हेतु प्रमुख सहायक होते हैं। मनुष्य शरीर की संरचना की तरह नेत्र, श्रोत्र, कर्ण इत्यादि से उपमित करते हुए निरुक्तशास्त्र को श्रोत्ररूपेण स्वीकार किया है।[1] वेदभाष्यपरम्परा में इस निरुक्तशास्त्र का योगदान अद्वितीय रहा है। आचार्य यास्क की निर्वचनशैली वेदभाष्यपद्धति की आधारभूमि मानी गई है, क्योंकि इससे वेदभाष्य प्रसङ्ग में मन्त्रों के दुरुहार्थक पदों की व्याख्या सहजतया वेदभाष्यकार सुधीपाठकों के लिए वेदार्थ को प्रस्तुत करने में समर्थ हो जाता है। अतः निरुक्तशास्त्र के निर्वचनसिद्धान्त तथा तदन्तर्गत तद्धितपदों की निर्वचनपरम्परा का पर्यालोचन करते हुए आचार्य यास्क, दुर्गाचार्य, स्कन्दस्वामी निरुक्तकारों तथा परवर्तीकालीन निरुक्तशास्त्र के समीक्षात्मक अध्ययन करने वाले डॉ. विश्वनाथ काशीनाथ राजबाडे तथा डॉ. लक्ष्मणस्वरुप आदि विद्वानों के गवेषणात्मक अभिमतों के अनुसार इस शोधलेख प्रस्तुत करने का प्रयत्न किया जाएगा।

**प्रवेशिका-**

वेद समग्र भूमण्डल की प्राचीनतम निधि है, उसके रहस्य को सहजतया बोधगम्य करने हेतु प्राचीनकाल से अद्यावधि निरन्तर गतिशील प्रयत्न हो रहे हैं, उसी श्रृङ्खला में एक महत्त्वपूर्ण कडी निरुक्तशास्त्र है। आचार्य यास्क ने इस बात को स्पष्टरूपेण कहते हैं कि साक्षात्कृतधर्मा ऋषियों ने उपदेश के द्वारा मन्त्र सम्बन्धी ज्ञान प्रदान किया, परन्तु जब इनसे परवर्ती जनमानस श्रुतिपरम्परा के द्वारा वेदज्ञान धारण करने में असमर्थ हो गए, तब इस निरुक्तशास्त्र तथा अन्य वेदाङ्गों का समाम्नान किया गया है। परन्तु आज निरुक्तशास्त्र का महत्व एक भिन्न रूप में समक्ष आया है। निरुक्त की उपयोगिता आज केवल मन्त्रार्थ की गुह्य रहस्यों को आनावृत करने मात्र से नहीं अपितु भाषाविज्ञान के छन्दित एवं जटिल रहस्यों को स्वच्छन्द

एवं सुगम तथा बोधगम्य करने के लिए भी है। भाषावैज्ञानिक जिन स्थापनाओं के आधार पर अपने आप गौरवान्वित अनुभव करता है, उसका प्रौढात्मक विवेचन आज से प्रायः २५०० वर्ष पूर्व आचार्य यास्क ने कर दिया था, इसलिए भी निरुक्तशास्त्र का पर्यालोचन वर्त्तमानकाल में अपना विशेष महत्व रखता है। अतः इसी के आधार पर प्रस्तुत शोधलेख में निरुक्तशास्त्र के निर्वचनसिद्धान्त तथा तदन्तर्गत तद्धितपदों की निर्वचनपरम्परा का पर्यालोचन किया जाएगा।

निर्वचन वह प्रक्रिया है जिसमें शब्द निज वर्त्तमानस्वरूप से मूलस्वरूप तक यात्रा करता है। इसकी संरचना व्याकरणशास्त्र में प्रचलित व्युत्पत्ति से पृथक् ही होता है। व्युत्पत्ति में केवल पद के प्रकृति-प्रत्यय को स्पष्ट किया जाता है, जबकि निर्वचन में अर्थ के स्वरूप को ध्वन्यात्मकता के अधार पर इतिहास के आश्रय से विवेचना की जाती है। अर्थात् पदों के मूलरूप के साथ बाह्य और आन्तरिक रूप की मञ्जुल सामञ्जस्य स्थापित करने का प्रयत्न किया जाता है। आचार्य यास्क के निरुक्तशास्त्र के परिप्रेक्ष्य में देखने पर यह ज्ञात होता है कि जिन पदों के प्रकृति-प्रत्यय स्थानभेद अथवा कालभेद से अत्यधिक परिवर्तित हो गये हैं, उन पदों की व्युत्पत्त्यन्वेषण का कार्य निवर्चन विज्ञान में किया जाता है। पुनरपि व्युत्पत्ति तथा निर्वचन के स्वरूप में इतना पार्थक्य है कि जहाँ व्याकरणिक प्रक्रिया से प्रधानरूप पद के बाह्यस्वरूप का चिन्तन किया जाता है, वहीं निर्वचन प्रक्रिया से पदों के अन्तःस्वरूप का चिन्तन किया जाता है। अपर शब्दों में पदों के शरीर का विश्लेषक व्युत्पत्ति है तो आत्मा का विश्लेषक निर्वचन है तथा एक की दृष्टि ध्वनिपरक है अपर की अर्थपरक। निष्कर्षतः यह कहा जा सकता है कि निर्वचन विज्ञान की सहायता से पदों के मौलिक अर्थों की प्राप्ति हेतु गवेषणा की जाती है, जो कि व्युत्पत्ति की अनिवार्य प्रक्रिया से होकर जाती है। जिससे पद का सर्वस्व उसी प्रकार प्रकाशित हो जाता है, जैसे उदीयमान सूर्य निज प्रकाशपुञ्ज से देदीप्यमान होता है।

निर्वचन के स्वरूप का प्रतिपादन करते हुए दुर्गाचार्य का कहना है कि-**'अपिहितस्यार्थस्य परोक्षवृत्तावतिपरोक्षावृत्तौ वा शब्दे निष्कृष्य विगृह्यवचनं निर्वचनम्'**[2] अर्थात् शब्द के गुह्यार्थ को प्रकाशित करने के लिए उसके अक्षरों को विगृहीत करते हुए क्रिया को पूर्णतया अभिव्यक्ति देना 'निर्वचन' कहलाता है। शब्द व पद के अर्थ को जानने के लिए व्युत्पत्ति के आधार पर विभक्त करना 'विग्रह' कहलाता है। प्रो. राजबाडे के अनुसार निर्वचन शब्दों से सम्पृक्त अर्थों को व्युत्पत्ति के द्वारा पूर्णतया अभिव्यक्ति देना निर्वचन का कार्यरूप है। अतः यह कहा जा सकता है कि विशेषतया परोक्ष और अतिपरोक्षवृत्ति रूप नामपदों का व्युत्पत्तिमूलक विग्रह निर्वचन कहलाता है।

**निर्वचनसिद्धान्त-**

प्रकृति-प्रत्यय तथा अर्थ की दृष्टि से दुरुह शब्दों व पदों को व्युत्पन्न करने का उपाय बताते हुए आचार्य यास्क कहते हैं- **'अर्थो नित्यः परीक्षेत केनचिद्वृत्तिसामान्येन'**[3] अर्थात् अर्थ की प्रधानता को ध्यान में रखते हुए अव्युत्पन्न शब्दों के स्वर-संस्कार की परीक्षा करना अत्यावश्यक है, जब वह अभिधान बोधगम्य हो जाये तत्पश्चात् इस शब्द के साथ किस धातु की अर्थसाम्यता रहती है, उस पर विचार करके समानता के आधार पर उस शब्द का निर्वचन कर लेना चाहिए, क्योंकि अर्थ प्रधान होता है और शब्द उसकी अपेक्षा गौण होता है। अतः शब्द की समानता से अर्थ की समानता बलवान् होती है।[4]

उपर्युक्त निर्वचन सिद्धान्त को यदि तद्वत् स्वीकार कर लिया जाए तो महान् अनर्थ हो जाएगा। कारणस्वरुपयथा **'गौ'** पद में गमनार्थक क्रिया की उपलब्धि होती है तथा गमनार्थकता को द्योतित करने वाली **√व्रज गतौ, √या प्रापणे** आदि धातुओं से समानार्थकता के आधार पर **'गौ'** पद को व्युत्पन्न किया जा सकेगा अतः जहाँ पर अर्थसाम्य की अनिवार्यता है वहाँ ध्वनिसाम्य की भी अनिवार्यता होनी चाहिए। दुर्गाचार्य ने इस तथ्य की उपेक्षा की है तथा **'अर्थसामान्यं बलीयः शब्दसामान्यात्'**[5] के आधार पर अर्थ की महत्ता का यह तात्पर्य कदापि नहीं लिया जाना चाहिए कि अनुगत अर्थ में साम्य रखने वाली धातु के अभाव में केवल धात्वर्थ की समानता के आधार पर शब्द का निर्वचन कर लिया जाए। इनके इस मन्तव्य से इस तथ्य की पुष्टि हो जाती है कि जो शब्द स्वर-संस्कार की दृष्टि से अनवगत हैं उन शब्दों को ग्रहण कर लिया जाये तथा इसप्रकार के ऐकपदिक शब्दों के द्वारा उनके उसी अर्थ की प्रतीति कराना कि जिस अर्थ में प्रयुक्त होते हैं, यह आचार्य यास्क के विवेचन का आशय है। डॉ. लक्ष्मणस्वरूप तथा राजबाडे ने भी उपर्युक्त प्रकरण को यथावत् स्वीकर कर लिया है।

स्कन्दस्वामी के अनुसार **'न संस्कारमाद्रियेत'**[6] का अर्थ है कि जो शब्द अतिपरोक्षवृत्ति में स्थित हैं, जिसकी सामान्यतया क्रियार्थ की प्रतीति नहीं हो पाती है, जैसे- **शितामन्**[7]**, दमूना**[8] आदि शब्दों का निर्वचनकाल में स्वर या व्यञ्जन की समानता के आधार पर निर्वचन करना चाहिए, तब उसमें व्याकरणशास्त्र बाधक हो सकता है, अतः स्कन्दस्वामी ने कहा है कि ऐसा प्रसङ्ग होने पर व्याकरण के स्वर-संस्कार की अपेक्षा कदापि न करें।[9]

आचार्य यास्क के अनुसार शब्दप्रवृत्तियों के आधार पर एकपद शब्दों का निर्वचन करना चाहिए।[10] दुर्गाचार्य के अनुसार **'एकपद'** वे शब्द हैं जो अवयव कल्पना से रहित हैं[11] अर्थात् जो समस्त या तद्धितान्त पद नहीं हैं। आचार्य स्कन्दस्वामी **'एकपद'** का अर्थ अवृत्तिज मानते हैं।[12] वृत्ति पद से कृत्, तद्धित,

समास, एकशेष तथा सन् इत्यादि का ग्रहण होता है।[13] इनके अनुसार कृदन्त पद एकपद नहीं हैं क्योंकि वे वृत्तिज है, जबकि आचार्य यास्क कृदन्त को **'एकपद'** मानते हैं।

**तद्धितपदों की निर्वचनशैली-**

एकपर्व (एकपद) या अनेकपर्व (अनेकपद) वाले तद्धित प्रत्यययुक्त पदों में उभयपद अथवा प्रकृति और प्रत्यय को दोनों को पृथक् करके निर्वचन करना चाहिए।[14] दुर्गाचार्य के कथनानुसार सर्वप्रथम तद्धित या समास का निर्वचन करना चाहिए, तदनन्तर प्रत्येक पद का तथा पदों में भी पूर्वापर की दृष्टि से पदों का निर्वचन करना युक्तियुक्त होगा।

प्रस्तुत शोधलेख के विषयानुसार आचार्य यास्क, स्कन्दस्वामी तथा दुर्गाचार्य के उपर्युक्त कथोपकथन की त्रिविध व्याख्या की जा सकती है, जिससे प्रस्तुत लेख की लक्ष्य को प्राप्त किया जा सकता है।

**प्रथमव्याख्या-** किसी आचार्य का मत है कि पूर्वपद का पूर्व विग्रह करके पुनश्च प्रथमतः निर्वचन तत्पश्चात् उत्तरवर्ती पदों का विग्रह किया जाना चाहिए। स्कन्दस्वामी इस मत को अस्वीकार करते हुए कहते हैं कि **'अध्वर'** और **'विधवा'** इत्यादि पदों के निर्वचनप्रसङ्ग में प्रथमतः उत्तरपद तत्पश्चात् पूर्वपद का विग्रह किया गया है।[15]

**द्वितीयव्याख्या-** पूर्वपद के पश्चात् उत्तरपद के विग्रह हो इस प्रकार के विधान की अपेक्षा यथाभीष्ट हो तदनुसार निर्वचन कर लिया जाए। स्कन्दस्वामी इस व्याख्या को निरस्त करते हुए कहते हैं कि **'अध्वर'** आदि पदों में पूर्वपद और उत्तरपद का प्रविभाग दृष्टिगत होने से यह व्याख्या दोषपूर्ण ही है।[16]

**तृतीयव्याख्या-** पद-समुदाय प्रकृति होने के कारण विगृहीत पदों में सामुदायिक अर्थ को प्रथम कहकर तत्पश्चात् विगृहीत पदों का इच्छानुसार पूर्वपद और उत्तरपद को पृथक् करके निर्वचन किया जाए। स्कन्दस्वामी का कथन है कि प्रथमतः सम्पूर्ण पद के अर्थ को कहकर तत्पश्चात् विगृहीत पदों की यथावश्यक पूर्वोत्तर पदों का निर्वचन किया जाना चाहिए। यथा- **'अध्वर'** पद के निर्वचन में आचार्य सर्वप्रथम उसके सामुदायिक अर्थ को कहते हैं- **'अध्वर इति यज्ञनाम'**[17] तत्पश्चात् विग्रह करके प्रथम उत्तरपद तथा पश्चात् पूर्वपद का अर्थ करते हैं। इसी प्रकार **'कक्ष्या रज्जुरश्वस्य'**[18] इस वाक्य के सामुदायिक अर्थ को **'कक्षं सेवते'** कहकर अभिव्यक्त करते हैं, तत्पश्चात् **'कक्ष्या'** पद का निर्वचन करते हैं।

स्कन्दस्वामी के अनुसार उपर्युक्त विवेचन से आचार्य यास्क की निर्वचनशैली का स्वरूप स्पष्टतः प्रतीत होता है। सामुदयिक अर्थ की अभिव्यक्ति तत्पश्चात् विग्रह पुनश्च यथाभीष्ट हो तदनुसार पूर्वपद अथवा उत्तरपद की प्रथमतः निर्वचन करने का विधान किया गया है। परन्तु आचार्य यास्क के उपर्युक्त अवतरण से यह विषय तद्वत् स्पष्ट नहीं होता है यद्वत् स्कन्दस्वामी के उदाहरणपूर्वक स्पष्टीकरण से होता है। अतः यदि हम दुर्गाचार्य के अर्थ स्वीकारते हैं तब **अध्वर, विधवा**[19] सदृश पदों में आचार्य यास्क द्वारा प्रतिष्ठापित निर्वचनशैली का उल्लङ्घन परिलक्षित होता है, क्योंकि तद्धितार्थ या समासार्थ को बताने के पश्चात् प्रथम पूर्वपद का निर्वचन तत्पश्चात् उत्तरपद का निर्वचन करना चाहिए। अतः माना जा सकता है कि आचार्य यास्क अपनी ही निर्वचनशैली को तर्कसङ्गत आधार देनें में असमर्थ हो रहे हैं।

दुर्गाचार्य ने **'पर्व'** का अर्थ **'पद'** किया है। इन्होंने सम्भवतः **'एवमेकपदानि निर्ब्रूयात्[20]'** के आधार पर **'पर्व'** का अर्थ **'पद'** ग्रहण किया है उनके अनुसार **'दण्ड्यः'** एकपद तद्धित है तथा **'वार्ष्यायणिः'** अनेकपद तद्धित है, क्योंकि इसमें अनेकपद समाहित हैं, यथा- **'वृषस्य गोत्रापत्यम् वार्ष्यायणिः'** वृष शब्द से उत्तर **'तिकादिभ्यः फिञ्'**[21] से गोत्र अर्थ में फिञ् प्रत्यय का आयनि होकर **'तद्धितेष्वचामादेः'**[22] से आदि वृद्धि होकर **'छागवृषयोरपि'**[23] वार्तिक से वार्ष्य निपातन होकर **वार्ष्यायणिः** होता है। अतः इस पद में अनेकपद तद्धित मानते हैं, परन्तु **'वार्ष्यायणिः'** सदृशपद अनेकपद वाले नहीं माने जा सकते हैं क्योंकि व्याकरणशास्त्र के नियमानुसार इसका अनेकपदत्व कथमपि सिद्ध नहीं होता है।

स्कन्दस्वामी **'पर्व'** का अर्थ **'सन्धि'** मानते हैं,[24] ऐसा करने पर उपर्युक्त दोषों का परिहार स्वतः ही हो जाता है तथा **'वार्ष्यायणिः'** एकपद होते हुए भी अनेकपर्व वाला सिद्ध होता है। परन्तु ध्यातव्य है कि यह सन्धि प्रकृति-प्रत्यय तथा अज्झलादि सन्धि से सर्वथा भिन्न ही है।

**तद्धितपदों का उदाहरण-**

**'दण्ड्यः पुरुषः'** इस वाक्य में **'दण्ड्यः'** पद तद्धितप्रत्ययान्त है, अतः आचार्य यास्क पहले तद्धितार्थ का निर्वचन करते हैं- **'दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा।**[25] पाणिनीय व्याकरण में **'अर्हति'** अर्थ में **'दण्डादिभ्यो यत्'**[26] सूत्र से **'यत्'** प्रत्यय होता है। **'सम्पद्यते'** के अर्थ में पाणिनीय व्याकरण से सिद्ध नहीं होता है। किन्तु **'सम्पद्यते'** यह तद्धितार्थ पाणिनीय व्याकरण सम्मत है। परन्तु **'सम्पद्यते'** अर्थ में **'यत्'** न होकर **'सम्पादिनि'**[27] सूत्र से **'ठञ्'** प्रत्यय का विधान है।

इस प्रकार तद्धितार्थ के निर्वचन के उपरान्त आचार्य यास्क पद का निर्वचन करते हैं-**'दण्डो ददतेर्धारयतिकर्मणः'**[28] अर्थात् **√दद दाने** इस दानार्थक धातु को धारणार्थक अर्थ में ग्रहण करके **'दण्ड'** पद को निष्पन्न किया गया है। इस धातु के धारण अर्थ में प्रयोग का उदाहरण वेदमन्त्र के माध्यम से दिया गया है- **'विश्वे देवाः पुष्करे त्वाददन्त'**[29] अर्थात् मित्रावरुणौ के वीर्य से उत्पन्न होने वाले तुमको सम्पूर्ण देवताओं ने पुष्कर में धारण किया है। लोक में भी **'अक्रूरो ददते मणिम्'**[30] अर्थात् अक्रूर नामक राजा स्यमन्तक नामक मणि को मस्तक पर धारण करता है। इस प्रकार **√दद दाने** धातु धारणार्थक भी सिद्ध होता है।

आचार्य औपमन्यव उपशम अर्थ वाली **√दम** धातु से **'दण्ड'** पद की उपपत्ति मानते हैं, क्योंकि राजाओं के द्वारा अपराधी पुरुषों को इसी दण्ड के माध्यम से दमन किया जाता है। इस प्रकार तद्धितार्थ का निर्वचन करने के पश्चात् आचार्य पदों का निर्वचन करते हैं।

उपर्युक्त विवरण से यह निष्कर्ष प्राप्त होता है कि निरुक्त की दिशा व्याकरणशास्त्र की दिशा से विपरीत है। व्याकरणशास्त्र मूलाधातु से सिद्ध अवस्था की ओर प्रयाण करता है जबकि निर्वचन सिद्ध अवस्था से मूल की ओर प्रयाण करने का प्रयत्न करता है। परन्तु इनमें परस्पर किसी भी प्रकार को कोई विरोधाभास सर्वथा नहीं है, केवलमात्र शब्द निष्पन्न करने की प्रक्रिया में ही अन्तर है। यह प्रक्रियाभेद ही शास्त्रभेद का आधार है। समास तथा तद्धितयुक्त पदों के विषय में आचार्य यास्क ने एक निर्वचनशैली की स्थापना की है। जिसमें सर्वप्रथम तद्धितार्थ का वाचन करें तत्पश्चात् विग्रह और उसके बाद पूर्वपद और उत्तरपद का निर्वचन करना युक्तियुक्त सिद्ध होता है।

## पादटीका

1. निरुक्तं श्रोत्रमुच्यते। पाणिनीयशिक्षा, ४१-४२
2. दुर्गवृत्ति, पृ.१२१
3. निरुक्त, २/१
4. दुर्गवृत्ति, पृ.१२२
5. दुर्गवृत्ति, पृ.१२२
6. निरुक्त, २/१
7. पार्श्वतः श्रोणितः शितामतः। निरुक्त, ४/३
8. दमूनाः दममनाः वा, दानमनाः वा, दान्तमनाः वा, अपि वा, दमः इति गृहनाम, तन्नाः स्यात्। निरुक्त, ४/४
9. अर्थसामान्यमाद्रियेत शब्दसामान्यं वा। दुर्गवृत्ति, पृ.१२२
10. एवमेकपदानि निर्ब्रूयात्। निरुक्त, २/२
11. दुर्गवृत्ति, पृ.१३२
12. स्कन्दस्वामी-भाष्य-२, पृ.२४
13. सर्वसमासशेष प्रकरण (वैयाकरणसिद्धान्तकौमुदी)
14. निरुक्त, २/२ , दुर्गवृत्ति, पृ.१३२-१३३
15 . स्कन्दस्वामी-भाष्य-२, पृ.२६
16. वही.

17. निरुक्त, १/८
18. निरुक्त, २/२
19. विधवा विधातृका भवति। विधवनाद् वा विधावनाद् वा इति चर्मशिराः। अपि वा धवः इति मनुष्यनाम। तद्वियोगात् विधवा। निरुक्त, ३/१५
20. निरुक्त, २/२
21. पाणिनीयसूत्रपाठः, ४/१/१५४
22. पाणिनीयसूत्रपाठः, ७/२/११७
23. वार्तिकम्, ४/१/१५५
24. स्कन्दस्वामी-भाष्य-२, पृ.२५
25. निरुक्त, २/२
26. पाणिनीयसूत्रपाठः, ५/१/६६
27. पाणिनीयसूत्रपाठः, ५/१/९९
28. निरुक्त, २/२
29. ऋग्वेदसंहिता, ७/३३/११
30. निरुक्त, २/२

## सन्दर्भग्रन्थाः


- सायणाचार्यविरचितभाष्यसमेता, ***ऋग्वेदसंहिता,*** भाग-२, तिलक महाराष्ट्र युनिवर्सिटी, वैदिक संशोधन मण्डल, १९३६
- सम्पा०- मीमांसक, युधिष्ठिर, ***अष्टाध्यायीसूत्रपाठः*** - पाणिनि, रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत, २०१९
- सम्पा०- मीमांसक, युधिष्ठिर, ***धातुपाठः***-पाणिनि, रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत, २०१४
- सम्पा०- राजबाडे, विश्वनाथ काशीनाथ, निरुक्तम्-दुर्गाचार्य, आनन्दाश्रम संस्कृत ग्रन्थावलिः, आनन्दाश्रम मुद्रणालय, पूना, १९२६
- सम्पा०- डॉ० लक्ष्मणस्वरुप, निरुक्तवृत्ति-स्कन्द महेश्वर, पञ्जाब विश्वविद्यालय, लाहौर, १९३४
- जयादित्य वामन, ***काशिका,*** चौखम्बा विद्याभवन, वाराणसी, १९५२
- आचार्य यास्क, निरुक्तम्, वैदिक यन्त्रालय, अजमेर, १९५७
- विश्वनाथ काशीनाथ राजबाडे, **यास्काज निरुक्त**, भण्डारकर ओरिएण्टल रिसर्च इन्स्टीट्यूट्, पूना, १९४०
- आचार्य विश्वेश्वर, **निरुक्तम्,** ज्ञान मण्डल लिमिटेड, वाराणसी, १९६६
- डॉ० लक्ष्मणस्वरुप, निघण्टु और निरुक्त, अनु०-सत्यभूषण योगी, मोतीलाल बनारसीदास दिल्ली, १९६

# पण्डित श्री भागवतप्रसाद दास शर्मणा विरचितस्य वैदेहीशविलासमहाकाव्यस्य पूर्वविलासे महाकाव्यलक्षणसमन्वयः

**आशुतोष दोरा**

शोधछात्रः,राष्ट्रिय संस्कृत विश्वविद्यालयः

तिरुपतिःआन्ध्रप्रदेशः(517507)

**मार्गदर्शकः**

**डॉ.प्रदीप कुमार वाग**

सहाचार्यः, साहित्यविभागः

कवयति वर्णयति वा इति कविः। कवेरलौकिकं कर्म भवति काव्यम्। महता श्रमेण कविः काव्यम् रचयति। भगवतः सृष्टौ अग्निः उत्तापः ददाति एवं च वसन्तर्त्तुः प्रेमीजनानां कृते महान् आनन्दः प्रयच्छति।परन्तु ये जनाः स्वप्रियायाः विच्छेदः अभवन् तेषां कृतेऽयं समयः वहु दुःखं प्रददाति। पुनः अस्मिन् संसारे षड् रसाः सन्ति। तद्यथा -मधुर,कटु,आम्ल,क्षार,कषाय,लवणमिति।परन्तु कविसृष्टिरितोऽपि उन्नतशीला प्रतीयते। यतोहि कविसृष्टौ नवरसाः विद्यन्ते। तद्यथा-शृङ्गारः,हास्य,करुणेत्यादयः। एवं रुपेण कवेः काव्यसंसारः भगवतः ब्रह्मणः सृष्टिरपेक्षया उन्नतशीलः इति प्रतीयते। अतः एव वाग्देवतावतारः आचार्यः मम्मटः कथयति-

**नियतिकृत नियमरहिताम् ह्लादैकमयीमनन्यपरतन्त्राम् ।**

**नवरसरुचिरां निर्मीतिमादधति भारती कवेर्जयति ।।**[1]

पुनः काव्यस्य लक्षणं कर्त्तुमाह- **तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि**[2]

अर्थात् काव्यं अदोषं स्यात्। शब्दार्थयुक्तं स्यात्। गुणयुक्तं स्यात् एवं च अन्यानि वैशिष्ट्यान्यपि तत्र सन्निवेशितं भवेत्। आचार्यविश्वनाथस्य मतानुसारं - **वाक्यं रसात्मकं काव्यम्**[3]। अर्थात् रसयुक्तं वाक्यमेव काव्यं भवितुमर्हति । पण्डितराज जगन्नाथः कथयति- **रमणीयार्थः प्रतिपादकः शब्दः काव्यम्**[4]। रमणीयता नाम किम् ?लोकोत्तर चमत्कार आह्लादज नकज्ञानगोचरता नाम रमणीयता। अर्थात् ये शब्दाः रमणीयार्थस्य प्रतिपादनं कर्त्तुम् शक्नुवन्ति तत् काव्यम् भवितुमर्हति। पुनः आचार्यः कुन्तकः वर्णयति –

**शब्दार्थो सहितौ वक्रकविव्यापारशालिनी।**

**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी।।**[5]

अर्थात् वक्रकविव्यापारेण युक्तं काव्यमर्मज्ञानां हृदयेष्वाह्लादः उत्पन्नकारी,बन्धरुपेण व्यवस्थितं साहित्यमेव काव्यम् भवितुमर्हति ।

**काव्यभेदाः-**

प्राचीनालंकारिकाः काव्यं द्विधा विभज्यन्ते। तद्यथा -दृश्यकाव्यम् श्रव्यकाव्यञ्चेति। पुनः दृश्यकाव्यस्य भेदद्वयं वर्त्तते। तद्यथा -रुपकम् उपरुपकञ्चेति। तत्र रुपकाणां संख्या भवति दश। तद्यथा-

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः।**

**व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति।।**[6]

नाटकम्,प्रकरणम् ,भाणः,प्रहसनमित्यादयः दशरुपकाणि भवन्ति। उपरुपकाणां संख्या भवति अष्टादश। एवं रुपेण दृश्यकाव्यस्य भेदाः प्रतिपादिताः। श्रव्यकाव्यस्यापि भेदत्रयः दृश्यन्ते। तद्यथा-गद्यकाव्यम्,पद्यकाव्यम्,चम्पुकाव्यञ्चेति। तत्र गद्यकाव्यम् पुनः द्विविधम्। कथाऽऽख्यायिका भेदेन। कादम्बरी, दशकुमारचरितमित्यादयः कथायामन्तर्भवन्ति। हर्षचरितमितिहास प्रसिद्धत्वादाख्यायिकाया-मन्तर्भवति। चम्पुकाव्यस्य लक्षणं यथा-

**गद्यपद्यमयं काव्यम् चम्पुरित्यभिधीयते।**[7] पद्यकाव्यम् पुनः द्विधा विभज्यते मुख्यतः। तद्यथा -महाकाव्यम् खण्डकाव्यञ्चेति। यत्र कथावस्तु एकदेशस्यानुसरणं करोति तत् खण्डकाव्यम् भवति। परन्तु महाकाव्यस्य लक्षणं वहु विशालं वर्त्तते। तदित्थम्-

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।।**
**एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।**
**श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस ईष्यते ।।**
**अङ्गानि सर्वेऽपि रसाः सर्वे नाटक सन्धयः ।**
**इतिहासोद्भवं वृत्तमन्यदा सज्जनाश्रयम् ।।**
**चत्वारस्तस्यवर्गाः स्युस्तेष्वेकं च फलं भवेत् ।**
**आदौनमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।।**
**क्वचिन्निन्दा खलादीनां सतां च गुणकीर्त्तन् ।**

**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।।**
**नातिस्वल्पा नातिदीर्घा सर्गा अष्टाधिका इह ।**
**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।।**
**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।।**
**सन्ध्यासूर्येन्दुरजनी प्रदोषध्वान्तवासराः ।**
**प्रातर्मध्याह्नमृगया शैलर्त्तुवनसागराः ।।**
**सम्भोग विप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।**
**रणप्रयाणोपयम मन्त्रपुत्रोदयादयः ।।**
**वर्णनीया यथायोग्यं साङ्गोपाङ्ग अमी इह ।**
**कवेर्वृत्तस्य नाम्ना वा नायकस्येतरस्य वा ।।**
**नामास्य सर्गोपादेय कथया सर्गनाम तु ।।**[8]

**लक्षणसमन्वयः-**

**सर्गबन्धोमहाकाव्यम् तत्रैको नायकः सुरः-**

अर्थात् महाकाव्यं सर्गबन्धः युक्तं भवेत्। तस्य नायकः कोऽपि देवता भवेत्। वैदेहीशविलास महाकाव्यस्य पूर्वविलासे षड्विंशतिसर्गाः विलसन्ति। तस्य नायकः भवति श्रीरामः। सः एकः देवः(देवता) अस्ति।

**सद्वंशःक्षत्रियो वापि धीरोदात्तः गुणान्वितः-**

सद्वंशः अर्थात् नायकः एकः प्रख्यातवंश सम्बन्धी भवेत् एवञ्च धीरोदात्त गुणयुक्तः भवेत्। वैदेहीशविलास महाकाव्यस्यपूर्वविलासस्य नायकः प्रभुश्रीरामः एकः प्रख्यातवंशयुक्तोऽस्ति। कारणं रघुवंशः भवति एकः प्रख्यातवंशः। महाराज रघुः अतीव प्रतापी आसीदिति कारणात् अस्य नामानुसारं रघुवंशः इति नाम्ना सुविख्यातः जातः। पुनः श्रीरामः क्षत्रियः आसीत्। कथितमस्ति यत् – नायकः धीरोदात्तगुणयुक्तः भवेदिति ।धीरोदात्तनायकस्य लक्षणं यथा –

**महासत्त्वोऽतिगम्भीरः क्षमावान्नविकत्थनः।**
**स्थिरो निगुढाहंकारो धीरोदात्तः दृढव्रतः।।**[9]

अर्थात् धीरोदात्तः नायकः महापराक्रमी ,अतिगम्भीरः स्वभावविशिष्टः, क्षमाशीलः, आत्मप्रशंसाविरोधी, स्थिरस्वभावविशिष्टः, विनम्रतादि सुगुणैः अहंकारादि दुर्गुणानाम् विनाशकारी तथा कर्त्तव्यपरायणता युक्तः भवति ।

श्रीरामस्य शिवधनुर्विभञ्जनम् तस्य महतः पराक्रमस्य प्रमाणमस्ति। तद्यथा-

**व्यासीच्चैव प्रचण्ड प्रवरसुभटदोः खण्डितैरण्डदण्डम्**
**व्याप्तब्रह्माण्डभाण्डं प्रलयसमयसंभूत जीमुतनादम् ।**
**व्यागुढात्कर्षणात्तत्समुपहसितवान् सोक्तवन्तो निलिम्पाः**
**वारेणैषा सुधाजीवयदिति वत नो मूर्च्छित प्रोत्थिता वै।।**[10]

अर्थात् प्रकाण्डकायमल्लहस्ताभ्यां उत्पाटनकारणात् भग्नवृक्षः यथा पतति तथैव गम्भीर गर्जन पूर्वकम् शिवधनुः विखण्डितः अभवत्। धनुर्भग्नेन मेघस्य गभीर गर्जनादपि जायमानः भयङ्करशब्देन पृथिवी प्रकम्पिता अभवत्। धनुर्भग्नशब्दं श्रुत्वा वलिरचिन्तयत् -शतवज्रस्य प्रहारमिव अस्य शब्दः चतुर्दिशं प्रकम्पितं कृतवान् इति। अस्य भयङ्कर शव्देन पापीनः अपि चेतनाशून्यमभवन् तर्हि मनुष्याणाम् तथा किन्नराणाम् अपि चेतनाशून्यता तु सामान्यविषयः एव।

इतोऽपि श्रीरामः विनम्रतादि सुगुणैः युक्तमासीत्। धीरोदात्त नायकस्य सर्वं लक्षणं रामस्य चरित्रे समन्वितं भवति।

**एकवंशभवा भूपाः कुलजा बहवोऽपि वा -**

अर्थात् उत्तमकूले जातः क्षत्रियः अस्य नायकः भवितुमर्हति। अथवा एकस्मिन् वंशे जातः नैके कूलीनः राजानः नायकाः भवितुमर्हन्ति। श्रीरामः पुराणप्रसिद्धः सूर्यवंशे समुत्पन्नः। तस्य सम्बन्धः सूर्यवंशमिव एकेन सुप्रसिद्धवंशेन सह विद्यते।

**श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते –**

अर्थात् श्रृङ्गारः,वीरः ,शान्तः -एतेषु त्रिषु रसेषु कोऽपि एकः रसः अङ्गी(मुख्य) रुपेण स्यात्। अस्मिन् महाकाव्ये श्रृङ्गाररसः प्रमुखः भवति अर्थात् वैदेहीशविलासः इत्युक्ते विदेहराजस्य पुत्री वैदेही ; तस्याः ईशः वैदेहीशः अर्थात् रामः, तयोर्विलासः अर्थात् सीता-रामयोः विलासः भवति वैदेहीशविलासः। तदुदाहरण माध्यमेन ज्ञातुं शक्नुमः। यथा-

**विगृणाति सुरसे प्रवृत्तिवीर्थीं विरह समुत्सुकतां समादधाति।**
**विभाति ममतां किलैव धर मिति भावचयेषु खण्डिताऽस्मि।।**[11]

अर्थात् मर्यादापुरुषोत्तमः श्रीरामः विवाहानन्तरं मधुशय्या समीपे सीतां दृष्ट्वा तस्य मनः स्थिति विषये अत्र वर्णितम्। तद्यथा - श्रीरामः सीतायाः विरहवेदनायाम् व्याकुलितं भूत्वा उत्कण्ठिता नायिका इव उत्तमवचनानि प्रकाशनं करोति स्म। एवञ्च सीतायाः अक्षत तथा विम्बफलमिव अधरद्वयोः क्षतम् कर्त्तुमर्थात् तस्याः अधरपानं कर्त्तुम् व्यतिव्यस्तः संजातः। अत्र श्रीरामः भवति आलम्बनविभावः ,वासकसज्जायुक्तं गृहं भवति उद्दीपनविभावः ,सीता भवति अनुभावः,सीतायाः अधरचुम्बनजनित श्रीरामस्यमनसि विद्यमानः औत्सुक्यता भवति व्यभिचारीभावः। अतः एतेषां त्रयाणां मिलनेन अत्र संभोगश्रृङ्गाररसस्य प्रतीतिर्भवति ।

**अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः-**

अस्मिन् महाकाव्ये श्रृङ्गाररसः अङ्गी अर्थात् मुख्यः भवति। अन्ये सर्वे रसाः अङ्गः(सहायकरसः)रुपेण तिष्ठन्ति।

**सहायकरसत्वेन करुणरसः-**

मर्यादा पुरुषोत्तमः श्रीराममस्य वनगमनात् परं राजा दशरथस्य अन्दमुनेः अभिशापः स्मरणं तथा परलोकगमनमर्थात् मृत्युवरणजन्य विषयः भवति करुणरसस्योदाहरणम्। तद्यथा –

**विभरित इह च क्षणेन राजा**
**प्रतिपदतः खलु पक्षवारयोगैः ।**
**व्युदित इव पुनः क्षयतिथिः सः**
**प्रकरणराशि परिक्रमेण मासः ।।**[12]

अर्थात् चान्द्रमासे प्रतिपदातिथिः, पक्षः, वासरः, योगः, करणन्तथा राशीनां सञ्चारः इव दशरथः वार्त्तालापं कुर्वतः सन् स्वरभङ्गः संजातः। मृत्युसमयस्य विविध लक्षणानि प्रकाशितानि। अयं समयः चान्द्रमासः इव प्रतीयते स्म। अर्थात् चन्द्रः यथा क्रमशः क्षीणं भूत्वा अथवा क्षयंप्राप्य अमावास्यायाः घनान्धकारे संपूर्णतया विलीनः भवति तथैव राजा दशरथोऽपि क्रमशः शिथिलं भूत्वा अनन्तरं मृत्युवरणं कृतवान्।

कस्यापि मृत्युवरणे शोकः दुःखञ्च भवति। शोकः स्थायीभाव रुपेण विद्यमानत्वादत्र करुणरसः इति ज्ञातव्यम्। एवं रुपेण अन्येषां रसानामपि सार्थकप्रयोगः अभवत्।

**सहायकरसत्वेन वीररसः-**

**व्यासीच्चैव प्रचण्ड प्रवरसुभटदोः खण्डितैरण्डदण्डम्**
**व्याप्त ब्रह्माण्डभाण्डं प्रलयसमयसंभूत जीमुतनादम्।**
**व्यागूढाकर्षणात्तत्समुपहसितवान् सोक्तवन्तो निलिम्पाः**
**वारेणैषा सुधाजीवयदिति वत नो मूर्च्छितप्रोत्थिता वै ।।**[13]

अर्थात् प्रकाण्डकाय मल्लहस्ताभ्यां उत्पाटन कारणात् भग्न वृक्षः यथा सहसा पतति तथैव गम्भीर गर्जनपूर्वकं शिवधनुः विखण्डितः अभवत्। धनुर्भग्नेन मेघस्य गम्भीरगर्जनादपि जायमानः भयंकरशब्देन पृथिवी प्रकम्पिता अभवत्। धनुभग्न शब्दं श्रुत्वा वलिरचिन्तयत् -शतवज्रस्य प्रहारमिव अस्य शब्दः चतुर्दिशं प्रकम्पितमकरोत्। अस्य भयंकर शब्देन पापीनः अपि चेतनाशून्यः अभवन्। तर्हि नराणाम् तथा किन्नराणामपि चेतनाशून्यता सामान्यविषयः एव। अत्र वीररसोऽस्ति।

**सहायकरसत्वेन रौद्ररसः-**

**वसुन्धरानिपातनं सुमन्यते रतोद्यमम्**
**विकृत्तनासिकाश्रुतिः सुदीर्घरावकारिणी।**
**विरुपिताथकेशरि प्रघातहस्तिनीव सा**
**विदारितोज्झिता पुनर्मृगीव चित्रकेन च।।**[14]

अर्थात् यदा लक्ष्मणः शूर्पणखायाः केशं धृतवान् तदा कर्णाटदेशस्य पुरुषाः रतिक्रीडाकाले स्त्रीणां केशं धृत्वा एव रतिक्रीडां कुर्वन्तीति शूर्पणखा चिन्तनं कृतवती। लक्ष्मणः यदा शूर्पणखां भूमौ निपातनं कृतवान् तदा सा रतिक्रीडां करिष्यतीति चिन्तितवती। सिंहः यथा हस्तिनः वध समये यता गर्जनं करोति तथैव लक्ष्मणः यदा शूर्पणखायाः नासाकर्णच्छेदनं कृतवान् तदा साऽपि चित्कारं कृतवती। अत्र लक्ष्मणस्य क्रोधपूर्ण कार्यत्वात् रौद्ररसः अस्ति।

**सहायकरसत्वेन वीभत्सरसः-**

**वीक्षाञ्चक्रेऽसावथ खलुपुरतो वीराधिवीरोऽसुरम्**
**बिभ्राणां शूलं ग्रथितमृगकिरं रक्तं लिहन्तं क्षरत् ।**
**व्याधञ्चालुब्धं किलबुधविवुधा स्निग्धं विराधाभिधम्**
**ब्राह्मांशुर्मध्ये किमुत मुखबिले विस्तारिते गाहन्ते।।**[15]

**अर्थः**-वीराधिवीरः प्रभु श्रीरामचन्द्रः किञ्चित् दूरं गमनात् परं दृष्टवान्- विराधराक्षसः एकं शूलं धृत्वा आगच्छति स्म । वराहहरिणादिपशुन् मारयित्वा तस्मिन् शूले एव संयोजनं कृत्वा स्वहस्ते धृत्वा आनयति स्म। तस्मात् अनवरतं रुधिरं प्रवहति। सः राक्षसः रक्तस्य लेहनं करोति। सः यदा स्वमुखमुन्मोचनं करोति तदा अन्धकारयुक्तगुहायाम् सूर्यकिरण प्रवेशं करोतीति प्रतीयते स्म।

अत्र रुधिरः भवति आलम्बनविभावः, राक्षसेन कृतं रक्तस्यावलेहनं भवति उद्दीपनविभावः, राक्षसेन कृतं मुखमुन्मोचनं भवति अनुभावः, मरणं भवति व्यभिचारीभावः। एतेषां त्रयाणां भावानां संयोजनेन जुगुप्सा नाम्ना स्थायीभावस्य उद्रेकं भवति। जुगुप्सा स्थायीभावत्वात् वीभत्सरसः प्रतीयते।

**सहायकरसत्वेन हास्यरसः-**

**बालाः स्यामायं यदि खलु विधिना कोदण्डधारी वरः**
**विश्वे को लाभोऽपि च भवति पदव्या विन्नया ब्रह्मणः।**
**वेशं वोढास्मः कथमिति च वयं विध्यानतो योषिताम्**
**वेपथ्वायुक्ताःपुलकितवपुषो वृक्षेषु चाधिश्रिताः।।**[16]

अर्थात् मुनयः अवदन्- विधाता अस्मान् नारीत्वेन परिवर्त्तनं करिष्यति एवं च रामः अस्माकं पतिः भविष्यति तर्हि ब्रह्मप्राप्तिर्किमर्थम्? वयमिदानीम् केन रुपेण नारीवेशं धारणं करिष्यामः। एवं विचारकाले तेषां शरीरम् पुलकितमभवत्। तेषां शरीरे कम्पनम् संजातः। अतः ताः सर्वाः वृक्षेषु अधिश्रिताः संजाताः।

अत्र मुनीनां नारीवेशधारणं भवत्यालम्बनविभावः। नारीवेशधारणजन्य विविधचेष्टाः भवन्ति उद्दीपनविभावाः। शरीरपुलकितम्,शरीरेजायमानम् कम्पनम् इत्यादयः भवन्ति अनुभावाः एवञ्च अवहित्था भवति व्यभिचारीभावः। विभावः-अनुभावस्तथा व्यभिचारीभावानां संयोगेन हास्यस्थायीभावस्य उत्पत्तित्वादत्र हास्यरसः भवति।

**सहायकरसत्वेन भयानकरसः-**

**वैचित्र्याच्चित्रं भवति खलु तृणाङ्कूरेण मेरुर्धृतः**
**वाहं वा हंस्या गतिमनु बधिरो वा मागधस्य स्तुतिम्।**
**व्याकल्य व्यग्रां सपदि बहुतरां तस्या गिरं सोदरौ**
**वालोष्वाकृष्यतिपरुषमवनौ संलोठयामासतुः।।**[17]

अर्थात् अत्र एका विचित्रघटना संघटिता अभवत्। कारणं तृणाङ्कुर इव विराध राक्षसः मेरुपर्वतः इव रामलक्ष्मणौ स्वस्कन्धे संस्थाप्य नेतुमग्रसररोऽभवत्। हंसी यथा घोटकस्यानुधावनं करोति माता सीता एतद्दृष्ट्वा तथैव राक्षसस्यानुधावनं कृतवती। वधिरस्य सम्मुखे स्तुतिपाठमिव माता सीताऽपि तस्य राक्षसस्य सम्मुखे विनयपूर्वकं प्रार्थनां कृतवती। सीतायाः क्रन्दनं श्रुत्वा रामलक्ष्मणावुभौ मिलित्वा राक्षसस्य केशं धृत्वा लम्फप्रदानपूर्वकं तं राक्षसं धराशायी कृतवन्तौ।

अत्र सीता भवति आश्रयस्थलम्। सीता राक्षसाद्बिभेत्यतः भयस्य कारणभूतः राक्षसः भवति आलम्बनविभावः। राक्षसस्य गमनजन्य विविधचेष्टा भवति उद्दीपनविभावः। सीतायाः राक्षसं प्रति प्रार्थनाकाले कातरता, गदगद् स्वरः इत्यादयः भवन्ति अनुभावाः। भयकारणात् सीतायाः मनसि जायमानः भयरुपी स्थायीभावः एव भयानकरसत्वेन परिणमते।

**नाटकसन्धयः-**

दशरुपककारः आचार्यधनञ्जयस्य मतानुसारं पञ्चसन्धयः भवन्ति। तद्यथा- मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, अवमर्शसन्धिः, निर्वहणसन्धिश्चेति ।

**मुखसन्धिः –**

**मुखंबीज समुत्पत्तिर्नानार्थरससम्भवाः।**
**अङ्गानि द्वादशैस्तस्य बीजारम्भः समन्वयात्।।**[18]

अर्थात् यत्र विविध प्रकारप्रयोजनानां तथा रसानामुत्पन्नकारी बीजोत्पत्तिरुपलभ्यते तत्र मुखसन्धिर्भवति। बीज नाम्ना अर्थप्रकृतिः तथाआरम्भः नाम्ना कार्यावस्थायाः सम्मिश्रणेन मुखसन्धेरुत्पत्तिर्भवति। अस्य द्वादशाङ्गानि भवन्ति। वैदेहीशविलास महाकाव्यस्य पूर्वविलासे मङ्गलपद्ये एव मुखसन्धिविषये ज्ञातुं शक्नुमः। तद्यथा-

**विभ्राजितो दीप्तकरौजसाऽञ्जसा**
**विभावरी सञ्चरमोद संहरः।**
**व्यावन्दितो मे सुमनोविपूजितः**
**विभुस्तमश्चक्र विनाशको हरिः।।**[19]

अर्थात् दीनबन्धुः सूर्यः जगतः अन्धकारं दूरीकरोति। सः भवति पद्मस्य सखा। तस्यानन्दं वर्धयति। चतुर्दिक्षु आलोकं वितरति। अनन्ताकाश भवति तस्य विहारस्थलम्। तस्य तेजसः प्रतापेन उलुकानां मनसि आनन्दः जायते। पण्डिताः तम् भक्तिपूत हृदयेन पूजां कुर्वन्ति। तस्य सम्मुखे अरुणः विद्यमानः अस्ति। सः

सकलशक्तेः कारणभूतः। पूर्णरुपेण वर्त्तुलाकारः। प्रतिदिनं सः पूर्वस्यां दिशि उदयः भवति। तं सूर्यमहं नमामि।

उपर्युक्त श्लोकेन ज्ञायते यत् -जगतः रावणरुप्यन्धकारं यः दूरीकरोति सः प्रभुः श्रीरामः। पद्मरुपी सुग्रीवस्य सखा एवं च वालेः बधं कृत्वा सुग्रीवस्यानन्दं वर्धयति। चतुर्दिक्षु ज्ञानालोकं वितरति। अनन्ताकाशरुपी वनसागरादयः भवन्ति तस्य विचरणस्थलम्। तस्य तेजसःप्रतापेनात्याचारिताथवा प्रपीडित जनानां मनसि आनन्दः जायते। इयमुक्तिः भवति भविष्यति काले जायमानानां विविधानाम् घटनानाम् मुख्यं बीजमथवा कारणम्। अत्र बीज नाम्ना अर्थप्रकृतिः तथा आरम्भनाम्ना कार्यावस्थायाः सम्मिश्रणेन मुखसन्धिरभवत्।

**प्रतिमुखसन्धिः-**

**लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत्।**

**बिन्दुप्रयत्नानुगमादङ्गान्यस्य त्रयोदशः।।**[20]

अर्थात् तस्य बीजस्य किञ्चित् दृश्य तथा किञ्चिददृश्य रुपेण प्रकाशनमेव प्रतिमुखसन्धिरित्युच्यते। सन्धेरस्याः निर्माणं बिन्दु नाम्ना अर्थप्रृकृतिः तथा प्रयत्ननाम्ना कार्यावस्थायाः मिलनेन भवति। सन्धेरस्याः त्रयोदश अङ्गानि सन्ति।

**उदाहरणम् -**

सीतास्वयंवर प्रसङ्गे सर्त्ताबली आसीत् यत् यः शिवधनुः भग्नं करिष्यति सः एव सीतायाः पाणिग्रहणम् करिष्यतीति। यदा सर्वे राजानः जनकस्य राजसभायां शिवधनुभग्ने स्व स्व असमर्थता ज्ञापितवन्तः तदा सीतास्वयंवररुपी सभायाम् लक्ष्यं किञ्चित् अलक्ष्यः संजातः एवञ्च पुनः यदा श्रीरामः गुरोः आदेशेन तत्रागत्य शिवधनोः भग्नं कृतवान् तदा पुनः लक्षमागतम्। एवंरूपेण किञ्चित् दृश्यत्वेन तथा किञ्चित् अदृश्यत्वेन स्थिते सति तत्र प्रतिमुखसन्धिः अभवत्।

**गर्भसन्धिः-**

**गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः।**

**द्वादशाङ्गः पताका स्यान्नवा स्यात्प्राप्तिसम्भवः।।**[21]

अर्थात् प्रथमे दृष्टः एवम् अनन्तरं विनष्टः, बीजस्य वारम्बारमन्वेषणमेव गर्भसन्धिरित्युच्यते। अत्र पताका नाम्ना अर्थप्रकृतिः भवतु अथवा न भवतु परन्तु प्राप्त्याशा नाम्ना कार्यावस्था अवश्यमेव भवेत्।

**उदाहरणम् -**रामस्य शिवधनुर्भग्रादनन्तरं तत्र परशुरामस्य समागमोऽभवत्। उभयोर्मध्ये युद्धं प्रारब्धम्। यदि युद्धं भविष्यति तर्हि सीतास्वयंवर कार्ये विघ्नः भविष्यतीति आशङ्कायामुद्विग्नः भूत्वा प्रभु श्रीरामः परशुरामस्य कृते क्षमायाचनां कृतवान्। परशुरामस्य क्रोधोऽपि प्रशमितोऽभवत्। अनेन प्रसङ्गेन गर्भसन्धेरवतरणमभवत्।

एवं रुपेण कविना पञ्चसन्धीनां सफलप्रयोगः कृतः।

**इतिहासोद्भवं वृत्तमन्यदासज्जनाश्रयम्-**

महाकाव्यस्य इतिवृत्तमितिहासप्रसिद्धं भवेत्। अथवा कस्यापि सज्जनः अर्थात् विशिष्टव्यक्तेर्गुणाश्रितं भवेत्। अस्माकं काव्यजगति यानि काव्यानाटकादिनी विरचितानि सन्ति तानि सर्वाणि चतुर्षु विभागेषु विभक्तुं शक्यते। तद्यथा –

क)रामायणमाश्रितम्

ख)महाभारतमाश्रितम्

ग)पुराणमाश्रितम्

घ)लोककथा अथवा कवेः कल्पनाधारितम्

तर्हि महाकाव्यस्यास्येतिवृत्तम् रामायणमाश्रितमस्तीति कारणादिदं प्रसिद्धं भवति।

**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् -**

धर्मार्थकाममोक्षरुपी चत्वारपुरुषार्थाः भवन्ति। अत्र श्रीरामस्य कर्त्तव्यः,प्रजापालनमित्यादीनां विषये वर्णितमस्तीति कारणादत्र धर्मविषये वर्णितमिति ज्ञायते।

**आदौनमस्क्रियाशीर्वा वस्तुनिर्देश एव वा –**

ग्रन्थस्य निर्विघ्न परिसमाप्ति निमित्तम् प्रत्येकस्य ग्रन्थस्यादौ मङ्गलाचरणं क्रियते। मङ्गलाचरणस्य प्रकारत्रयं विद्यते । तद्यथा-

क)आशीर्वादात्मकः

ख)नमस्कारात्मकः

ग)वस्तुनिर्देशात्मकः

यत्राशीर्वादं प्रदीयते तत्राशीर्वादात्मक मङ्गलपद्यं भवति। यत्र भगवतः नमस्कारः क्रियते तत्र नमस्कारात्मक मङ्गलपद्यं भवति। यत्र संपूर्ण ग्रन्थस्य विषयवस्तु एकस्मिन्नेव श्लोके प्रकाशितं भवति तत्र वस्तुनिर्देशात्मक मङ्गलपद्यं भवति।

**वैदेहीशविलास महाकाव्यस्य पूर्वविलासे मङ्गलपद्यम्-**

**विभ्राजित दीप्तकरौजसाऽञ्जसा**
**विभावरी सञ्चर मोदसंहरः।**
**व्यावन्दितो मे सुमनोविपुजितः**
**विभुस्तमश्चक्र विनाशको हरिः।।**[22]

अस्यार्थःभवति -दीनबन्धुः भगवान् विष्णुः राहुम् चक्रेण खण्डनं कृतवान्। लक्ष्म्याः आनन्दवर्धकः ,अनन्तशयना, राक्षसाणामहांरविनाशकारी,सर्वदेवपूज्यः, यस्य सम्मुखे अरुणः अथवा गरुडः सर्वदा विराजमानः, यः सर्वदा विष्णुभक्तेभ्यः आनन्दं प्रददाति सः भगवान् विष्णुः समग्रेऽस्मिन् मण्डले नृसिंहरुपेण क्रीडां करोति। भवसागरात् तर्त्तुम् सः नावसदृशः; सः सौन्दर्यपूर्णः नीलकन्दरेऽवस्थानं करोति; अहं तस्य वन्दना करोमि। अत्र नमस्कारात्मक मङ्गलपद्यमस्ति।

**क्वचिन्निन्दाखलादीनां सतां च गुणकीर्त्तनम् –**

दुर्जननिन्दा तथा सज्जनप्रशंसाऽपि महाकाव्यस्यैकः प्रमुखविषयः भवति। तद्यथा –

**ब्रूते सा यातुधान ह्यपसर विचिरं मास्तु ते मुण्डखण्डम्**
**व्याचक्ष्व त्वं महत्त्वं न निजमसि वृषो वञ्चकोऽलिर्विरुपः।**
**वीरेभारातिभार्या हृतिकृति सुरुचिः सम्भवा किं कदा वा**
**वीरादाहैष धन्यःकिमिति तव धवो भूयतेश्चानरण्यात्।।**[23]

अर्थात् रावणस्य वार्त्तां श्रुत्वा माता सीताऽवदत्- भो मूढ! तवशिरच्छेदनात् पूर्वमितः गच्छतु। त्वं मुषिकः,भ्रमरः,विकलाङ्गः (खञ्जः)एवञ्च नीचपशुमिवाचरति। अर्थात् मृत्तिकां प्रति मुषिकाः आसक्ताः भवन्ति ,कर्कटस्यानेकेभूजाः सन्ति ,भ्रमरस्य वहव्यः पत्नयः सन्ति। कारणं सः वहुनां पुष्पाणामुपरि उषित्वा मधुसंग्रहं करोति। पुनः दशसंख्यकानि शिरांसि सन्ति सः विकलाङ्गः इव प्रतीयते। पुनः श्रृगालः भवति दीर्घायुः। श्रृगालः भूत्वाऽपि त्वं वीरसिंहसदृश श्रीरामस्य पत्न्याः हरणं कर्त्तुमिच्छसि। इदं सर्वथा असम्भवमेव भवति।

रावणः खल तथा नीचप्रकृतियुक्तः भवति; अतः अत्र मातासीतया तस्य निन्दाकृता वर्त्तते । मध्ये मध्ये ऋषीणां तथा महात्मनां गुणकीर्त्तनमपि कृतवान्।

**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः –**

प्रत्येकसर्गः एकस्मिन्नेव वृत्ते रचितम् भवेत्। परन्तु तस्यैव सर्गस्यान्तिमे श्लोके छन्दसः परिवर्त्तनं भवेत् । उदाहरण माध्यमेन ज्ञातुं शक्नुमः। द्वितीयसर्गे 51 संख्यकाः श्लोकाः सन्ति। प्रथमश्लोकादारभ्य पञ्चाशत्तम श्लोकं यावत् सर्वाः श्लोकाः उपगीति छन्दसा विरचितम्। परन्तु अन्तिमे अर्थात् 51 तमे श्लोके छन्दसः परिवर्त्तनमभवत्। 51 तमे श्लोके विपिनतिलकं नाम्ना छन्दसः प्रयोगोऽभवत्।

**नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह -**

| सर्गः | श्लोकसंख्या | सर्गः | श्लोकसंख्या |
|---|---|---|---|
| 1 | 67 | 14 | 32 |
| 2 | 51 | 15 | 33 |
| 3 | 62 | 16 | 41 |
| 4 | 46 | 17 | 54 |
| 5 | 64 | 18 | 54 |
| 6 | 52 | 19 | 71 |
| 7 | 62 | 20 | 24 |
| 8 | 32 | 21 | 34 |
| 9 | 44 | 22 | 41 |
| 10 | 25 | 23 | 69 |
| 11 | 23 | 24 | 56 |
| 12 | 39 | 25 | 64 |
| 13 | 39 | 26 | 62 |

अस्मात् ज्ञायते यत् प्रत्येकस्मिन् अत्यधिकसंख्यकाः श्लोकाः न सन्त्यथवा न्यूनपरिमाण श्लोकाः अपि न सन्ति। एवञ्च अष्टाधिक सर्गः इति वचनानुसारमत्र षड्विंशति संख्यकाः सर्गाः विलसन्ति।

**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते –**

महाकाव्ये एतादृशः अपि केचन सर्गाः स्युः यत्र वहूनां छन्दसां प्रयोगः स्यात् । यथा- वैदेहीशविलास महाकाव्यस्य पूर्वविलासस्योनविंशतितम सर्गः। अस्मिन् सर्गे वहूनां छन्दसां प्रयोगः दृश्यते। तत्रोनविंशसर्गस्य

| श्लोकसंख्या | छन्दः | श्लोकसंख्या | छन्दः |
|---|---|---|---|
| 1 | उपजातिवृत्तम्(मदनललिता+चित्रा) | 42 | मन्दाक्रान्तावृत्तम् |
| 2 | पञ्चचामरम् वृत्तम् | 43 | मालिनीवृत्तम् |
| 3 | उपजातिवृत्तम् (श्येनी+चञ्चरिकावल्ली) स्रग्धरावृत्तम् | 45 | स्रग्धरावृत्तम् |
| 5 | आर्यावृत्तम् | 46 | पणववृत्तम् |
| 9 | उपगीतिवृत्तम् | 65 | गजगतिःवृत्तम् |
| 29 | उद्गीति वृत्तम् | 66 | प्रामाणिकावृत्तम् |
| 32 | गीतिवृत्तम् | 68 | इन्द्रवज्रावृत्तम् |
| 34 | आर्यागीतिवृत्तम् | 69 | त्वरितगतिवृत्तम् |
| 38 | वसन्ततिलकम् वृत्तम् | 71 | स्रग्विणीवृत्तम् |

**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् -**

अर्थात् प्रत्येकस्य सर्गस्यान्तिमे श्लोके अथवा श्लोकद्वये परवर्त्तीसर्गस्य कथावस्तुनः सूचनाप्रदानम्। द्वितीयसर्गस्यान्तिमे श्लोके तृतीयसर्गे वर्णितानां कथावस्तूनां सूचनां विद्यते।

द्वितीयसर्गस्यान्तिमेश्लोके यथा-

**वसतौ च विचारयताऽविरतं किमपि भविकाशंसि ।**
**वीक्षितममुना स्वप्नं व्यवस्थितेन ह्यथ सुमनसा ।।**[24]

अर्थात् प्रतिदिनं सः विषयः राज्ञः दशरथस्य मनसि आगच्छति । प्रतिदिनं क्रमशः सा चिन्तारुप्यन्धकारः दूरीभूतमभवत्। परवर्त्तीसर्गे सीतायाः आविर्भावः विषये सूचना प्रदत्ताऽस्ति एवञ्च सीतायाः आविर्भावः विषये वर्णितमस्ति।

**सन्ध्या सूर्येन्दुरजनी प्रदोषध्वान्तवासराः।**
**प्रातर्मध्याह्नमृगया शैलर्त्तुवनसागराः।।**

महाकाव्ये क्वचित् सन्ध्या, सूर्योदयः, रात्रि, मध्याह्न, प्रभातेत्यादीनां कालानां वर्णनेन सह पर्वताः, ऋतुः, वनम्, सागरः इत्यादीनामपि वर्णनं भवेत्।

**नदी तथा सागरवर्णनम्-**

नर्मदानदी विषये वर्णितमस्ति –

**व्यस्नाद् भूयो हंसवदति विमलेऽसौ नर्मदासङ्गतः**
**वेगं हंसोत्पत्ति-पयसि सुखदां तां नर्मदां सङ्गतः।**
**वाह्लादानाद्धि प्लवनसुखविन्दद् बाहुदाप्राणदे**
**वारे वासौ प्राचरदथ चलनं रेवां प्रति प्रोत्सुकः।।**[25]

अर्थात् लीलाप्रदायिनी माता सीतया सह श्रीरामः नर्मदा नद्यां विहारं कृतवान्। बाहुनद्याः अतिक्रमणकाले श्रीरामचन्द्रः बाहुदानं कृतवान्। अर्थात् स्वप्रेयसीसीतायाः वाहुयुगलं स्वहस्ताभ्यां धृत्वा तां नद्याः अतिक्रमणे साहाय्यं कृतवान्। पुनः हंस-हंसी यथा नद्यां क्रीडां कुर्वतः तथैव यमुनानद्यां हंस-हंसी इव विहारं कृत्वा रेवानदीं प्रति स्नानार्थं गतवती। अत्र नदीविषये वर्णितमस्ति।

**प्रभात तथा सन्ध्यावर्णनम् –**

**सन्ध्यावर्णनम्-**

**बाली प्रकाली पटशाटवेष्टिता यम्याश्रिता किं वहते सरस्वती ।**
**वार्युद्भवारेः परिभासितः कर स्तीर्थे त्रिवेण्या विरटन्ति वारुणीम् ।।**[26]

अर्थात् यदा अन्धकारोऽभवत् तदा सन्ध्यारुपी रमणी अन्धकाररुपी कृष्णवर्णविशिष्टा शाटिका परिधआनं कृतवतीति प्रतीयते। सरस्वतीनदी यमुनानद्या सह एकाधारेण प्रवाहिता जाता। चन्द्रे उदिते तस्य रक्तवर्णविशिष्टाः किरणाः सन्ध्याकालीनशोभया सह एकीभूयः रमणीयतायाः चरमोत्कर्षतां प्राप्तवती। त्रिवेणीस्थले वारुणी स्नानयोगमिव तत् दृश्यं प्रतीयते स्म। एवं रुपेण कविना सन्ध्याकालस्य रमणीया वर्णना कृता।

**प्रभातवर्णनम्-**

वैदेहीशविलासस्य पूर्वविलासे स्थाना स्थाने प्रभातवर्णनस्य रमणीयता दृश्यते । महाकवि माघस्य काव्ये प्रभातस्य सुन्दरवर्णनं विद्यते। तद्यथा-

**कुमुदवनमपाश्रि श्रीमदम्भोजषण्डं**
**त्यजति मुदमुलुकः प्रीतिमांश्चक्रवाकः।**
**उदयकहिमराशिमर्याति शीतांसुरस्तं**
**हतविधिलसितानां हि विचित्रो विपाकः।।**[27]

अर्थात् प्रभातस्यागमने कुमुदवनमिदानीं श्रीहीनः संजातम्। कमलसमुहः शोभामयः दृश्यते। शनैःशनैः उलुकस्यानन्दः समाप्तिर्जायते। परन्तु चक्रवाकः स्व प्रियायाः समागमः समयः आगतः इति कारणात् प्रसन्नमनः संजातः। सूर्यस्योदयः तथा चन्द्रस्य अस्ताचलं प्रति गमनमेकस्मिन्नेव काले भवति। विधातुः चेष्टानां विचित्रपरिणामः भवत्ययं विचित्र विषयः। एवं रुपेण महाकवि माघेन प्रभातालस्य वर्णनं कृतवान्। वैदेहीशविलास महाकाव्यस्य पूर्वविलासेऽप्येताद्दशं वर्णनं दृश्यते। तद्यथा-

**वत्सान्विता गाः कृमिकोषजानि वै रत्नानि शङ्खेन च शङ्खमेव कम्।**
**बाढं प्रफुल्लः प्रददौ नरेश्वरो वीता विनोदैर्विजनेऽथ शर्वरी।।**[28]

अर्थात् तदा राज्ञः दशरथस्य निद्राभङ्गः संजातः। जामातां रथे उपावेश्य आनीतवान्। किञ्चित् कालादनन्तरमयोध्यानगर्यां प्रवेशं कृतवान्। होमकुण्डतः अग्निः प्रज्वलितं भूत्वा गगने मेघः इव प्रतीयते स्म। एवं रुपेण कविना प्रभात वर्णनं कृतमस्मिन्काव्ये।

**वनवर्णनम्-**

वनवर्णनम् कर्त्तुमाह-

**वृक्षवीथी वसत्यत्र व्रतिपंक्तिः समाकृतिः।**
**वल्कलानां पिधानैश्च विजटाभिर्विराजिता।।**[29]

अर्थात् विश्वामित्रः ,रामःतथा लक्ष्मणः सिद्धवनमपश्यन्। तत्रस्थ ऋषयः तथा वृक्षाः एकमिव प्रतीयन्ते स्म। कारणम् तावुभौ वल्कलैस्तथा जटाभिराच्छादितावास्ताम्। पुनः वर्णयति –

**वेदी सारसमूला सा सुमनोफलदा सदा।**
**वृतपत्र चयावासा विहृद्या च ह्यतिस्थिरा।।**[30]

अर्थात् वृक्षसमूहस्याधोभागे विशालकायाविशिष्टानां वेदीनां निर्माणमभवत्। वृक्षाः सर्वदा मुनिभ्यस्तथा वनवासीभ्यः पुष्पफले प्रदाय स्व स्व स्थाने स्थिररुपेण तिष्ठन्ति एवञ्च तस्य वनस्य शोभावर्धनं कुर्वन्ति।

एवं रुपेण वनस्याथवा सिद्धवनस्य सम्यक्तया वर्णनं कृतं महाकविना पण्डित श्री भागवत प्रसाद दासशर्मणा।

**सम्भोग विप्रलम्भौ च मुनिस्वर्गपुराध्वराः-**

मध्ये मध्ये केषुचित् स्थानेषु सम्भोग विप्रलम्भादीनां वर्णनं भवेत्। मुनीनामपि वर्णनं भवेत्। अस्योदाहरणम् यथा-

**सम्भोगस्योदाहरणम्-**

**वरयितृ मरुता बलाद्धृताङ्के**
**विलसति सुप्रभया यथैव दुर्गा ।**
**विनयसुवचनैस्त्रपावतीयं**
**व्यभजत साप्यथ धीरतां सुधीरा ।।**[31]

अर्थात् विवाहानन्तरं मधुशय्यागृहे स्वयं पर्यङ्के उपविश्य वलपूर्वकं सीतां नीत्वा स्वस्याङ्के उपाविष्टवान्। अतः भगवतः शिवस्याङ्के माता दुर्गा उपविश्य यथा सुशोभते तथैव प्रभु श्रीरामस्याङ्के माता सीताऽपि सुशोभते स्म। सीता स्वभावतः लज्जाशीला। अतः एवं करणे सति सीता नारीसुलभ लज्जां नैव त्यक्तवती। श्रीरामः यदा विनयवाक्येन सीतां वोधयामास तदा सीता स्थिरा तथा आश्वस्ताऽभवत्। अत्र सम्भोगश्रृङ्गाररसोऽस्तीति प्रतीयते।

**विप्रलम्भस्योदाहरणम्-**

**व्युवाच योच्चैः स्मरकातरस्तरः बहुनि विच्छिन्नमनाः क्व वा मनाक्।**
**विदेहभूमीश्वर देहजे प्रिये वराङ्गि विच्छिन्नवती ह्यसावतिः।।**[32]

अर्थात् सीतायाः विरहे रामचन्द्रस्य मनः वहुदुःखितोऽभवत् । सः उच्चस्वरेण कथितवान् -हे वैदेही ! हे सीते! किञ्चिदपि दुःखितं नैव भूत्वा मद्दुरं गतवती।

अस्मिन् श्लोके सीतायाः विरहेण श्रीरामस्य गभीरदुःखः प्रकटितोजातः इति कारणादत्र विप्रलम्भश्रृङ्गाररसः ध्वन्यते। पुनः अस्य महाकाव्यस्य विविधेषु स्थानेषु मुनीनां वर्णनमस्ति । ते मुनयः यथा - विश्वामित्रः,वशिष्ठः,ऋष्यश्रृङ्गः इत्यादयः।

**रणप्रयाणोपयम मन्त्रपुत्रोदयादयः-**

युद्धं,प्रयाणं,पुत्रजन्मः इत्यादीनां विषयेऽपि तत्र वर्णितं भवेत्।

**युद्धवर्णनम्-**

महाकाव्यस्यास्य स्थाने स्थाने युद्धवर्णनमपि दृश्यते। तद्यथा-

**विंशद्वाहु रथे तां विलपतनिरतां वीक्ष्य विस्तार्य चञ्चुम्**
**विन्यस्तः केनवेदो मधुपकर इति प्रागिलद्धावमानः।**
**वान्त्वा भूयश्च जल्पन् स खरनखर चञ्चाव्यदारीतदङ्गम्**
**वार्धिं जीर्णो यथाभूद् घटभवजठरे भूजया त्वन्तुमुक्तः।।**[33]

अर्थात् सीतायाः करुणक्रन्दनं श्रुत्वा मद्यपस्य हस्ते पवित्रं वेदम् कः दत्तवान्निति विचिन्त्य जटायुः सहसा धावनमकरोत्। सः स्वचञ्चु तथा पक्षविस्तारं कृत्वा समग्ररथमाच्छादनं कृतवान्। अगस्त्यमुनेरुदरे समग्रसमुद्रः यथा जीर्णमभवत् तथैव त्वमपीदानीं जीर्णमभविष्यत्। परन्तु मातासीतायाः कृपादृष्टि कारणात् त्वम् सुरक्षितः।

अत्र रावण-जटायोर्मध्ये युद्धं वर्णितमस्ति।

**पुत्रोदयः-**

पुत्रोदयः इत्युक्ते पुत्रजन्मः ।

**व्यालम्बमानं परिदर्शनोचितं**
**नालं विभातं वरनाभिमण्डले।**
**विश्वे हि चाम्भोरुहनाभनाम**
**वै वद्मीति सम्प्रति सार्थकीकृतम्।।**[34]

From the above study of Aditi or the Atharvaveda one may come to the conclusion that she has come closer to the worshipper in this veda. In the Rigveda she makes the worshippers free from sin and she is boundlessness, while in the Atharvaveda she has begun to take part in their magical rites and domestic ceremonies preserving the Rigvedic characteristics. During these ceremonial rites she ties the amulets, takes part in the Godana ceremony; and holds the winnowing basket of Godana. In the Rigveda, Aditi is more an abstract deity. In the Yayurveda she presents the concepts of Earth. In the Atharvaveda she combines both the former vedic concepts and is more active where she shares the activities of the worshipper and alio preserves her abstract character. Thus the Aditi of Atharvaveda possesses the characteristics of all the three vedas.

**'Aditi' and the Goddess of Avesta**

Prof. Przyluski has forwarded a theory in which he finds a proto-type for Aditi in the Great Goddess Anahita[24]. He makes an attempt to establish his theory on the basis of not very sound and convincing arguments.

Firstly, Prof. Przyluski thinks that as the goddess Anahita in the Avesta is pictured as bearing a bundle of rods, in the same way Aditi in the Atharvaveda is given the epithet Madhukasa 'She whose whip is honey'. Even in Rome and Greece, the flagellation[25] formed part of the ritual of the Great goddess. The ingenuity of this comparison will be proved by the fact that Aditi has never been connected with Madhukasa. The hymn (A.V. ix.1.) in which the above author finds it is regarded the one as glorifying the honey-whip itself. If we examine closely, it is the Asvins and not Aditi, who are connected with Madhu[26]. Oldenberg and Keith[27] believe that this

Mdhu is the dew, the phenomenon with which these deities (Asvins) are most easily connected.

Secondly he believes that Asvins and Aditi are the deities of the same nature. Prof Przyluski establishes his theory on two assertions. First the Asvins are attendants on the Goddess-Mother in the vedas. Secondly, they are sometimes anthropomorphic deities riding on a chariot. They are also sometimes associated with other animals. In Rigveda I.118 falcons bear the car of Asvins. Similar is the case of the great goddess Anahita.

This view has no sound basis because it is only in a few places where we find Aditi and Asvins brought together, but in these places their nature is not the same. Finally Prof. Przyluski attempts to show that as in Syria the Great Goddess was transformed into the sun similarly in the vedic religion Aditi figured as sun. In this connection A.B. Keith remarks that it is unnecessary to discuss the Syrian evidence but it is important to note that, as adduced, it can hardly be said to represent the fusion of the goddess and the sun. Rather the development seems to be one in which the sun supersedes the goddess who earlier appears as supporting the solar disk. In veda, however, we have only the connection of Surya and the Asvins, who appear earlier as her husbands, later (Rv. X.85) no doubt to meet more sophisticated states, as groomsmen at the wedlock of Soma to Surya. There is no question in vedic literature of any primacy of Surya over the Asvins, whose willing consort she is[28].

Thus we conclude that in the concept of Great Goddess and her animal attendants later on anthropomorphized, we do not find the assimilation of vedic Aditi and the Asvins. At the same time we also disagree with the identification of Surya and Aditi.

The above author also gives various names for Aditi as the Great Goddess, She is known as Anaitis, Anahita or Anahid in Iran and as Anat in Palestine. In Syria and Asia minor she is Nani, Nana or Tanais. The words Tanai or Nanai may have passed through semitic to the vedic language with philosophical changes. The 't' of the word Anaitis has been changed into 'd' of the word 'Aditi' and the nasal has been dropped. The diphthong has been reduced to [29].

The study of the above view will show that the arguments for non-Aryan origin of the word Aditi are not convincing and Aryan etymology for Aditi seems more plausible.

***References:***

1. Atharvaveda Samhita,vii.6.2 .
2. Ibid,vi.4.1.
3. Ibid,v.1.9;3.16-2.
4. Ibid,xii.1.61.
5. Ibid,viii.9.21;xi.1.11.
6. Ibid,vi.120.2.
7. Ibid,vii.7.2.
8. Ibid,xi.1.1 cf. Ts. Vi.5.6; Ms. 1.6.12.
9. Ibid,vii.6.3.
10. Ibid,xix.l0.9.
11. Ibid
12. Ibid,vii.18.3.
13. Ibid, ii.28.4-5.
14. Ibid, vii.6.1 cf. Rv. i.89.10.
15. Ibid, vi.68.2.
16. Ibid, Muir, original Sanskrit Texts, Vol. iv, p. 15.
17. Atharvaveda Samhita, vi.81.3.
18. Ibid, iii.22.1.
19. Ibid, xii.3.11.
20. Ibid, xii.1.2.37.

21. Ibid, xi.1.24.
22. Ibid.
23. Ibid, xi.3.2.
24. Prof. Przyluski, The Asvins and the Great Goddess, Harward Journal of Asiatic Studies, i. pp. 129-135.
25. According to A.B. Keith Flagellation is a well-known rite to renew the life of creatures to augment their vigour and to stimulate their powers of reproduction. Religion and Philosophy of the Veda, ii.pp.342.
26. Oldenberg, Religion des veda, p. 209.
27. A.B. Keith, the Asvins and the Great Goddess, Indian Culture, No. 4 pp. 721-726.
28. Ibid
29. Prof. Przyluski, Indian Historical quarterly, x. pp. 411-414

# MUSIC AND DANCE IN KĀḶIDĀSA

**Dr. Jayanisha K.**

Associate Professor

Dept. of Sanskrit

Sree Keralavarma College, Thrissur

**Abstract**

A poet should have profound scholarship in different subjects included in art and culture. The great classical Sanskrit writer Kalidasa is a best example of this nature. Kalidasa adorned the court of Gupta kings. Kalidasa has made several references about music and dance in his works.

**Keywords**

Kalidasa, Raga, Vikramorvasiya, Raghuvamsa, Meghdutam, Abhijnanasakuntala, Malavika.

According to tradition there is nothing in this world that a poet can devoid of. He should have a sound knowledge about mortal and immortal things and also strong vocabulary to express these things without cessation of sentiment. That is why it is stated -

*न स शब्दो न तद्वाच्यं न सा विद्या न सा कला ।*

*जायेत यत्र काव्याङ्गमहो भारो महान् कवेः ।।*

In the case of Kāḷidāsa this saying is truth as the scholarship of Kāḷidāsa can be studied based on the Alaṅkāras, religion, philosophy, metre, grammar etc. Here an attempt is made to find out the musical and dance references made by Kāḷidāsa in his works *Raghuvamśa*, *Kumārasambhava*, *Vikramorvaśīya*, *Māḷavikāgnimitra*, *Abhijñānaśākuntaḷa*, *Meghadūta* and *Ṛtusamhāra*.

In old days the palaces of Kings were always adorned with the performance of music and dance. It is not accidental that Kāḷidāsa being or may be a court poet, who has written poems and dramas related to Kings and divine personalities included music and dance in his works.

**Vocal and Instrumental Music**

In the case of Music two types of performance are seen noted in these works. They are vocal and instrumental music.

It seems that Kāḷidāsa had a profound knowledge in music and has a good music ear. He seems to be a master in several Rāgas. In *Kumārasambhava* he says that áiva was awakened by the Kinnaras, who sang the Kaiśika Rāga by means of several Mūrcchanās[1]. Names of three other Rāgas namely – Bhinnaka, Valantikā and Kakubha occur in the fourth act of *Vikramorvaśīya*[2].

Serial practicing of Music and the formalities essential for a musician are also well discussed here and there in his works. In *Kumārasambhava* Canto I he says – 'List ! breathing from each cave, Himālaya leads

The glorious hymn with his whispering reeds,

Till the heavenly minstrels raise their voice in song

And swell his music as it floats along.' [3]

So according to him an instrument is necessary for a poet to base upon his song.

The accompaniments of the flute is also suggested while he says – 'he heard his own lofty glory, loudly caroled from the bowers by the sylvan nymphs, in a manner in which the purpose of the accompaniment of the music of flutes was served by singing bamboos, having their holes filled with wind.' [4]

In *Abhijñānaśākuntaḷa* he says through Vidūṣka – 'O friend, direct your attention to the interior of the music hall. Mingled notes of sweet, clear songs are heard. Methinks her ladyship Hamsapadikā is practicing singing (cultivating acquaintance with the musical notes.'[5] Here Kāḷidāsa uses the word ***वर्णपरिचयं करोति*** which means how a musician has to practice the notes such as - ***स-रि-ग-म-प-ध-नि-स, स-नि-ध-प-म-ग-रि-स, सस-रिरि-गग-मम-पप-धध-निनि-सस*** etc.

According to Kāḷidāsa a musician should sing the notes of the Rāga firstly, to which, the proposed song is set. That is why he says – 'After doing Upag¡na she sings the composition consisting of four lines.[6] Here the Upag¡na means an

accompanying song. This peculiar sound followed by Vasantar¡ga etc. is known as Ālāpācārī and is sung before the song[7].

After Upagāna the singing of the Vastu is mentioned. The word Vastu means a peculiar type of composition. These Vastus are actually more or less independent colloquial pieces of songs composed or used in dramas. There are two Vastūs in *Abhijñānaśākuntaḷa*, one in *Māḷavikāgnimitra* and thirtyone in the fourth act of *Vikramorvaśīya*. So, there are such thirtyfour Vastus in Kāḷidāsa's dramas. These are written in early Apabhramśa and Mahārāṣtrī languages[8]. Whether these can be considered as original ones or not is not discussed here. But from the music point of view these ancient original songs are really valuable for supplying Anyokti type of verses that has a musical tenor.

The completion of the concert with all its components is well described in Meghad£ta as – 'Certainly the concert of áiva will be in a state of completeness because the reeds sound sweetly filled with winds. The victory over Tripura will be sung by the inspired Kinnaris and your rolling thunder like a drum sounds in the caverns.' [9] Here it is indicated that a musician must have a Muraja or some other kind of drum for keeping time and a stringed or wind instrument as accompaniment.

From these references it is seen that the practice of musicians learning the first seven notes and their several combinations in ascent and descent is reflected in Kāḷidāsa. Singing notes of a mode and then the song set to that mode seems to be centuries old as the same seen in Kāḷidāsa. As now at that time also the concerts require instruments like flute, stringed instruments, tabor etc.

In the case of instrumental music Kāḷidāsa seems to be well conversant especially with many drum instruments. He gives the name Muraja, Mardaḷa, Mṛdaṅga, Aṅkya, Āliṅgya, Ūrdvaka, etc. in his works[10].

Tāla or keeping time also seems to be familiar to Kāḷidāsa. In *Raghuvamśa* he describes that Agnivarṇa by his skillful beats in Puṣkara, inspired the dancing girls with shame who erred in their regular gesticulations even though the dance masters standing by their side[11]. In *Meghadūta* it is stated that the Peacock with Yakṣa's wife's hand clapping, where her two bracelets sweetly tinkle, is made to dance. [12]

According to Kāḷidāsa the cries of the peacocks are of the same pich as the âa·ja the first note of musical scale[13].

The Vīṇa, or Indian lute is very familiar to Kāḷidāsa. In *Raghuvamśa*, when Aja places the dead body of his beloved wife on his lap, the simile of poet is that of a lute. He says – 'The king, who was exceedingly devoted to his wife, having held her up, whose condition on account of the lose of life, resembled that of lute which is to be stringed, placed her to his lap which she was familiar. [14] It is notable that Kāḷidāsa, an unrivalled master of similes here put the lute which strings have been broken. It brings the idea that though dead, the charmness of the body of Indumatī, wife of Aja, is not lost, like a lute which has no sound because of broken strings but no fault in seeing. Like ones life the sound of the instrument is its soul. In another place he shows the special care taken by musicians in wiping out the wet strings of their lutes as he says - 'O dear one having placed the Vīṇa on her dirtily-clothed thigh wishing to sing a song consisting of wellarranged words concerning my family, having somehow or other caused the strings wet with tears to vibrate, again and again forgetting the musical airs, though even composed by herself.'[15] In *Meghadūta* we come across the lute bearing pair of Siddhas, from fear of rain drops, avoiding the path of the cloud. [16] While describing the sweetness of Pārvtī's voice he put forward the sound of the cuckoo to the harsh and disagreeable sound of a lute which are loosened[17].

## DANCING

Kāḷidāsa's knowledge about Nṛtta and Nāṭya is sound. It is evident through *Māḷavikāgnimitra* itself. Kāḷidāsa mentions the positions of Māḷavikā in the course of and after her dance using several technical terms. As mentioned earlier, Kāḷidāsa uses many technical terms relating to the Prākṛta songs, their rhythm and also the dancing and stage arrangements connected with them. The names – *प्रावेशिकी, आक्षिप्तिका, द्विपदी, जम्भलिका, खण्डधारा, चर्चरी, खण्डक, खुरक, पाट, वामक, कुटिलिका, मल्लखट्टी, अर्धद्विचतुरस्त्रक, चतुरस्त्रक, कुलिमा, मन्दघटी, स्थानक, गलितक* are some among them. *Raghuvamśa*, *Kumārasambhava* and *Meghadūta* contain fine descriptions of dancing. He even mentions the name of Bharata the author of *Nāṭyaśāstra.* [18]

The origin of Nāṭya is mentioned by Kāḷidāsa in the first act of *Māḷavikāgnimitra* as – 'Sages regard this lovely eye sacrifice to Gods, being exhibited or divided in two different ways by Śiva in his body which is blended with that of Umā. Here in it is seen the whole conduct of the world which arises from the three prime qualities and marked out by various sentiments. Scenic-art is the chief amusement of men of diversely varied tastes.' [19]

The beauty of a dancer or how a dancer must look like, is well marked in the way of describing Māḷavikā– 'Her face has got long eyes and has the splendour of the autumnal moon, her arms are gracefully curved at the shoulders, her chest is compact, having swelling breasts, her sides are as it were planed off, her waist may be spanned by the hand, her hips slope elegantly, her feet have crooked toes, her body as graceful as the idle in the mind of the teacher of dancing.' [20]

The description of the dancer representing the sentiments expressed by the song, physically is also noteworthy. He describes it thus – 'All was blameless, and in accordance with the rules of art: for the meaning was completely expressed by her limbs which were full of language, the movement of her feet was in perfect time, she exactly represented the sentiments; the acting was gentle, being based upon the measure of dance; in the successive developments of the acting, emotion kept banishing other emotion from its place; it was a vivid picture of series of passions.'[21]

The standing posture of a dancer is also seen there - 'Far attractive than her dancing posture is her standing posture, in which she is placing on her hip her left hand, the bracelet of which cling motionless at her wrist, and making her other hand hang down loosely like the branch of a Śyāmā tree, and casting down her eye on the inlaid pavement on which she is pushing abond a flower with her toe, an attitude in which the upper part of her body is upright.' [22]

From these references it is clear that in the royal palaces and the houses of rich there were dancing rooms for the study of music and dance. Eminent teachers like Guṇadāsa and Haradatta were there to propagate art. If a girl is beautiful and expert in dance the king will make her as his consort like that of the case of Māḷavikā. Small girls from different part of the country, if they are found interested in music and dance are brought to these schools. It is also evident in the case of Māḷavikā. She was the sister of King Mādhavasena of Vidarbha. Vīrasena brother of Varṇāvara who was

in charge of the fort at the banks of Narmada sent Māḷavikā to her sister Dhāriṇī that she was suitable for studying art[23]. The artists of that time seems to be honoured as the two female servants of Māḷavikā enter the chamber of the King [24]–

Chamberlain - The minister sends word by me that two maidens accomplished in craft…..

King – Introduce them… Ladies, to what accomplishment do you devote yourselves?

The two - We are well versed in music.

King – Queen, take one of these ladies.

Queen - Māḷavikā, Look this way! Whom would you like to have to accompany you in singing? etc….

So at the chamber of Agnimitra not only musicians but also artists of different art forms were honoured. The princesses and queens of that period were well versed in music, dance and other art forms. It was the social condition of that time as *Kāmasūtra* remarks – 'the courtezans, princesses and daughters of ministers had attained great insight in Śāstras and art forms.'[25] From the abovementioned examples it is clear that Kāḷidāsa's had a sound knowledge in art forms and had great love admiration towards artists.

## Footnote

1. स व्यबुध्यत बुधस्तवोचितः शातकुंभकमलाकरैः समम् ।
मूर्च्छनापरिगृहीतकैशिकैः किन्नरैरुषसि गीतमङ्गळः ।। Kumārasambhava, VIII, 85

2. पाटस्यान्ते भिन्नकः।
एतदेव नर्तयित्वा वलन्तिकयोपसृत्य जानुभ्या स्थित्वा।
इति ककुभेन षडुपभङ्गाः।

3. (यः पूरयन् कीचकरन्ध्रभागान् दरी मुखोत्थेन समीरणेन । उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम्।।) Ralph T. H. Griffith, The Birth of The War God, p. 2

4. स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् । शुश्राव कुजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ।। Moreshwar Ramachandra Kale (Ed), The Raghuvaṃśa of Kalidāsa, II, 12

5. विदूषकः भो वयस्य, संगीतशालाभ्यन्तरेवधानं देहि । कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते । जाने तत्रभवती हंसपदिका वर्णपरिचयं करोति । Abhijñānaśākuntaḷa, V

6. उपगानं कृत्वा वस्तु गायति । Mālavikāgnimitra, II

7. According to the commentary of Katayavemasūri, p. 41.

8. See Vikramorvaśiya. H. D. Velankar (Ed), Sahitya Akademi, Delhi 1981, p. LV.

9. शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः । निर्हदस्ते मुरज इव चेतकन्दरेषु ध्वनिः स्यात् संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।। Colonel H. A. Ouvery, The Meghaūta Or Cloud Messanger, 1. 59.

10. शिखरासक्तमेखानां व्यजन्ते यत्र वेश्मनम् । अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ।। Kumārasambhava, VI. 8. बलाहकाश्चाशनिशब्दमर्दलाः । Rtusamhāra, II. 4. गीतानुगं वारिमृदङ्गवाद्यम् । Raghuvamsa, XVI. 64. (नेपथ्ये मृदङ्गध्वनिः)

परिव्राजिका हन्त प्रवृत्तं संगीतम्। तथा होषा जीमूतस्तनिताविशकिभिर्मयूरै-रुद्ग्रीवेरनुर सितस्य पुष्करस्य। निह्लादिन्युपहितमध्यमस्वरस्य मायूरी मदयति मार्जना मनांसि ।। Malavikāgnimitra, I. 21. त्वद्गंभीरध्वनिषु शनकैः पुष्करेष्वाहतेषु। Meghadūta, II. 6.

11. स स्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः।

नर्तकीरभिनयातिलिङ्घनीः पार्श्ववर्तिषु गुरुष्वलज्जयत् ।। Raghuvamsa, XIX. 14.

12. तालैः सिञ्जावलयसुभगैः कान्तया नर्तितो मे । Meghadūta, II. 19.

13. मनोभरामाः श्रृण्वन्तौ रथनेमिस्वनोन्मुखैः।

षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखण्डिभिः।। Raghuvamśa, I. 39.

14. प्रतियोजयितव्यवल्लकीसमवस्थामथ सत्वविप्लवात्।

स निनाय नितान्तवत्सलः परिगृह्योचितमङ्गमङ्गनाम् ।। Gopal Raghunath Nandargikar (Ed), The Raghuvamsa of Kalidāsa, VIII. 41.

15. उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्राङ्क विरचितपदं गेयमुद्गातुकामा । तन्त्रीमार्दा नयनसलिलैः सारी यत्वा कथंचित् भूयोभूयः स्वयमपि कृतां मूर्छनां विस्मरन्ती ।। Colonel H. A. Ouvery, The Meghauta Or Cloud Messanger, II, 26.

16. सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः । Ibid, I. 48.

17. स्वरेणतस्याममृतस्नुतेव प्रजल्पितायामभिजातवाचि ।

अप्यन्यपुष्टा प्रतिकूलशब्दा श्रोतुर्वितन्तीरिव ताडयमाना ।। Kumārasambhava, I. 45.

18. मुनिना भरतेन यः प्रयोगे भवतीष्वष्टरसाश्रयो निबद्धः । Vikramorvaśiya, II. 17.

19. देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा । त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ।। Shesadri Sharma, Māḷavikāgnimitra of Kāḷidāsa, I. 4.

20. दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः संक्षिप्तं निबिडोन्नतः स्तनमुरः पार्श्वं प्रमृष्टे इव । मध्यः पाणिमितोमितं च जघनं पादावरालाङ्गुली छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ।। C. H. Tawney. The Māḷavikāgnimitra of Kāḷidāsa, II. 3.

21. अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः पादन्यासो लयमनगतस्तन्मयत्वं रसेषु । शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ भावो भावं नुदति विषयाद्रागबन्धः स एव ।। C. H. Tawney. The Malavikagnimitra of Kāḷidāsa II, 8

22. वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितंबे कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् । पादाङ्गुष्ठालुळिकुसुमे कुट्टिमे पातिताक्षं नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ।। Ibid, II. 6.

23. तेन शिल्पाधिकारे योग्या इयं दारिकेति भगिन्या देव्या उपायनं प्रेषिता ।

24. C. H. Tawney, The Malvikāgnimitra of Kāḷidāsa, pp. 83-84

25. Kāmasūtra, I, 3, 12.

## Bibliography

(Books referred for Sanskrit quotations and English translations)


1. Gopal Raghunath Nandargikar (Ed.), *The Raghuvamśa of Kāḷidāsa*, Radhabai Atmaram Sagoon, Bombay, 1897.
2. Moreshwar Ramachandra Kale (Ed.), *The Raghuvamśa of Kāḷidāsa*, Gopal Narayan & Company, Bombay, 1922.
3. Ralph T. H. Griffith, *The Birth of The War God*, W, H Allan & Company, London, 1853.
4. Shesadri Sharma (Ed.&Trans), *Māḷavikāgnimitra of Kāḷidāsa*, Kāṭayavemasūrī (Com), Jnanprakasa Press, 1896.
5. Colonel H. A. Ouvery, *The Megha£ta Or Cloud Messanger*, Williams and Norgte, London, 1868.
6. C. H. Tawney, The *Māḷavikāgnimitra of Kāḷidāsa.* Thacker Spring and Company, Calcutta, 1891.

# बहुभक्तिवादीनि ब्राह्मणानि भवन्ति

**डॉ. निरञ्जनमिश्रः**
सहाचार्यः, वेदभाष्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

मन्त्रब्राह्मणयोः समुच्चय एव वेदः। आपस्तम्बेन प्रोक्तम् – मन्त्रब्राह्मणयोर्वेदनामधेयम्। मन्त्रि गुप्तपरिभाषणे इत्यस्मात् धातोः मन्त्र्यते गुप्तं परिभाष्यते इति व्युत्पत्या मन्त्रशब्दः निष्पद्यते। यत्कामःऋषिर्यस्यामार्थपत्यमिच्छन् स्तुतिं प्रयुंक्ते तद्दैवत सः मन्त्रः। मननात् मन्त्रः इति यास्काचार्यः । अनुष्ठेयार्थस्मारकाः मन्त्राः इति जैमिनी। एवम्प्रकारेण मन्त्रस्य विविधाः अर्थाः भवन्ति।

**ब्राह्मणम् –**

क) बृह् वर्धने धातोः निष्पन्नस्य ब्राह्मणशब्दस्यार्थोऽस्ति वर्धनं विस्तारो वा वितानो वा यज्ञः। ब्रह्मन् + अण् तस्येदम् इत्यनेन ब्रह्मण इदं ब्राह्मणम्।

ख) ब्रह्मशब्दः अनेकार्थेषु प्रयुक्तो भवति। येषु एकोऽर्थः मन्त्रः भवति, शतपथे **ब्रह्म वै मन्त्रः** अतः मन्त्राणाम् अथवा ब्रह्मणःव्याख्यानपरकग्रन्थानां नाम ब्राह्मणम्।

ग) ब्रह्मः वेदस्तद् व्याख्या ब्राह्मणम्। पुनः ब्रह्मणो वेदस्य मन्त्रराशेरिदं नाम यज्ञक्रियावस्तुतत्वादिनिरूपकं प्रवचनं ब्राह्मणम्।

घ) ब्राह्मणपदं तु ग्रन्थविशेषवाचकम्। यज्ञानां विविधक्रियाकलापप्रतिपादकग्रन्थाः ब्राह्मणम् इत्येतां संज्ञां भजन्ते।

ङ) संहिताभागस्य व्याख्यारूप एव ब्राह्मणरूपो वेदभागः।

च) ब्रह्मशब्दस्यापरोर्थो भवति यज्ञः – यज्ञीयकर्मकाण्डस्य व्याख्यानं विवरणञ्च सम्पादनं ब्राह्मणग्रन्थानां मुख्यविषयः।

छ) भट्टभास्करेणोक्तम् – ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां व्याख्यानग्रन्थः।

ज) वाचस्पतिमिश्रेणोक्तम् –

**नैरुक्त्यं यस्यमन्त्रस्य विनियोगः प्रयोजनम्।**

**प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते।**

यद्यपि मन्त्रब्राह्मणात्मको वेदः तथापि ब्राह्मणस्य मन्त्रव्याख्यानरूपत्त्वाद् मन्त्राः एवादौ समाम्नाताः।

झ) उक्तं जैमिनीना -

**मन्त्रश्च ब्राह्मणश्चेति द्वौ भागौ तेन मन्त्रतः,**

**अन्यद् ब्राह्मणमित्येतद् भवेत् ब्राह्मणलक्षणम्**

**ञ)** तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणशब्दः। मन्त्रव्यतिरिक्तभागस्तु ब्राह्मणभागः इत्यर्थः।

**ट)** निरूक्ते **इति विज्ञायते** इत्युक्त्वा ब्राह्मणग्रन्थानाम् एव निर्देशः कृतः।

**ब्राह्मणेषु प्रतिपाद्यविषयाः –**

**हेतुर्निवचनं निन्दा प्रशंसा संशयो विधिः**

**परक्रिया पुराकल्पो व्यवधारणकल्पना**

**उपमानं दशैते तु विधयो ब्राह्मणस्य तु।।**

**हेतुः -** तेनह्यन्नं क्रियते समुचितकारणम्। कर्मणः आरम्भे यजमानः जलस्पर्शं करोति। तत्र किं कारणम् ? जलं मेध्यं भवति। जलस्पर्शने जनः पवित्रो भूत्वा दीक्षितो भवति। उच्यते **अमेध्यो वै पुरूषः, यदनृतं वदति। तेन पूतिरन्तरतः, मेध्या वा आपः, मेध्यो भूत्वा व्रतमुपायानीति, तस्माद् अप उपस्पृशति।** **निर्वचनम् -** दधि, तदध्नो दधित्वम् - उदकम् उदानिषुर्महीर्रिति तस्मादुदकमुच्यते। रथन्तर - रथं मर्या क्षेप्लाऽतारीत् इति तद् रथन्तरस्य रथन्तरत्वम्। **निन्दा –** अमेध्या वै माषाः (यज्ञे मासस्य विधानं निषिद्धम्)। **प्रशंसा -** वायुर्वै क्षेपिष्ठा देवता (वायव्य श्वेतमालभेत पशुकामः)। **संशयः -** तद्व्यचिकित्सज्जुह्वानि मा हौषम्। **विधिः -** (चोदना) यज्ञस्तथा तस्य साङ्गोपाङ्गानां च अनुष्ठानस्योपदेश, यजमानेव समितौदुम्बरी भवति। **परक्रिया -** माषान्नेव मह्यं पचते। **पुराकल्पो -** पुरा ब्राह्मणा अभैषुः। (**परक्रिया**नाम-अन्यस्यान्यस्य चोक्तिर्वा बुधैः प्रोक्ता पुराकृतिः। **पुराकल्प**नाम यो ह्यत्यन्तोपरोक्षार्थः सः पुराकल्प इत्युच्यते)। **व्यवधारणकल्पना -** यावतो अश्वान् परिगृह्णीयात् तावतो वारूणश्चतुस्कपालान् निर्वपेद्। **उपमानम् –** उपमाः भवन्ति। केचन वदन्ति हेत्वादीनामन्यतमं ब्राह्मणं परन्तु मन्त्रेष्वऽपि हेत्वादिसद्भावाद्। यथा – हेतु - **इन्दवो वा मुशन्ति हि।** **निर्वचनम् -** उदानिषुर्महीरिति तस्मादुदकमुच्यते।

**ब्राह्मणसाहित्यस्य उद्भवः –**

**क)** ब्राह्मणानां विवेच्य विषयः विधि एव भवति। यज्ञनिष्पादने भवतु अथवा अन्यस्मिन् कर्मणि केन प्रकारेण तत् कर्तव्यं, विधानं कदा भवितव्यं, तस्य कृते कानि साधनानि अपेक्ष्यन्ते, एवं विधानां याज्ञिकविधीनां प्रतिपादनाय एव ब्राह्मणसाहित्यस्योद्भव अभवत्।

**ख)** यज्ञ विषये क्व चित् विरोधोऽपि प्रतीतो भवति। तस्य परिहाराय एव ब्राह्मणसाहित्यस्योद्भवः।

**ब्राह्मणानां कालः –**

क) ब्राह्मणग्रन्थेषूपलब्धभौगलिकविवरणेनेदं ज्ञायते यत् ब्राह्मणानामुदयः कुरूपाञ्चालप्रदेशस्तथा सरस्वती नद्याः प्रदेशोऽस्ति।

ख) मनुस्मृतौ दृषद्वती-सरस्वती उभयोः नद्योः मध्यवर्तीप्रदेशः ब्रह्मवर्तनाम्ना ख्यातः, ताण्ड्यब्राह्मणेऽपि तथैव प्राप्यते। तदेव स्थानं ब्राह्मणानां यज्ञप्रक्रियायाः पीठस्थलं भवति।

ग) ज्योतिषशास्त्राधारेण कृतिका पूर्वस्यां दिशि उदिता भवति। न तु ततः प्रच्युतो भवति। बालकृष्णदीक्षितस्य मतानुसारेण एतादृशी स्थिति विक्रमात् सहस्रत्रयवर्षं पूर्वमेव भवितुमर्हति। उच्यते – (इताः (कृतिका) हवै प्राचै दिशो न च्यवन्ते) वेदाङ्गज्योतिषग्रन्थः शतपथब्राह्मणात् अर्वाचीनः भवति। अस्य कालः ख्रीष्टात् चतुर्दशशतवर्षपूर्वं मान्योऽस्ति। प्रसिद्धज्योतिषाचार्यस्य दीक्षितस्य मतानुसारेण शतपथब्राह्मणं सहस्रत्रवर्षं पूर्वमेव। अतः ब्राह्मणयुगः ख्रीष्टात् सहस्रत्रयवर्षपूर्वादारभ्य ख्रीष्टात् सहस्रद्वयवर्षपूर्वपर्यन्तमासीत्। तत्र प्राचीनतमं भवति शतपथब्राह्मणम्। तथा अर्वाचीनं भवति गोपथब्राह्मणम्।

**ब्राह्मणानां संक्षिप्तपरिचयस्तथा तत्र प्रतिपादितविषयाः -**

**ऋग्वेदः –**

**ऐतरेयब्राह्मणम् –**

अस्य रचयिता ऋषिः महीदास ऐतरेय एव। महीदासस्य माता शूद्रकुलोत्पन्ना आसीत्। तस्या नाम **इतरा** आसीत्। केचन वदन्ति एथ्रेय (ऋत्विक्) शब्दात् ऐतरेय शब्दस्योद्भव इति। आश्वालायानप्रभृतिभ्यः अयं पूर्ववर्ती। अतिप्रथितमिदब्राह्मणम् । अत्र अष्टौ पञ्चिकाः, प्रतिपञ्चिकं पञ्चाध्यायाः, आहत्य चत्वारिंशदध्यायाः। प्रथमद्वितीयपञ्चिकायां अग्निष्टोमयागे होतुः कार्यकलापाः विविधविधानस्य च वर्णनम्। तृतीयचतुर्थपञ्चिकायां प्रातःसवनस्य माध्यन्दिनसवनस्य तृतीयसवनस्य च विषये तथा तत्र प्रयुज्यमानशस्त्राणां, उक्थ्य अतिरात्र षोडशीयागानामपि विवेचनं दृश्यते। पञ्चमषष्ठपञ्चिकायां द्वादशाहसप्ताहयागानां तथा तत्र होतुः कार्यस्य विवरणं प्रदत्तमस्ति। सप्तमपञ्चिकायां राजसूयः – शुनःशेपस्य प्रख्यातमाख्यानम्, कर्त्तव्यं भवति। अष्टमपञ्चिकायां ऐन्द्रमहाभिषेकस्य तथा चक्रवर्तिनः नृपस्य महाभिषेकस्य रोचकं वर्णनमुपलभ्यते।

**महत्त्वम् -** धार्मिकदृष्ट्या इदमतीव महत्त्वमस्ति। कथं विष्णोः महिमा समाजे प्रचारितः। चरैवेति चरैवेति शिक्षा इतः प्राप्यते। कर्मणः दृढोपासना अत्र सोपष्टम्भं प्रतिपादितमस्ति।

**शांखायनब्राह्मणम् – (कौषितकिब्राह्मणम्)**

**क)** अत्र त्रिंशदध्यायाः, अध्यायस्तु खण्डेषु विभक्तः, अतः 226 खण्डाः भवन्ति। वहवः दीर्घगद्यभागाः सन्ति। विषयदृष्ट्या ऐतरेयस्यानुगामि वर्त्तते।

ख) रूद्रस्य विशिष्टो महिमा वर्णितः (रुद्रो ज्येष्ठः श्रेष्ठश्च देवानाम्)। शिवपशुपतिउग्र प्रभृतीनि शिवस्य नामानि आलोचितानि। शिवव्रतस्य महत्त्वमपि चर्चितम्।

ग) विष्णोः स्वरूपम् (अग्निरवरार्ध्यै विष्णु परार्ध्यः)। यज्ञस्य माहात्म्यं तथा यज्ञस्य प्रतीकः विष्णुः इति पर्यालोचितमत्र।

घ) पशुयागस्य विरोधः, पशुहिंसायाः वारणम्, ये पशुहिंसामाचरन्ति ते अपरस्मिन् लोके यज्ञकर्तॄन् खादन्तीति विवरितमस्ति। (अमुस्मिन् लोके पशवः मनुष्यानश्नन्ति)

ङ) शक्वरी छन्दसः विषये (इन्द्रो वृत्रमशकद् हन्तुमाभिः तस्मात् शक्वर्यः)। एभिः छन्दोभिः इन्द्रः वृत्रं हन्तुं समर्थोऽभदिति निरूपितमस्ति।

च) अस्माकं गोत्रस्य प्रभावविषयेऽपि अत्र विवेचितमस्ति। अर्थात् समानगोत्रेण सहैव ब्राह्मणक्षत्रियवैश्याः स्थातव्या इति विषय अत्र आलोचितः।

**यजुर्वेदः**

**माध्यन्दिन तथा काण्वशतपथब्राह्मणम् –**

ब्राह्मणग्रन्थेषु सर्वाधिकमहत्त्वशाली तथा यज्ञानुष्ठानस्य सर्वोत्तमप्रतिपादको ग्रन्थः इदमेव शतपथब्राह्मणम्। माध्यन्दिनशतपथब्राह्मणे 14 काण्डाः, शतपथब्राह्मणे शतमध्यायाः, 68 प्रपाठकाः, 438 ब्राह्मणम्, 7624 कण्डिकाः सन्ति। चतुर्दशकाण्डेषु प्रतिपादितविषयाः अत्रालेच्यते -

प्रथमकाण्डे दर्शपूर्णमासेष्टिः, द्वितीयकाण्डे आधानपुनराधाने, अग्निहोत्रम्, उपस्थानम्, प्रवत्स्यदुपस्थानम्, आगतोपस्थानादि, पिण्डपितृयज्ञः, आग्रयणं, दाक्षायणयज्ञः, चातुर्मास्ययागः (वैश्वदेवः, वरूणप्रघासः, साकमेधः, शुनाशीरियः) तृतीयकाण्डे सोमयागो दीक्षाभिषवपर्यन्तम्। चतुर्थकाण्डे सोमयागे सवनत्रयगतं कर्म, षोडशीप्रभृतिसोमसंस्था, द्वादशाहयागः, त्रिरात्राहीन, दक्षिणा, सत्रधर्माः। पञ्चमकाण्डे वाजपेययागः, राजसूययागः, षष्ठकाण्डे उखासंभरणम्, विष्णुक्रमः, वात्सप्रोपस्थानम्, वनीवाहनकर्म। सप्तमकाण्डे चयनयागः, गार्हपत्यचयनं, निर्ऋतिचयनम्, अग्निक्षेत्रसंस्कारः, दर्भस्तम्बाद्यपस्यासादनानान्तं कर्म। अष्टमकाण्डे प्राणभूत्सादनादि, चयनसमाप्तिः, नवमकाण्डे शतरूद्रियहोमादि, धिष्ण्यचयनम्, पुनश्चितिः, चित्युपस्थापनम्। दशमकाण्डे चितिसम्पत्तिः, चयनयागस्तुतिः, चित्याग्निवेदिनिर्माणम्, चयनकालादिकम् इष्टकानां संख्या, अग्नेः सर्वतोमुखत्वम्। एकादशकाण्डे आधानकालः, दर्शपूर्णमासदाक्षायणयोः अवधिः, दाक्षायणः, पथिकृदिष्टि, अभ्युदितेष्टिः, अर्थवादाः, ब्रह्मचारिणः कर्त्तव्यम्,

मित्रविन्देष्टिः पञ्चमहायज्ञाः, स्वाध्यायप्रशंसा, आध्यात्मिकविद्याप्रभृतयः। द्वादशकाण्डे सत्रे दीक्षाक्रमः, सत्राणि, पृष्ठ्यादिनिरूपणम्, गवामयनम्, सौत्रामणीयागः, मृतकाग्निहोत्रम्, मृतकदाहः। त्रयोदशकाण्डे अश्वमेधः, पुरूषमेधः, सर्वमेधः, दर्शरात्रः, पितृमेधः। चतुर्दशकाण्डे प्रवर्ग्यकर्म, घर्मः महावीरः, प्रवर्ग्योत्सादनम्, प्रवर्ग्यकर्तृनियमाः ब्रह्मविद्या, काम्यं श्रीमन्थपुत्रमन्थादकम्, वंश इत्यादिः।

**काण्वशतपथब्राह्मणे –**

काण्वशतपथब्राह्मणे सप्तदशकाण्डाः, ब्राह्मणेऽस्मिन् 104 अध्यायाः, 425 ब्राह्मणाः, 6806 मन्त्राः सन्ति। काण्डानुसारेण प्रतिपादितविषयाः यथा – प्रथमकाण्डे आधानपुनराधाने, अग्निहोत्रम्, आग्रयणम्, पिण्डपितृयज्ञः, उपस्थानि, चातुर्मास्ययागः। द्वितीयकाण्डे दर्शपूर्णमासेष्टिः। तृतीयकाण्डे अग्निहोत्रीय अर्थवादः, दर्शपूर्णमासीय अर्थवादः। चतुर्थकाण्डे सोमयागदीक्षा, अभिषवादिकर्म। पञ्चमकाण्डे सोमयागः, सवनत्रयकर्म, षोडशीप्रभृतिसोमसंस्था, द्वादशाहयागः, त्रिरात्राहीनदक्षिणा, चतुस्त्रिंशद्होमः, सत्रधर्माः। षष्ठकाण्डे वाजपेययागः, सप्तमकाण्डे राजसूययागः, अष्टमकाण्डे उखासम्भरणम्, नवमकाण्डतः द्वादशकाण्डं यावत् चयनयागः। त्रयोदशकाण्डे आधानकालः, पथिकृदिष्टिः, प्रयाजानुमन्त्रम्, शंयुवाकः, पत्नीसंयाजः. ब्रह्मचर्यम्, दर्शपूर्णमासशेषः, पशुबन्धः। चतुर्दशकाण्डे दीक्षाक्रमः, सौत्रामणीयागः, अग्निहोत्रप्रायश्चित्तम्, मृतकाग्निहोत्रम्, पञ्चदशकाण्डे अश्वमेधः, षोडशकाण्डे साङ्गोपाङ्गप्रवर्ग्यकर्म, सप्तदशकाण्डे च ब्रह्मविद्या।

**कृष्णयजुर्वेदीयब्राह्मणम् –**

**तैत्तिरीयब्राह्मणम्** - शतपथब्राह्मणवदत्र स्वरयुक्तो पाठः प्राप्यते। अत्र काण्डत्रयम्, प्रथमद्वितीयकाण्डे अष्टाध्यायाः सन्ति, तृतीयकाण्डे द्वादशाध्यायाः (अवान्तरखण्डः अनुवागिति उच्यते। **प्रथमकाण्डे** अग्न्याधानम्, गवामयन-वाजपेय-सोम-नक्षत्रेष्टि-राजसूयादीनां वर्णनम्। **द्वितीयकाण्डे** - अग्निहोत्र-उपहोम-सौत्रामणी-वृहस्पतिसव-वैश्यसवादीनां नानासत्राणाञ्च विवरणम्। **तृतीयकाण्डे –** नक्षत्रेष्टि (अयं भागः अवान्तरकालिकरचना इति कथ्यते) **चतुर्थप्रपाठके** - पुरोषमेधोपयुक्तानां पशूनां वर्णनम्। **अन्तिमाः त्रयः प्रपाठकाः**

(10 तः 12) काठकनाम्ना अभिहिता। **एकादशप्रपाठके** भरद्वाजस्य ब्रह्मचर्यविषये तथा त्रयीविद्या विषयः उक्तः। **द्वादशप्रपाठके** - चातुर्होत्र, वैश्वसृज्यागादीनां वर्णनम्।

**वैशिष्ट्यम् –** अत्र सामवेदस्य श्रेष्ठत्त्वं साधितम्। अश्वमेधे क्षत्रिय एव अधिकारी, तत्र भेदद्वयं राज्याधिकारिणः राजपुत्राः, अन्ये उग्राः, समाजे स्त्रीणां विशेषः समादरः आशीत्। शास्त्रार्थादिभिः ब्राह्मणानां वैशिष्ट्यम् आसीत्। वराहावतारस्य सङ्केतः अत्र प्राप्यते।

**सामवेदस्य ब्राह्मणम् –**

ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम्, देवताध्यायब्राह्मणम्, उपनिषद्ब्राह्मणम् (मन्त्र + छान्दोग्योपनिषद्), संहितोपनिषद्ब्राह्मणम्, वंशब्राह्मणम्, जैमिनीयब्राह्मणम्। सायणाचार्यस्य मते,

**अष्टौ हि ब्राह्मणग्रन्थाः प्रौढब्राह्मणमादिमम्।**
**षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत्।।**
**आर्षेयं देवताध्यायो भवेदुपनिषद् ततः।**
**संहितोपनिषद् वंशो ग्रन्थाः अष्टावितीरिताः।।**

**ताण्ड्यब्राह्मणम् –** इदं सामवेदस्य प्रधानब्राह्मणमस्ति। ताण्डिशाखातः सम्बद्धमिदम्। अत्र पञ्चविंशति अध्यायाः, अतः पञ्चविंश नाम्नाख्यातम्, सायणाचार्यस्य मते **इदं** महाब्राह्मणमस्ति। प्रथमाध्याये उद्गातुः कार्यम्, द्वितीयतृतीयाध्याययोः त्रिवृत-पञ्चदश-सप्तदशप्रभृतीनाम् स्तोमविष्टुतीनामालोचनम्। चतुर्थपञ्चमाध्याययोः गवामयनस्य वर्णनम्, इदं एकसंवत्सरपर्यन्तमनुष्ठेयम्, समस्तानां सत्राणां प्रकृति विषये आलोचितमत्र। षष्ठाध्यायतः द्वादशाध्यायेषु ज्योतिष्टोमस्योत्पत्तिः-उक्थ्य-अतिरात्रादियागानां वर्णनम्। औदुम्बरी तथा द्रोणकलशस्य स्थापनविषये वर्णनम्।

सप्तमखण्डस्य षष्ठसप्तमाध्यायादाराभ्य सप्तमस्य द्वितीयखण्डपर्यन्तं सवनानां विषये वर्णितमस्ति। अष्टमस्य शेषखण्डात् नवमाध्यायपर्यन्तं तृतीयसवनस्य विषये, दशमाध्यायात् पञ्चदशाध्यापर्यन्तम् द्वादशाहयागाः षोडशाध्यायात् उनविंशाध्यायं यावत् नानाविधएकाहयागानां विवरणम्। विंशतितः द्वाविंशत्यध्यायपर्यन्तं अहीनयागाः (वर्णत्रयाणामधिकारः) अतिरात्रसंस्थाः। त्रयोविंशतितः पञ्चविंशत्यध्यायपर्यन्तं सत्राणां वर्णनं, सत्राणां लक्षणं, उभयतो अतिरात्रसंस्थाकः सोमयागविशेषः सत्रप्रभृतयः विषयाः तत्रोपलभ्यन्ते।

**महत्त्वम् -**

1. सोमयागस्य विशदं वर्णनं तथा औचित्यम् अत्र निरुपितमस्ति।
2. सामनामकरणस्य आधारः तस्य द्रष्टा ऋषि एव। यथा वैखानससाममन्त्रस्य वैखानसऋषिः, शर्कराख्यस्य शर्करः इयं एव परिपाटी अत्र सूचिता।
3. रोचकानि आख्यानानि अपि सन्ति।

4. व्रात्ययज्ञस्य वर्णनम्, प्रवासी तथा आचारविहीन आर्यः एव व्रात्यनाम्नाऽभिज्ञायते, एतेषां दोषविमुक्तये विभिन्नाः यज्ञाः वर्णिताः।
5. आकुरूक्षेत्रात् नैमिषारण्यमभिव्याप्यप्रदेशः यज्ञभूमेः स्वरूपमिति उल्लिखितमस्ति।

**षड्विंशब्राह्मणम् –**

इदं ब्राह्मणं प्रपाठकस्तथा खण्डः, आध्यायस्तथा खण्डः इति प्रकारद्वयेनोपलब्धम्। खण्डप्रकारेण पञ्चखण्डाः, अध्यायप्रकारेण षडाध्यायाः। इदं ब्राह्मणं पञ्चविंशब्राह्मणस्य भागोऽस्ति। अत्र तात्कालिकधार्मिकधारणानां सङ्केतो मिलति।

**सामविधानब्राह्मणम् –**

प्रकरणत्रयविशिष्टमिदं ब्राह्मणम्। धर्मसूत्राणाञ्च पूर्वपीठिकास्तीदम्। प्रथमप्रकरणे कृच्छ्र-अतिकृच्छ्रः-कृच्छातिकृच्छ्राविषयस्तथा विभिन्नव्रतानाम् वर्णनं विद्यते। द्वितीयप्रकरणे काम्यप्रयोगानां विषये यथा शत्रूणां विनाशनाय, धनार्जनाय अभिचाराय, उपद्रवानां शमनाय अनुष्ठानानि (सामगानेन सह) वर्णितानि। सुवर्णप्राप्तिनिमित्ताय मणिभद्रयक्षस्य च पूजाविधानम्, शत्रुमारणाय, व्याधिशान्तये उपायाः प्रदर्शिताः सन्ति। तृतीयप्रकरणे ऐश्वर्याय, अभिनवगृहस्य प्रवेशाय, आयुवर्द्धनाय बहुविधानामनुष्ठानानां (विभिन्नसामगानेन सह) वर्णनं विहितमस्ति।

**महत्त्वम् –** अयं ग्रन्थाः धर्मसूत्राणां पूर्वपीठिकाऽस्ति। धर्मसूत्राणाम् उपजीव्यरूपेणास्य प्रसिद्धिः।

**आर्षेयब्राह्मणम् –**

क) ऐतिहासिकदृष्ट्या अतीवमहत्त्वपूर्णमिदं ब्राह्मणम्।
ख) इदं ब्राह्मणं सामवेदस्य अनुक्रमण्याः कार्यं करोति।
ग) अत्र प्रपाठकत्रयम्, द्वाशीति (82) खण्डाश्च सन्ति।
घ) अस्मिन् ब्राह्मणे सामोद्भावकानाम् ऋषीणां नामसङ्केतो प्राप्यते।
ङ) सामगानाय वैज्ञानिकानुशीलनिमित्ताय ब्राह्मणमिदं महदुपादेयम्।
च) सामगानस्य दुष्करं दुर्वोधञ्च प्रकारावगन्तुं इदं ब्राह्मणं विशेषोपकारकं भवति।

**देवताध्यायब्राह्मणम् –**

क) लघ्वकारमस्ति दैवतब्राह्मणमिदम्।
ख) खण्डत्रयम्।
ग) प्रथमखण्डे देवतानां वर्णनम् प्राप्यते। अग्निः, इन्द्रः, प्रजापतिः, सोमः, वरूणः, त्वष्टा, अङ्गिरस्, सरस्वतीप्रभृतीनां सामदेवतानां नाम्नः निर्देशोऽत्रप्राप्यते। विशिष्टनामान्यपि प्राप्यन्ते।

घ) द्वितीयखण्डे छन्दसां देवताः तथा तेषां वर्णनम्।

ङ) तृतीयखण्डे छन्दसां निरूक्तयः अतीवप्रामाणिकतया सन्ति।

**महत्त्वम् –**

भाषाशास्त्रदृष्ट्या अतीवमहत्त्वपूर्णमस्ति। निरूक्तग्रन्थे यास्केनापि इतः कतिपय निरूक्तयः गृहीताः। यथा – गायत्री छन्दसः निर्वचनं दीयते। स्तुत्यर्थकः गै धातोः निष्पन्नः देवतानां प्रशंसकात् तथा वेदसमुदायस्य गानकर्तुः ब्राह्मणात् समुत्पन्नो छन्दः। अनेन प्रकारेण अन्येषां छन्दसामपि विवरणं प्राप्यते।

**उपनिषद् ब्राह्मणम्-**

अस्मिन् ब्राह्मणे मन्त्रब्राह्मणं तथा छान्दोग्योपनिषद्ब्राह्मणम् इति द्वौ ग्रन्थौ सम्मिलितौ स्तः। दशसु प्रपाठकेषु विभक्तमस्तीदम्।

1. **मन्त्रब्राह्मणम् –** अपरं नाम छान्दोग्योब्राह्मणम्

   क) द्वौ प्रपाठकौ, प्रतिप्रपाठकं अष्टौ खण्डाः।

   ख) अत्र गृह्यसंस्कारेषु प्रयुक्तानां मन्त्राणां विवरणम्।

   ग) ताण्ड्यशाखया सम्बन्ध इदमिति शङ्कराचार्यस्य मतम्।

   घ) आर्षेय-देवताध्याय-मन्त्रब्राह्मणम् इत्यत्र एकाङ्गीभावः परिलक्ष्यते।

   अस्य विवरणं किञ्चिदत्र उपस्थाप्यते।

**प्रपाठकाः/विषयाः**

**प्रथमप्रपाठके –** विवाह-गर्भाधान-सीमन्तोन्नयन-चूडाकरण-उपनयन-समावर्तनम् तथा गो बृद्धये मन्त्राः प्रतिपादिताः।

**द्वितीयप्रपाठके –** भूतबलि-आग्रहायणीयकर्म-पितृपिण्डदान-देवबलिहोम-दर्शपूर्णमास-आदित्योपस्थान-नवगृहप्रवेशः-स्वस्त्ययन-प्रासादप्राप्त्यादीनां मन्त्राः आम्नाताः। अस्य भाषा सरला वर्तते। यथा – **इयं नार्युपब्रुतेऽग्नौ लाजा नापवन्ती दीर्घायुरस्तु मे पतिः शतं वर्षाणिजीवन्तु**। दाम्पत्यजीवनस्य समृद्धये अयं मन्त्रः वर्तते।

2. **छान्दोग्योपनिषद्ब्राह्मणम् –**

   उपर्युक्तस्य ब्राह्मणस्य अन्तिमाष्टप्रपाठकाः प्रसिद्धा छान्दोग्योपनिषद् भवति।

**संहितोपनिषद् ब्राह्मणम्-**

संहितायाः उपनिषद् अर्थात् संहितायाः रहस्यप्रतिपादकब्राह्मणमिदम्। अत्र पञ्चखण्डाः सन्ति। प्रतिखण्डं सूत्रेषु विभक्तमस्ति।

**प्रथमखण्डे –** देवहूसंहिता, वाक्शबहूसंहिता, अमित्रहूसंहिता (साम्नः गायनानां संहिता)। अत्र त्रिविधगानसंहितायाः स्वरूपस्य फलं विवरणञ्च प्रतिपादितमस्ति।

**द्वितीयतृतीयखण्डयोः –** गानसंहितायाः विधि-स्तोम-अनुलोमप्रतिलोमादिस्वराणां व्यापकं विवेचनं विद्यते अत्र। वैज्ञानिकोऽयं विषयः। यतोहि सामगानमर्मस्योद्घाटनम् अत्र कृतमस्ति। पुनः अन्तिमभागे गुरुशिष्ययोः यौग्यतायाः विवेचनं तथा दानस्य भूयसी प्रशंसा प्राप्यते अत्र।

**चतुर्थपञ्चमखण्डयोः –** पूर्वोक्ततथ्यस्य एव विस्तृतमालोचनं विद्यते।

**महत्त्वम्-** सामगानरहस्यस्यज्ञानाय इदमद्वितीयं ब्राह्मणं भवति।

**वंशब्राह्मणम्-**

**क)** स्वरूपेण इदं लघ्वाकारं तथा खण्डत्रयोपेतम् अस्ति।

ख) अत्र सामवेदीयाचार्याणां वंशपरम्परा सङ्कलिता। प्राचीनानाम् ऋषीणां परिचयप्राप्त्यर्थम् इदमतीव उपयोगि भवति।

**जैमिनीयब्राह्मणम् –**

क) जैमिनीशाखया ब्राह्मणमिदं सम्पूर्णरूपेण नोपलभ्यते।

ख) एतस्य सम्पूर्णब्राह्मणस्य प्रकाशनं जातं तथापि सर्वं इदं नोपलभ्यते।

ग) शतपथमिव इदं विपुलकायमस्ति।

घ) यागानुष्ठानरहस्यज्ञातुं नितान्तमुपादेयमस्ति।

ङ) अयं ग्रन्थः गायत्र्युपनिषद् इति नाम्ना प्रख्यातः।

**अथर्ववेदस्य ब्राह्मणम् -**

**गोपथब्राह्मणम् –**

क) अथर्ववेदस्य एकमेव ब्राह्मणम्

ख) पूर्वगोपथब्राह्मणम् उत्तरगोपथब्राह्मणं चेति भागद्वयम्।

ग) पूर्वगोपथब्राह्मणे पञ्चप्रपाठकाः। प्रपाठकानां विभाजनं कण्डिकासु अभवत्। तत्र कण्डिकानां संख्या पञ्चविंशतिः (25) वर्त्तते।

घ) ब्राह्मणसाहित्ये अयं उत्तरकालिकः मन्यते।

**पूर्वगोपथस्य –**

क) प्रथमप्रपाठके ओकारस्य तथा गायत्र्याः महिमा वर्णितः।

ख) द्वितीयप्रपाठके ब्रह्मचारिणां नियमाः (वेदाध्ययनाय द्वादशाब्दपर्यन्तं कालो निर्धारितः)

ग) तृतीयप्रपाठके यज्ञस्य चतुर्णां ऋत्विजां कार्यकलापाः निरूपिताः।

घ) चतुर्थप्रपाठके ऋत्विजां दीक्षायाः विशिष्टवर्णनम्।

ङ) पञ्चमप्रपाठके प्रथमतः संवत्सरसत्रस्य, अश्वमेध-पुरूषमेध, अग्निष्टोमादियज्ञानां विवरणम्।

उत्तरगोपथब्राह्मणस्य विषयवर्णनं नतावदेवं सुव्यवस्थितमस्ति। अत्र वहुविधानां यज्ञानां तथा तत्सम्बद्धाख्यायिकानामुल्लेख प्राप्यते।

**महत्त्वम् –**

**तस्माद् ब्राह्मणो नैवगायेन्ननृत्येन्नमाम्लागृधः** मन्त्रोच्चारणात् पूर्वं ओंकारोच्चारणम्, अनुष्ठानात् पूर्वमाचमनं कर्तव्यम्। ऋग्वेदात् अनेकमन्त्राः समुद्धृतात्र, भाषाशास्त्रदृष्ट्या अतीवमहत्त्वपूर्णम्। वरूणादिशब्दानां निर्वचनमत्र सोपष्टम्भं वर्तते।

**उपसंहारः**

एवमेव पत्रेऽस्मिन् ब्राह्मणग्रन्थानां तथा तत्र प्रतिपादितानां लघुविवरणमत्र प्रस्तुतम्। वस्तुतः ब्राह्मणग्रन्थाः अस्माकं संस्कृतेः परम्परायाः प्राणस्वरूपाः भवन्ति। सूक्ष्मदृष्ट्या विचारयामः चेत् वेदार्थाः अत्यन्तं दूरुहत्वाद् तेषामर्थावबोधनाय ब्राह्मणग्रन्थाः एव अस्मान् चीरमुपकुर्वन्ति। अतः अस्माकं आचारव्यवहारेषु च सर्वत्र ब्राह्मणग्रन्थस्य प्रभाव अगोचरेण पतत्येव। तस्मात् ब्राह्मणग्रन्थानाम् अध्ययनमनुशीलनमालोडनञ्चास्माभिरवश्यं कर्तव्यं भवतीति दिक्।

**सन्दर्भग्रन्थाः**

1. वैदिकवाङ्मयस्येतहासः, आचार्य जगदीशचन्द्रमिश्रः।
2. कात्यायनश्रौतसूत्रम, प्रो. लक्ष्मीश्वर झा।
3. यज्ञतत्त्वप्रकाशः, श्रीचिन्नस्वामीशास्त्रि।
4. ईशादि नौ उपनिषद्, गीताप्रेस, गौरखपुर।
5. ब्राह्मणसंग्रहः, समीरण चन्द्रन चक्तवर्ती।
6. शषतपथब्राह्मणम्, राष्ट्रिय संस्कृत संस्थान।
7. शुक्लयदुर्वेदीय शतपथ ब्राह्मण, स्वामी सत्यप्रकाश सरस्वती।
8. ऐतरेयब्राह्मणम्, डा. सुधाकर मालव्य।
9. तैत्तिरीयब्राह्मणम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।
10. गोपथब्राह्मणम्, क्षेमकरणदास त्रिवेदी

## Writer's World

1. Adhya Atanu, HOD, Assistant Professor, Raignj University, Uttar Dinajpur, West Bengal, Pin-733134
2. Arya Sukant, Lecturer in Sanskrit, SSB College, Mahakalpara, Kendrapara, Mail- Sukantaryan@gmail.com
3. Bag Pradeepkumar, Department of Sahitya, National Sanskrit University, Tirupati-517507, Mob- 9533205161
4. Chakrabartti Santanu Kumar, Assistant professor (Guest Faculty) Department of Bouddha Darshan, Sri Sitaram Vaidic Adarsha Sanskrit Mahavidyalay, Kolkata- 700035
5. Chattopadhyay Chinmoy, A.M College, Jhalda, Purulia, West Bengal, Pin-723202, Email- dr.chinmoychattopadhyay@gmail.com, Mob-8617628289
6. Chaubey Awadhesh Kumar, Cental Sanskrit University, Ekalavya Campus, Agartala, Triputra-799210
7. Dharua Susanta, Research Scholar, KISS University, Bhubaneswar, Odisha-751024
8. Dora Ashutosh, Research Scholar, National Sanskrit University, Tirupati-517507, Mail- ashutoshdora20@gmail.com
9. Gautam Dayaram, Research Scholar, Delhi University, Mob- 9711603017, Mail-dayaram.gautam1020@gmail.com
10. K Rajesh Rao, Ph.D Research Scholar, SVYASA Yoga University
11. K. Jayanisha, Associate Professor, Dept. of Sanskrit, Sree Keralavarma College, Thrissur, Pin- 680011
12. Karmakar Debashish, Assistant Professor, Department of Sanskrit, Central University of Odisha, Koratput, Odisha-763004, Mail-debashiskarmakar09@gmail.com

13. Kishan M., Assistant Professor, Department of Sanskrit, Delhi University, New Delhi-110007

14. Mahana Pankajkumar, Guest Teacher, Dharanidhar University, Keonjhar, Odisha- 758001

15. Mishra Manoj Kumar, Assistant Professor in Sanskrit, Santal Bidroha Sardha Satabarshiki Mahavidyalaya, P.O.- Goaltore, Dist.- Paschim Medinipur, West Bengal, Pin- 721128, Ph- 8294582596

16. Mishra Niranjan, Associate Professor, Department of Vedabhashyam, National Sanskrit University, Tirupati-517507, Mob- 8125937739, Mail- Mishra.niranjan92@gmail.com

17. Mishra Shailesh Kumar, Assistant Professor, Rajkiya Sanskrit College, Ranchi, Jharkhand-834001, Mail- shail.vbu@gmail.com

18. Rath Bharat Bhusan, Associate Professor in Sahitya, National Sanskrit University, Tirupati-517507, Mail- paramatmabharat@gmail.com

19. Sahoo Subalchandra, Department of Vyakarana, Government Degree Sanskrit College, Baripada, Mayurbhanj, Odisha-757001, Email: subalsahoo2000@gmail.com

20. Sarkar Nilima, Assistant Professor, Department of Sanskrit, Samsi College, Mob-825064550, Mail- nilimasarkar1989@gmail.com

21. Satapathy Swetapadma, Assistant Professor, Department of Sahitya, National Sanskrit University, Tirupati-517507, Mob-9000605354

22. Sudev, Assistant Professor, Department of Sanskrit, Panchmura Mahavidyalaya, Bankura, West Bengal-722156

---------------------------